KASHI-SANSKRIT-SERIES

(HARIDĀS SANSKRIT GRANTHAMĀLĀ)

140.

(Nyāya Section, No. 21)

महामहोपाध्याय श्रीगङ्गेशोपाध्यायकृतं

तर्कप्रकरणम्

श्रीमथुरानाथतर्कवागीशविरचित-

तर्करहस्ययुतं

तर्कतीर्थ-न्यायाचार्य-

श्रीवामाचरणभट्टाचार्य विरचित—

विवृतिसंवलितम् ।

प्रकाशकः—

जयकृष्णदास-हरिदास गुप्तः-

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी ।

अस्मत्प्रकाशित-वेदान्तग्रन्थाः ।

१ **अद्वैतसिद्धिसिद्धान्तसारः** । सदानन्दव्यासप्रणीतः तत्कृतव्याख्या च ४॥)

२ **ब्रह्मसूत्रवृत्ति** । (मरीचिका) ३)

३ **खण्डनखण्डखाद्यम्** । "खण्डनभावप्रकाशिका" "शाङ्करी" "खण्डन-भूषामणि" 'खण्डनदर्पण" "खण्डनरत्नमालिका" पञ्चटीका समेतम् १॥)

४ **खण्डनपरिशिष्टम्** । श्रीताराचरणशर्मणा विरचितम् । ॥)

५ **जीवनमुक्तिविवेकः** । विस्तृतसरल भाषानुवादेन सहितः । २)

६ **तत्त्वदीपनम्** । अखण्डानन्दमुनिकृतं (पञ्चपादिकाविवरणस्य व्याख्यानं) ८)

७ **तत्त्वत्रयम्** । लोकाचार्यप्रणीतं । वरवरस्वामिनिबद्धभाष्योपबृंहितं २॥)

८ **तत्त्वशेखरः** । ,, तथा वरदगुरुकृतः तत्त्वत्रयचुलुकसंग्रहः १॥)

९ **न्यायपरिशुद्धिः-सटीक** । श्रीवेदान्ताचार्यप्रणीता । ७॥)

१० **न्यायमकरन्दः-सटीक । प्रमाणमाला-न्यायदीपावली युतः** ६)

११ **प्रणवकल्पः । "प्रणवकल्पप्रकाशाख्यभाष्य"** समलंकृतः १॥)

१२ **श्रीभाष्यवार्तिकं-यतीन्द्रमतदीपिका** सकलाचार्यमतसंग्रहश्च ३)

१३ **वेदान्तरत्नमञ्जूषा** तथा **वेदान्ततत्त्वबोधः** । सम्पूर्णः ३)

१४ **वेदान्तसिद्धान्तसङ्ग्रहः** तथा-**वेदान्तकारिकावली** "अध्यात्म-सुधातरङ्गिणी" टीकायुता ४॥)

१५ **वेदान्तदर्शनम्** । "ब्रह्मामृतवर्षिणी" टीका सहितम् ६)

१६ **वेदान्तपरिभाषा** । "अर्थदीपिका" टीका-टिप्पणी सहिता । १)

१७ **श्रुत्यन्तकल्पवल्ली** । पुरुषोत्तमप्रसादकृत सम्पूर्णा । ४॥)

१८ **श्रुत्यन्तसुरद्रुमः** । तथा-**श्रुतिसिद्धान्तमञ्जरी** । व्रजेश्वरकृता । ४॥)

१९ **पञ्चीकरणम्** । "वार्तिक" टीका 'तत्त्वचन्द्रिका' 'विवरणेन' च सहितम् ॥)

२० **बोधसारः** । श्रीनरहरिकृतः, तच्छिष्य दिवाकरकृत टीकया सहितः १५)

२१ **भेदधिक्कारः-सटीक** । अप्पयदीक्षितविरचित "उपक्रमपराक्रमश्च" ३)

२२ **विवरणोपन्यासः** । "वाक्यसुधा" ब्रह्मानन्दी व्याख्यासहितः । ३)

२३ **सिद्धान्तबिन्दुः-न्यायरत्नावली-नारायणीटीकोपेतः** । ४)

२४ **संक्षेपशारीरकम्** । रामतीर्थकृत 'अन्वयार्थबोधिनी"टीका सहितम् ८)

२५ **संक्षेपशारीरकम्** । "मधुसूदनी" टीकासहितम् । ८)

२६ **स्वानुभवादर्शः-सटीक** । 'अनुभूतिलेशः समेतः । ३)

२७ **श्रीमत्सनत्सुजातीयम्** शङ्करभाष्य "नीलकण्ठी"व्याख्याद्वयसमन्वितम् १)

२८ **हरिलीलामृतम्** । मधुसूदनीटीकासहितं । १॥)

२९ **श्रीविद्वन्मण्डनम्** । पुरुषोत्तमजीकृत "सुवर्णसूत्र" व्याख्यासहितं ३॥)

३० **प्रस्थानरत्नाकरः** । गोस्वामी पुरुषोत्तमजी कृतः सम्पूर्णः ३)

३१ **शुद्धाद्वैतमार्तण्डः** । "प्रकाश" "प्रमेयरत्नार्णव" टीकाद्वयोपेतः १॥)

३२ **श्रीअणुभाष्यम्**। गोस्वामिश्रीपुरुषोत्तमजीकृत "प्रकाश"व्याख्यासहितं २२॥)

THE

KASHI SANSKRIT SERIES

(*HARIDĀS SANSKRIT GRANTHAMĀLĀ*)

140.

(Nyāya Section. No. 21)

THE

TARKA PRAKARAṆA

OF

M. M. S'RĪ GANGES'OPĀDHYĀYA

With

Tarkarahasya

OF

M. M. S'RĪ MATHURĀNĀTHA TARKAVĀGĪS'A

WITH A COMMENTARY BY

Nyāyāchārya & Tarkatīrtha

PT. VĀMĀCHARAṆA BHATTĀCHĀRYA

PUBLISHED BY

JAYA KRISHNA DÂS HARI DAS GUPTA

The Chowkhambâ Sanskrit Series Office

Benares City

1944

[*All Rights Reserved by the Publishers.*]

Registered According to Act XXV of 1867.

PRINTED BY

JAYA KRISHNA DAS GUPTA,

VIDYA VILAS PRESS, BENARES CITY.

1944

[All Rights Reserved by the Publishers.]

॥ श्रीः ॥

काशी-संस्कृत-सीरिज-ग्रन्थमालायाः

१४०

न्यायविभागे एकविंशति (२१) पुष्पम् ।

महामहोपाध्याय-

श्रीमद्गङ्गेशोपाध्यायविरचितं

तर्कप्रकरणम्

महामहोपाध्याय-

श्रीमन्मथुरानाथतर्कवागीशकृत-

तर्करहस्ययुतं

तर्कतीर्थ-न्यायाचार्य-

श्रीमद्रामाचरणभट्टाचार्यविरचित-

विवृतिसंवलितं

तदन्तेवासिनोः-

श्रीमत्स्वामि निर्दोषानन्द-योगीन्द्रानन्दयोः

साहाय्येन संशोधितश्च ।

प्रकाशकः-

जयकृष्णदास-हरिदास गुप्तः-

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी ।

वि० सं० २००१]

[मूल्यं १)

[अस्य ग्रन्थस्य पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकाधीनाः]

विज्ञापनम् ।

अयि भोः प्रियपाठकाः !

श्रीमन्महामहोपाध्यायगङ्गेशोपाध्यायविरचिततर्कग्रन्थप्रभाकरः समस्तनास्तिक्यध्वान्तान्तको लौकिकानां परीक्षकाणाञ्च सर्वेषां सर्वकर्मनिमित्तीभूतः सर्वधर्मोपयोगितया पृथिव्यामानानरैः सर्वैरेव समाद्रियते, किं बहुना निखिलशास्त्रज्ञानार्थं तर्कस्य सर्वथाऽऽवश्यकता संभवतीत्यस्माभिर्मन्यते । अस्य च महामहोपाध्यायश्रीमन्मथुरानाथतर्कवागीशविनिर्मितमतिसरलं **तर्करहस्यं** विराजमानमप्यतिसंक्षिततया सुधीभिरनवगततत्त्वमिति मयाऽस्य सुविस्तरा **तर्कविवृतिर्विरचिता**, सा यदि सुधीभिः समादरणीया सती तेषामुपकाराय प्रभवति तदा कृतकृत्योऽहं भविष्यामि ।

तर्केणेश्वरनिश्चयः समजनीवादीप्यमानेन यः
कुर्यादार्यगणश्च कर्मजनितं जन्मेति सन्निश्चयम् ।
यं वाऽऽसाद्य जनाः प्रमाणनिचयैरासादयन्ती प्रमां
तर्कोऽयं प्रतिभातु भारतजनैरालोचितः सादरम् ॥ १ ॥
अन्यस्मिन्निहिता सदा कठिनता शास्त्रे तमिस्रायते
दृष्टा शिष्टगणेन यश्च नियतं ज्योत्स्नायमानः कृतः ।
येनेशः प्रमितः सता सुमहता सश्रेयसे भारते
न्यायः प्राणसमः सखेति मतिमान् जानाति मानप्रियः ॥ २ ॥
गौडे गौरवसौरभे जनपदे विख्यातविद्याश्रये
जातेनाऽऽशु विनिर्मितेव तरणी मग्नाय तर्काम्बुधौ
माथुर्या **विवृतिर्मयाऽतिविमला** तर्कस्य सा धीमता
श्री **वामाचरणेन** धीरजनतानन्दप्रदानेच्छया ॥ ३ ॥
रसर्त्तुवसुचन्द्रेऽस्मिन् शाके भाद्रसिताष्टमीं ।
प्राप्येयं विवृत्तिर्याता समाप्तिं धीमदन्तिके ॥ ४ ॥

इति

श्रीवामाचरण भट्टाचार्यस्य ।

॥ ॐ तत्सन्नमो ब्रह्मणे ॥

तत्त्वचिन्तामणौ

सविवृतिकतर्करहस्ययुतं

तर्कप्रकरणम् ।

* अथ तत्त्वचिन्तामणिः *

तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेत्—न, यावदाशङ्कं तर्कानुसरणात् ।

* अथ विवृतिः *

तर्केण यस्य महतो भवतापहन्तुः प्रामाण्यनिश्चयमहो कुरुते स धीरः ।
यज्ज्ञानतो लभत एव जनः स मुक्तिं तं नौमि शङ्करमहं बहुतर्कवेद्यम् ॥ १ ॥

श्रीवामाचरणौ नत्वा पितरौ च गुरुं वरम् ।
विवृणोति सुधीरेकां दुर्गमां तर्कमाथुरीम् ॥ २ ॥

ज्ञानिनो यदि पश्यन्ति विस्तृतां मत्कृतामिमाम् ।
विवृतिश्चेत्तदा मन्ये धन्योहमिति सांप्रतम् ॥ ३ ॥

अनुमिनोमीत्याकारकानुभवविषयतावच्छेदकमनुमितित्वं यथा जातिस्तथा आपादयामीत्यनुभवविषयतावच्छेदकतर्कत्वमपि जातिरेवेति केचित् । अन्ये तु व्यापकाभावप्रकारकनिश्चयविषयीभूते धर्मिणि आहार्यव्याप्यारोपेण तथाविधव्यापकारोपस्तर्क इति वदन्ति । वस्तुतः पक्षे आपाद्यव्याप्यापादकवत्तानिश्चयजन्यज्ञानं तर्कः । तत्र चापाद्यव्यतिरेकनिश्चयपक्षतावच्छेदकादिनिश्चयस्तादृशापादकनिश्चयश्च हेतुस्तादृशनिश्चयं प्रति आपाद्याभावाद्यवगाहिसंशयादेः स्वातन्त्र्येण संशयसामग्रीसंपादकतया वा प्रतिबन्धकत्वं, तादृशसंशयाद्यनुत्पादार्थं यदि तर्कान्तरस्यावश्यकता स्यात्तदा तादृशतर्कान्तरकारणविघटकसंशयविघटकत्वेन तर्कान्तरस्याप्यावश्यकतेति तत्र तत्रापीत्यादिरीत्याऽनवस्था स्यात्, न हि तादृश्यनवस्था बीजाङ्कुरवत्प्रामाणिकी बीजाङ्कुरस्थले अनवस्थाया अगत्या प्रामाणिकत्वसंभवेऽपि अनवस्थिततर्कधाराया अप्रामाणिकत्वात् । अन्यथा अनवस्थिततर्कस्य तर्कं प्रति प्रयोजकतायाः स्वीकरणीयतया तादृशप्रयोजकतानिश्चायकविरहेण तर्कं प्रति तर्कस्य प्रयोजकत्वाऽसंभवात् वह्निधूमव्याप्तिग्राहकतर्कस्य प्रयोजकाभावेनानुत्पादात् तादृशतर्कस्य वह्निधूमव्याप्तिग्राहकत्वाभिधानं नैयायिकानामतिसाहसमिति चार्वाका एव विजयेरन् ।

वस्तुतस्तु तर्को यदि तर्कत्वव्यापकप्रयोजकतानिरूपितप्रयोज्यतावान् स्यात्तदा तर्कभिन्नः

यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः । तथाहि—

* अथ तर्कमाथुरी *

यत्तर्कविघटकशङ्कासामान्यं तर्काभावातिरिक्तकारणप्रतियोगिकाभावादेव पूर्वं नावतरति तं तर्कमाह—*तथाहीति* ।

स्यादेतत्—आपत्तिभयेनानवस्था न प्रामाणिकी, तर्कत्वावच्छिन्नं प्रति तर्कत्वेनाऽप्रयोजकत्वात्तर्कभेदाभावरूपापाद्याभावेन तर्कत्वेन तर्कत्वव्यापकप्रयोजकतानिरूपितप्रयोज्यत्वाभावस्य तर्के सिद्धिरिति तु वयमुत्पश्यामः । नव्यास्तु तर्को यदि तर्कजन्यः स्यात्तदा तर्काऽजन्यजन्यो न स्यादित्येवमापत्तिरनवस्थायामिति प्राहुः । अनवस्थाया अप्रमाणिकत्वे तस्याः परिहारस्तु संभवत्येव । तथाहि यादृशवह्निधूमव्याप्तिग्राहकतर्कात्पूर्वं तादृशतर्कविघटकस्य 'अवह्नेरेव भविष्यति' इत्यादिशङ्कासामान्यस्य तर्कभिन्नवह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानादेवानुत्पादस्तादृशतर्कप्रदर्शनेनानवस्थां परिहर्तुमाह मूले—**तथाहीत्यादि** । अत्र धूमस्य पक्षत्वम्, उत्पन्नत्वाभावस्याऽपाद्यत्वं, वह्न्यसमवहितजन्यत्वाभावविशिष्टस्य वह्निसमवहितजन्यत्वाभावस्यापादकत्वम्, आपाद्यापादकयो र्व्याप्तिग्रहश्च नित्याकाशादाविति द्रष्टव्यम् । तथा च धूमो यदि वह्न्यसमवहितजन्यत्वाभावविशिष्टवह्निसमवहितजन्यत्वाभाववान् स्यात्तदा जन्यत्वाभाववान् स्यात्, यथा आकाश इत्यर्थः पर्यवसितः । नचान्यतरत्वस्याखण्डोपाधित्वमते लाघवाद् वह्न्यसमवहितजन्यत्ववह्निसमवहितजन्यत्वैतदन्यतराभावस्यैवापादकत्वमस्त्विति वाच्यं, तथा सति आपाद्याभावेन जन्यत्वेन तादृशान्यतराभावाभावस्यान्यतरस्यैव धूमादौ सिद्धिसंभवेन धूमे वह्निसमवहितजन्यत्वस्यासिद्धौ तदभावकोटिकशङ्कां प्रति तर्कस्य प्रतिबन्धकत्वं न स्यात् तादृशसंशयविघटकतयैव निरुक्ततर्कस्याऽवश्यकत्वात् । एतच्चाग्रे स्फुटीभविष्यति । न च वह्न्यसमवहिताजन्यत्वस्य पक्षविशेषणत्वमङ्गीकुर्वतामुपाध्यायानां मते आपाद्याभावेन वह्निसमवहितजन्यत्वमात्रेणापि सिद्धिः स्यादिति वाच्यम्, अनुमितेर्व्यापकतावच्छेदकतादृशान्यतरत्वप्रकारकत्वनियमस्यैव स्वीकरणीयत्वात् ।

न चैवं वह्न्यसमवहितजन्यत्वाभाववह्निसमवहितजन्यत्वाभावान्यतरस्यैवापादकत्वमुच्यतामिति वाच्यं, तथा सति तादृशान्यतरस्य केवलान्वयितया तदभावस्याऽपाद्याभावेन धूमादौ सिद्ध्यनुपपत्तेः । न च तथापि वह्न्यसमवहितजन्यत्ववह्निसमवहितजन्यत्वोभयाभावस्यैवापादकत्वे न दोष इति वाच्यं, तादृशोभयाभावस्य धूमादौ सत्त्वेन तदभावस्यापि आपाद्याभावेन तत्र सिद्ध्यसंभवात्, अधिकमभिहितं प्रागिति ध्येयम् ।

टीकायां **यत्तर्केति** । यस्य 'धूमो यदीत्या'दि तर्कस्य कारणीभूतापाद्यव्यतिरेकनिश्चयाद्यनुत्पादप्रयोजकीभूताऽवह्नेरेव भविष्यतीत्यादिसंशयसामान्यमित्यर्थः । **तर्काभावेति** । तादृशशङ्कानुत्पादप्रयोजकत्वेनाभिमतस्य तर्कस्याभावातिरिक्तं यत्तादृशशङ्काकारणं वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानाभावादिरूपं तत्प्रतियोगिकाभावाद् वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानादित एवेत्यर्थः । पञ्चम्यर्थः प्रयुक्तत्वम्, अन्वयश्चास्यानुत्पादरूपानवतारे । एवकारात्तर्कस्य तादृशशङ्काविघटकत्वव्यवच्छेदः । पूर्वं=तादृशतर्काव्यवहितपूर्वकालावच्छे-

"धूमो यदि वह्न्यसमवहितजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यात्"

ैधूम इति॥ । धूमो यदि वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्ववान् स्यात् उत्पन्नत्वाभाववान् स्यादित्यर्थः । विशेदेन । नावतरति=नोत्पद्यते तादृशशङ्कासामान्यमिति पूर्वेणान्वयः उत्पत्त्यभाव एवात्रार्थ इति यावत्, धात्वर्थस्यावतरणस्योत्पत्तिरूपत्वात्, तत्र च नञर्थान्वयबोधानुपपत्त्याभावेऽर्थः । तदन्विताख्यातार्थाश्रयत्वस्य तादृशशङ्कासामान्ये लाभ इति तत्त्वम् ।

नच यत्तर्कविघटकशङ्कासामान्यमित्यत्र सामान्यपदं व्यर्थं, यत्तर्कविघटकशङ्कात्वस्यैव सम्यक्त्वादिति वाच्यं, तदनुपादाने यत्किञ्चिच्छङ्कायास्तर्काभावातिरिक्तकारणप्रतियोगिकाभावान्निवृत्तावपि शङ्कान्तरनिवृत्त्यर्थं तर्कानुसरणेऽनवस्थाया दुर्वारत्वापत्तेस्तत्तर्कविघटकशङ्कात्वव्यापकतर्काभावातिरिक्तकारणप्रतियोगिकाभावप्रयुक्तानुत्पादलाभार्थं सामान्यपदोपादानम् । एतेन यादृशस्थले शङ्काचतुष्टयस्यैव तर्कविघटकत्वं तादृशस्थले शङ्कात्रयस्यापि शङ्कासामान्यपदेनोपादातुं शक्यतया तादृशशङ्कात्रयसामान्यस्य तर्काभावातिरिक्तकारणप्रतियोगिकाभावादनुत्पादेऽपि अपरशङ्कानुत्पादार्थं तर्कान्तरस्यावश्यकत्वे सामान्यपदोपादानेऽपि अनवस्थायाः परिहारो दुर्वार इति पूर्वपक्षोऽपि निरस्तः । न च तर्काभावातिरिक्तत्वं तादृशसंशयकारणविशेषणमनर्थकमिति वाच्यं, तादृशविशेषणानुपादाने तर्काभावस्यापि निरुक्तसंशयकारणतया तत्प्रतियोगिकाभावरूपतर्कात्संशयनिवृत्तावनवस्थायाः परिहारासंभवापत्तेः । न च कारणपदं व्यर्थं, तर्काभावातिरिक्तप्रतियोगिकाभावादेवैतस्यैव सम्यक्त्वादिति वाच्यं तर्काभावातिरिक्तघटप्रतियोगिकाभावप्रयुक्तत्वस्य तादृशशङ्कानुत्पादे बाधात्कारणपदोपादानस्यावश्यकत्वात् । यद्वा कारणपदानुपादाने पुनरनवस्थाप्रसङ्गः स्याद् भेदाभावस्य भेदप्रतियोगिस्वरूपत्वमते तर्कभेदस्यापि तर्काभावातिरिक्ततया तत्प्रतियोगिकाभावात्तर्कादेव संशयानुत्पादस्य आवश्यकत्वात् तर्कप्रयुक्तशङ्कानुत्पादेऽनवस्थायाः कथामात्रेण वारयितुमशक्यत्वादिति ध्येयम् । तर्कभिन्नादेव नावतरतीति कथं नोक्तमित्याशङ्कनमप्ययुक्तं, तर्कभिन्नघटादिप्रयुक्तत्वस्य शङ्कानुत्पादे बाधात् । तर्काभावातिरिक्तकारणाभावादेव नावतरतीत्यनभिधानन्तु यत्किञ्चित्तादृशकारणाभावप्रयुक्तत्वस्य शङ्कानुत्पादे लाभार्थम्, अन्यथा तर्काभावातिरिक्तकारणसामान्याभावस्य तर्कपूर्वमवस्थानमेवासम्भवि स्यात् तर्काभावातिरिक्तसंशयकारणस्य धर्मिज्ञानादेस्तर्कपूर्वं सत्त्वस्यावश्यकत्वादिति ध्येयम् ।

धूमो यदीति । न च वह्न्यसमवहितजन्यत्वाभावविशिष्टवह्निसमवहितजन्यत्वाभावस्यैवापादकत्वसम्भवे उभयत्र भेदपदोपादानं व्यर्थमिति वाच्यम्, अत्यन्ताभावस्याऽव्याप्यवृत्तितामते वह्निशून्यताकालीनवह्निमद्देशोत्पन्नघटादौ व्यभिचारापत्तेः । तादृशघटानधिकरणदेशावच्छेदेन वह्न्यसमवहितजन्यत्वाभावस्य तत्र सत्त्वेन आपादकस्य सत्त्वात् प्रथमभेदपदोपादानस्यावश्यकत्वात् । द्वितीयभेदपदानुपादाने वह्न्यसमवहितजन्यभिन्नेऽप्यालोकादौ वह्निसमवहितजन्यत्वाभावस्यालोकानधिकरणदेशावच्छेदेन सत्त्वात्तत्र मूलशैथिल्यवारणासम्भवात् तदुपादानम् । भेदस्तु न व्याप्यवृत्तिरतो न तत्र तत्र व्यभिचारः । तद-

ष्टान्तं द्वितीयभिन्नत्वविशेषणम् । जन्यं हि जगति वस्तुद्वयं—वह्न्यसमवहितजन्यं, तत्समवहितजन्यञ्च । तत्रायं चेदुभयजन्य एव न स्यात् तदा जन्य एव न स्यादिति भावः ।

ननु नायं वह्निधूमव्याप्तिग्रहोपयोगी, वह्निव्यभिचारित्वापादकतर्कस्यैव तथात्वात् । न चातथात्वेऽपि क्षतिविरह इति वाच्यम् , तादृशवह्निधूमव्याप्तिग्राहकतर्क एवानवस्थाप्रदर्शनादिति चेत्-न 'तस्यापि परम्परया वह्निधूमव्याप्तिग्रहोपयोगित्वात् । तथाहि—धूमो यदि वह्निव्यभिचारी स्यात् , वह्निजन्यो न स्यादिति वह्निधूमव्याप्तिग्राहकस्तर्कः, तत्र च वह्निजन्यत्वरूपापाद्यव्यतिरेकनिश्चयो हेतुः, बाधबुद्धेस्तार्किकबुद्धौ हेतुत्वात् ।

" व्याप्यवृत्तित्वे वह्न्यसमवहितजन्यो यो यः तत्तद्व्यक्तित्वावच्छिन्नभेदकूटविशिष्टस्य वह्निसमवहितजन्यो यो यस्तत्तद्व्यक्तित्वावच्छिन्नभेदकूटस्यापादकत्वसम्भवेन पूर्वोक्तदोषाणां नावकाशः । वस्तुतस्तादृशजन्यत्वस्याखण्डोपाधित्वमते जन्यत्वत्वाद्यप्रवेशकृतलाघवमभिप्रेत्य भेदपदद्वयोपादानम् , अन्यथा तादृशजन्यत्वाभावविशिष्टस्य वह्निसमवहितजन्यत्वाभावस्यापादकत्वे जन्यत्वत्वस्य प्रवेशे महागौरवं स्यादित्यपि वदन्ति ।

विशिष्टान्तं=वह्न्यसमवहितजन्यभिन्नत्वम् । **द्वितीयेति** । वह्निसमवहितजन्यभिन्नत्वविशेषणमित्यर्थः । भावमाह—**जन्यं हीति** । तत्र=जन्याजन्ययोर्मध्ये । अयं=धूमः उभयजन्य एव न स्याद्=वह्न्यसमवहितजन्यवह्निसमवहितजन्य एव न स्यात् । जन्य एव न स्याद्=जन्यत्वाभाववानेव स्यात् । मूलोक्ततर्कस्य वह्निधूमव्याप्तिग्रहोपयोगित्वं प्रदर्शयितुं शङ्कते—**नन्विति** । अयं=मूलोक्ततर्कः । **वह्निव्यभिचारित्वेति** । वह्निव्यभिचारी स्यादित्यादिवक्ष्यमाणतर्कस्यैवेत्यर्थः । तथात्वात्=वह्निधूमव्याप्तिग्रहोपयोगित्वात् । ननु अनवस्थापरिहारप्रदर्शनस्यैवोद्देश्यतया निरुक्ततर्कस्य वह्निधूमव्याप्तिग्रहानुपयोगित्वेऽपि न दोषः निरुक्ततर्कस्यापि तर्कान्तराप्रयोजकतयैवानवस्थापरिहारसम्भवादित्याशङ्कते—**न चेति** । वाच्यमिति परेणान्वयः । समाधत्ते—**तादृशेति** । वक्ष्यमाणे वह्निधूमव्याप्तिग्रहप्रयोजकीभूते तर्क एवेत्यर्थः । **अनवस्थाप्रदर्शनादिति** । चार्वाकमतसिद्धाया अनवस्थायाः प्रदर्शनादित्यर्थः । नन्वित्यादेरुत्तरम्—**इति चेन्नेति** । तस्यापि=धूमो यदीत्यादिमूलोक्ततर्कस्यापि । निरुक्ततर्कस्य वह्निधूमव्याप्तिग्रहोपयोगित्वं प्रदर्शयति—**तथा हीति** । धूमो वह्निव्याप्य इत्याकारकव्याप्तिग्रहे धूमो वह्निव्यभिचारी नवेति संशयः प्रतिबन्धकः, तादृशसंशयरूपप्रतिबन्धकनिवृत्तिस्तु 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्याकारकतर्केण भवति । एवञ्च निरुक्ततर्कस्यैव तादृशव्यभिचारसंशयानुत्पादद्वारा वह्निधूमव्याप्तिग्राहकत्वं, तादृशतर्के वह्निजन्यत्वाभावाभाववह्निजन्यत्वरूपापाद्यव्यतिरेकनिश्चयो हेतुः, बाधनिश्चयस्य तर्कं प्रति जनकत्वात् । तादृशवह्निजन्यत्वनिश्चये स्वातन्त्र्येण संशयसामग्रीसम्पादकतया वा 'धूमो वन्हिजन्यो न वे'त्याकारकसंशयः प्रतिबन्धकः । निरुक्तसंशयं प्रति तु 'धूमो यदि वह्न्यसमहिते'त्यादितर्कस्य वन्हिजन्यत्वनिश्चयं सम्पाद्य प्रतिबन्धकत्वम् । तथा च निरुक्तमूलोक्ततर्केण वन्हिजन्यत्वनिश्चयस्ततस्तादृशनिश्चयाद् धूमो वन्हिजन्यो न वेत्याकारकशङ्काया अनुत्पादः । तादृशशङ्कानुत्पादात् पूर्वोक्तवह्निजन्यत्वनि-

तस्मिंश्चान्वयव्यतिरेकाभ्यां प्रत्यक्षेण वह्निजन्यत्वनिर्णये व्यभिचारशङ्का विरोधिनी संशयसामग्रीसम्पादकत्वात्, तच्छङ्काविरोधी चायं तर्क इति । अत्र च वह्निशून्यत्वदशायां वह्निमद्देशोत्पन्ने घटादौ मूलशैथिल्यवारणाय विशिष्टान्तं द्वितीयभिन्नत्वविशेषणम् । तत्प्रतियोगिविशेषणत्वे तद्दोषतादवस्थ्यात् । वह्निं विनानुत्पद्यमानत्वं तदर्थः ।

श्चयरूपापाद्यव्यतिरेकनिश्चयेन धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादित्याकारकः, एतादृशतर्केण व्यभिचारशङ्कानिवृत्तिस्ततो निरङ्कुशेन वह्निधूमव्याप्तिग्रहस्तथा च तर्कस्य परम्परया वन्हिधूमव्याप्तिग्राहकत्वं निर्विवादमित्येवं 'तच्छङ्काविरोधी चायं तर्कः' इत्यन्तसमुदितग्रन्थतात्पर्यम् ।

वह्न्यसमवहितजन्यभिन्नत्वरूपसत्यन्तार्थस्यानुपादाने केवलवह्निसमवहितजन्यभिन्नत्वस्यापादकत्वे वह्निशून्यतादशायां वह्निमति देशे समुत्पन्ने घटविशेषे व्यभिचारः वह्निसमवहितजन्यभिन्नत्वरूपापादकस्य तत्र सत्त्वेन तत्रोत्पन्नत्वाभावरूपापाद्यस्य विरहादतो विशिष्टान्तं, तदुपादाने तु न तत्र व्यभिचारः, वह्न्यसमवहितजन्यत्वस्यैव तादृशघटविशेषे सत्त्वेन वह्न्यसमवहितजन्यभिन्नत्वरूपविशेषणाभावाद्विशिष्टापादकस्य तत्र विरहात् । आपादकवति आपाद्याभावसत्त्वेनैव व्यभिचारस्याऽवश्यकत्वादित्याह—**अत्रचेति** । निरुक्तापादके चेत्यर्थः । घटकत्वं सप्तम्यर्थः, अन्वयश्चास्य विशिष्टान्तमित्यनेन । वह्निसत्त्वदशायां वह्निमद्देशोत्पन्नघटादौ वह्निसमवहितजन्यभिन्नत्वविरहाद्विशिष्टान्तव्यावृत्तिर्न सम्भवतीत्यतो वह्निशून्यतादशायामित्युक्तम् । **मूलशैथिल्येति** । व्यभिचारवारणायेत्यर्थः । विशिष्टान्तं = वह्न्यसमवहितजन्याभिन्नत्वविशिष्टान्तम् । **द्वितीयेति** । वन्हिसमवहितजन्यभिन्नत्वविशेषणमित्यर्थः ।

ननु वह्न्यसमवहितजन्यभिन्नत्वस्य सामानाधिकरण्यसम्बन्धेन द्वितीयभिन्नत्वविशेषणत्वापेक्षया लाघवात्स्वरूपसम्बन्धेन द्वितीयभिन्नत्वप्रतियोगिवह्निसमवहितजन्यविशेषणत्वमेव समुचितमित्यत आह—**तत्प्रतियोगीति** । वह्निसमवहितजन्यभिन्नत्वप्रतियोगिवह्निसमवहितजन्यविशेषणत्व इत्यर्थः । **तद्दोषेति** । तादृशघटविशेषादौ व्यभिचारतादवस्थ्यादित्यर्थः । तथा च वह्न्यसमवहितजन्यभिन्नत्वविशिष्टं यद् वह्निसमवहितजन्यं तद्भिन्नत्वस्यापादकत्वे वह्निशून्यताकालीनवह्निमद्देशोत्पन्नघटादौ व्यभिचारः वह्न्यसमवहितजन्यनिरुक्तघटभिन्नं यद्वह्निसमवहितजन्यं नान्तरीयकं घटादिकं तद्भिन्नत्वरूपापादकस्य निरुक्तघटविशेषे सत्त्वेन तत्रोत्पन्नत्वाभावरूपापाद्यस्यासत्त्वात्, अतो वह्नसमवहितजन्यभिन्नत्वं सामानाधिकरण्यसम्बन्धेन वह्निसमहितजन्यभिन्नत्वस्यैव विशेषणमिति भावः । ननु वह्न्यसमहितजन्यभिन्नत्वं यदि वह्न्यभाववद्देशोत्पत्तिकान्यत्वं तदा पूर्वोक्तघटविशेषे व्यभिचारो दुर्वारः वह्न्यभाववद्देशोत्पत्तिकान्यत्वस्य वह्निसमवहितजन्यभिन्नत्वस्य च तत्र सत्त्वेन विशिष्टापादकस्य तत्र सत्त्वादत आह—**वह्निं विनेति** । वह्निं विनोत्पद्यमानं यत्तदन्यत्वमित्यर्थः । तदर्थः = विशिष्टान्तदलस्यार्थः । तथा च वह्निं विनोत्पद्यमानभिन्नत्वस्य निरुक्तघटे विरहाद्विशेषणाभावेन विशिष्टापादकस्य तत्र सत्त्वं सम्भावितमपि नास्तीत्याशयः ।

स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकं यद्यत्तदन्यत्वमिति तु निष्कर्षः। स्वपदं = अन्यत्वप्रतियोगिपरम्।

अन्यथा इदानीन्तनघटादेः सामग्रीकालेऽपि कुत्रचिद्देशे वह्निसत्त्वेन मूलशैथिल्यतादवस्थ्यात्, महाप्रलये मानाभावात् खण्डप्रलयेऽपि

नन्वेवमपि महाप्रलयानभ्युपगन्तृमते तादृशवह्निं विनोत्पद्यमानभिन्नत्वमप्रसिद्धं सर्वस्यैव जन्यवस्तुनः पूर्वक्षणे कुत्रचिद्देशे वह्निसत्त्वात्, अत आह-**स्वसमानाधिकरणेति**। स्वाधिकरणे वर्तमानो यो वह्निस्तदन्यत्ववत्स्वाऽव्यवहितपूर्वक्षणं यस्य स्वस्य एवम्भूतं यद्यत्स्वं तदन्यत्वं वह्न्यसमवहितजन्यभिन्नत्वमित्यर्थः। अत एवोक्तं स्वपदमन्यत्वप्रतियोगिपरमिति। एतादृशं स्वं वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादिकमेव। तादृशघटाव्यवतिपूर्वक्षणस्य तादृशघटादिसमानाधिकरणवह्निमदन्यत्वादिति तादृशस्वात्मकघटादिभेदस्य तत्र विरहेण विशेषणदलस्य तादृशघटादावसत्त्वं बोध्यमतो न तत्र व्यभिचारः। वह्निव्यधिकरणघटादौ व्यभिचारस्तु स्वयमेवाग्रे वारयिष्यते। अत्र स्वसामानाधिकरण्यं वह्नावुपलक्षणविधयैव वक्तव्यम्, अन्यथा वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादेरधिकरणे वह्न्यसत्त्वेन तस्य स्वपदेन धर्त्तुमशक्यतया तत्र व्यभिचारतादवस्थ्यं स्यादिति ध्येयम्।

वह्नौ स्वसामानाधिकरण्यनिवेशव्यावृत्तिमाह—**अन्यथेति**। स्वसामानाधिकरण्यानिवेश इत्यर्थः। इदानीन्तनघटादेः = अधुना वह्निमद्देशोत्पन्नघटादेः, नतु वह्न्यधिकरणघटादेः, वह्निव्यधिकरणघटादौ आपादकसत्त्वेऽपि वक्ष्यमाणवह्निसमानाधिकरणत्वविशिष्टोत्पन्नत्वस्याभावस्यापाद्यस्य तत्र सत्त्वेन व्यभिचारवारणसम्भवात् स्वसामानाधिकरण्यदलव्यावृत्तेस्तत्रासङ्गतत्वापत्तेः। सामग्रीकाले=तादृशघटादेः सामग्रीमति स्वाव्यवहितपूर्वक्षणे। कुत्रचिद्देशे=देशान्तरे वह्निसत्त्वेन=तादृशघटाद्यव्यवहितपूर्वक्षणस्य वह्निमत्त्वेन। **मूलशैथिल्यतादवस्थ्यादिति**। व्यभिचारतादवस्थ्यादित्यर्थः। तथा च स्वसामानाधिरण्यस्य वह्नावविवक्षणे वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादौ व्यभिचारः वह्निमदन्यस्वाव्यहितपूर्वक्षणकं न तादृशघटादिकं भवितुमर्हति तादृशघटाद्यव्यवहितपूर्वक्षणस्य कुत्रचिद्देशे वह्निसत्त्वेन वह्निमत्तया वह्निमदन्यत्वविरहात्। अपितु महाप्रलय एव तादृशं स्वं, तदव्यवहितपूर्वक्षणस्य वह्निमदन्यत्वात्। एवञ्च वह्निमदन्यस्वाव्यवहितपूर्वक्षणको यो महाप्रलयस्तदन्यत्वस्य वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादौ सत्त्वेन वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्वरूपविशिष्टापादकवति तादृशघटे उत्पन्नत्वाभावरूपापाद्यविरहाद् व्यभिचारस्तादृशवह्नौ स्वसामाधिकरण्यनिवेशे तु स्वपदेन निरुक्तघटस्यैव धर्त्तुं शक्यतया न तत्र व्यभिचार इति भावः।

ननु महाप्रलयासत्त्वपक्षे स्वपदेन महाप्रलयोपादानासम्भवान्न तादृशघटे व्यभिचार इत्यत आह—**महाप्रलय इति**। **मानाभावादिति**। नव्यनैयायिकैर्युगपद्ब्रह्माण्डानां प्रलयो नाभ्युपगम्यत इति भावः। ननु तथापि खण्डप्रलयस्य नव्यनैयायिकाऽसम्मततया स्वपदेन खण्डप्रलयमादायैव तादृशघटविशेषे व्यभिचारः संभवतीत्यत आह-**खण्डप्रल-**

ब्रह्माण्डान्तरे वह्निसत्त्वात् सामग्रीमात्रस्यैव वह्न्यधिकरणक्षणवृत्तित्वे-नाप्रसिद्धिप्रसङ्गाच्च । न तु वन्ह्यघटितसामग्र्यजन्यत्वं तत्, धूमे प्राक् तदनिश्चयात्, आपाद्याभावेनापादकाभावसाधने विशेष्यविर-हप्रकारकसिद्ध्यर्थं तन्निश्चयस्यापेक्षितत्वात् । वह्न्यसमवहितजन्ये

येऽपीति । **ब्रह्माण्डान्तरे वह्निमत्त्वादिति** । तथा च तत्पूर्वक्षणस्यापि वह्निमत्त्वात् स्वपदेन तस्यापि ग्रहणं न सम्भवतीति हृदयम् । **सामग्रीमात्रस्यैवेति** । जन्यजातस्ये-त्यादिः । **वह्न्यधिकरणेति** । जन्यजातवस्तुनः सामग्र्यधिकरणस्य वन्हिमत्त्वेन सर्व-स्यैव पूर्वक्षणस्य वन्हिमत्त्वादित्याशयः । **अप्रसिद्धिप्रसङ्गाच्चेति** । वह्निमदन्यत्वाव्यवहि-तपूर्वक्षणकत्वस्य कुत्रापि जन्येऽप्रसिद्धतया तादृशक्षणकान्यत्वरूपवह्न्यसमवहितजन्य भिन्नत्वस्याऽप्रसिद्धेरिति भावः । न च स्वसामानाधिकरण्यमनिवेश्य स्वाधिकरणदेशाव-च्छिन्नवन्हिमदन्यत्वमेव वन्ह्यसमवहितजन्यभिन्नत्वमस्तु तावतैव तादृशघटविशेषे व्यभिचारवारणं सम्भवतीति वाच्यं, भेदस्य व्याप्यवृत्तितया तादृशवन्हिमदन्यत्वे स्वाधि-करणदेशस्याऽवच्छेदकत्वाऽसम्भवात् । न च तथापि स्वाधिकरणदेशावच्छिन्नवन्ह्य-भाववत्स्वाव्यवहितपूर्वक्षणकान्यत्वमेव तादृशविशिष्टान्तमिति वाच्यं, तथा सति गौरवाद् यथासन्निवेशे वैयर्थ्याभावाच्च । ननु लाघवाद् वह्न्यघटितसामग्रीजन्यभिन्नत्वमेव वन्ह्यसमवहितजन्यमत्वमस्तु वन्हिशून्यतादशायां वन्हिमद्देशोत्पन्नघटादे वह्न्यघ-टितसामग्रीजन्यतयैव तादृशसामग्रीजन्यभिन्नत्वविरहेण तत्रापादकविरहादेव व्यभिचा-रवारणसम्भवादित्यत आह—**ननु वह्न्यघटितेति** । वन्ह्यघटितसामग्रीजन्यं यत्तद्भि-न्नत्वमित्यर्थः । तत्=वन्ह्यसमवहिताजन्यत्वम् । निषेधे हेतुमाह—**धूम इति** । प्राक्=वन्हिनिष्ठधूमकारणतानिश्चयात् पूर्वम् । वन्हौ धूमकारणत्वसन्देहे धूमसामग्र्यां वन्ह्यघटितत्वसंदेहस्याऽवश्यकत्वे धूमे वन्ह्यघटितसामग्र्यजन्यत्वस्यापि सन्दिग्धत्वादिति भावः । ननु तर्कपूर्वं धूमे वन्ह्यघटितसामग्र्यजन्यत्वरूपविशेषणवत्तानिश्चयस्याऽसत्त्वे का क्षतिरित्यत आह—**तदनिश्चयादिति** । निरुक्ततर्कपूर्वं धूमे वन्ह्यघटितसामग्र्यजन्य-त्वरूपविशेषणवत्त्वस्यानिश्चयादित्यर्थः । आपाद्याभावेन=उत्पन्नत्वाभावाभावेनोत्पन्नत्वेन । आपादकाभावसाधने=निरुक्तवह्न्यसमवहितजन्यभिन्नत्वविशिष्टवन्हिसमवहितजन्यभिन्न त्वाभावसाधने । **विशेष्येति** । केवलविशेष्यीभूतवन्हिसमवहितजन्यभिन्नत्वाभावप्रकार-कानुमित्यर्थमित्यर्थः । तन्निश्चयस्य=वन्ह्यघटितसामग्र्यजन्यत्वरूपविशेषणवत्तानिश्चय-स्य । **अपेक्षितत्वादिति** । आपाद्याभावेनापादकाभावस्य यस्य सिद्धिर्भवति तदभा-वकोटिकसंशयं प्रति तर्को विरोधीति नियमः । एवञ्च धूमे तर्कात्पूर्वं यदि वन्ह्यसमवहि-ताजन्यत्वस्य निरुक्तस्य निश्चयो न भवति तदा उत्पन्नत्वरूपापाद्याभावेन केवलवन्हिसम-वहितजन्यभिन्नत्वाभावस्य वन्हिसमवहितजन्यत्वस्य सिद्धिर्न भवितुमर्हति, तस्याऽसिद्धौ च निरुक्तमूलोक्ततर्केण वन्हिसमवहितजन्यत्वाभावरूपवन्हिजन्यत्वाभावकोटिकसंशयस्यानु-त्पादासम्भवे तेन संशयेन वन्हिजन्यत्वनिश्चयप्रतिबन्धसम्भवात्तादृशनिश्चयानुत्पत्तौ आ-पाद्यव्यतिरेकनिश्चयाभावेन धूमो यदि वन्हिव्यभिचारी स्याद वन्हिजन्यो न स्यादि त्यादितर्कानुत्पत्तौ वन्हिधूमव्याप्तिग्रह एव न स्यादिति हृदयम् ।

वन्हिसमवहितजन्यभिन्नत्वरूपविशेष्यदलव्यावृत्तिमाह—**वह्न्यसमवहितेति** ।

वह्निजन्यालोकादौ मूलशैथिल्यवारणाय विशेष्यदलम्। न च चरमसमवहितपदं व्यर्थं वह्निजन्यत्वाभावस्यैव सम्यक्त्वादिति वाच्यम्; वह्न्यजन्ये वह्निसमवधाननियतोत्पत्तिके घटादिविशेषे मूलशैथिल्यापत्तेः। वह्निसमवहितजन्यत्वञ्च वह्निकालीनसामग्रीजन्यत्वम् स्वसमानाधिकरणव-

---

स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितपूर्वक्षणान्य इत्यर्थः। **वह्निजन्येति**। आलोकादौ वह्निजन्यत्वमुक्त्वा आलोकपूर्वक्षणस्य वन्हिमत्त्वं सूचितम्, तेन विशेषणदलसत्त्वमालोकादौ स्फुटीकृतम्। स्वसमानाधिकरणवन्हिमदन्येत्यादौ स्वपदेनालोकस्य धर्तुमशक्यत्वादिति भावः। मूलशैथिल्यवारणाय=व्यभिचारवारणाय। **विशेष्यदलमिति**। तथा च वन्हिसमवहितजन्यभिन्नत्वरूपविशेष्यदलानुक्तौ केवलवन्ह्यसमवहिताजन्यत्वस्य यथोक्तस्यापादकत्वे वन्हिजन्यालोकादौ व्यभिचारः स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितपूर्वक्षणकं यत्तादृशवन्हिमद्देशोत्पत्तिकघटादिकं तदन्यत्त्वस्य तत्र सत्त्वेनोत्पन्नत्वाभावरूपापाद्यस्य तत्र विरहात्। विशेष्यदलोक्तौ तु न वन्हिजन्यालोकादौ व्यभिचारः तत्र वन्हिसमवहितजन्यत्वस्यैव सत्त्वेन तद्भिन्नत्वविरहेण विशिष्टापादकस्यालोकादौ विरहादित्याशयः। ननु वन्ह्यसमवहितजन्यभिन्नत्वघटकासमवहितप्रतियोगिसमवहितपदानुपादाने वन्ह्यघटितसामग्र्यजन्यत्वनिवेशे पूर्वदोषस्याभिहितत्वेऽपि चरमं वन्हिसमवहितजन्यभिन्नत्वघटकसमवहितपदं व्यर्थं वन्हिजन्यभिन्नत्वस्यैव तादृशविशेषणविशिष्टस्यापादकत्वसम्भवेन सामञ्जस्यादित्याशङ्कते—**नचेति**। वाच्यमितिपरेणान्वयः। **वह्निजन्यत्वेति**। वन्हिजन्यभिन्नत्वस्यैव वन्हिजन्यत्वाभावरूपत्वादिति भावः। वह्निजन्यत्वाभावस्य स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वविशिष्टस्यापादकत्वे यादृशघटस्य पूर्वक्षणे वह्निसत्त्व एवोत्पत्तिस्तादृशवन्हिनान्तरीयके घटे व्यभिचारः तत्र विशेषणदलस्य वन्हिजन्यत्वाभावरूपविशेष्यदलस्यापि सत्त्वेनापादकसत्त्वादापाद्यस्योत्पन्नत्वाभावस्य तत्र विरहादतो वन्हिजत्वाभावस्य विशेष्यदलत्वं परित्यज्य वन्हिसमवहितजन्यभिन्नत्वस्यापादकत्वं वक्तव्यम्। उक्तघटे तु वन्हिसमवहितजन्यत्वस्य सत्वेन तादृशजन्यभिन्नत्वस्याऽसत्त्वान्न व्यभिचार इति समाधत्ते-**वह्न्यजन्य इति**। वन्हिजन्यत्वाभाववतीत्यर्थः। तादृशनान्तरीयकघटस्य पूर्वक्षणे वन्हिसत्त्वेऽपि तस्य वन्ह्यजन्यत्वमक्षतमिति हृदयम्। **वह्निसमवधानेति**। वन्हिमत्स्वाव्यवतिपूर्वक्षणकघटादिविशेषइत्यर्थः।

ननु वन्हिसमवहितजन्यत्वं यदि वन्हिकालीनसामग्रीजन्यत्वं तदा जन्यमात्रस्यैव सामग्रीक्षणे वन्हिसत्त्वेन वन्हिकालीनसामग्रीजन्यतया धूमादावपि वन्हिकालीनसामग्रीजन्यत्वनिश्चयसम्भवात्तर्कवैफल्यं स्यात् विशेष्याभावमात्रस्य धूमादौ निश्चयार्थमेव निरुक्ततर्कस्याऽवश्यकत्वादित्याशयेनाह—**स्वसमानाधिकरणेति**। स्वं जन्यत्वेनाभिमतम्, तादृशजन्यव्यक्तिरूपस्वसमानाधिकरणो यो वन्हिस्तद्वत् स्वाव्यवहितपूर्वक्षणं यस्य स्वस्य तादृशं स्वं वह्निसमवहितजन्यं, तद्भिन्नत्वमेव विशेष्यदलं पर्यवसितम्। तथा च धूमो यदि स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वविशिष्टस्वसमानाधिकरणवन्हिमत्स्वाव्यवहितपूर्वक्षणकान्यत्ववान् स्यात् तदोत्पन्नत्वाभाववान् स्यादित्येव

ह्निमत्स्वाव्यवहितपूर्वक्षणकत्वमिति तु निष्कर्षः । अन्यथा इदानीन्तनजन्यमात्रस्यैव वह्न्यधिकरणक्षणवृत्तिसामग्रीजन्यतया पक्षीभूतधर्मेऽपि तादृशसामग्रीजन्यत्वनिश्चयसत्त्वेन तर्कवैफल्यापत्तेः । न तु वह्निघटितसामग्रीजन्यत्वं तत्, तथा सति वह्न्यजन्ये वह्निसमवधाननियतोत्पत्तिकघटादिविशेषे मूलशैथिल्यापत्तेः ।

वह्निसमानाधिकरणत्वे सतीत्यनेन चापाद्यप्रतियोगी विशेषणीयस्तेन वह्निव्यधिकरणे वह्निजन्यरूपादौ वह्निव्यधिकरणे घटादौ च न मूलशैथि-

---

तर्क आदरणीय इति भावः । वह्नौ स्वसामानाधिकरण्यनिवेशव्यावृत्तिमाह—अन्यथेति । स्वसामानाधिकरण्यानिवेशे इत्यर्थः । **इदानीन्तनेति** । कुत्रचिद्देशे वह्निमत्त्वेनेत्यादिः । **तर्कवैफल्यापत्तेरिति** । तथा चोक्ततर्कस्य वह्निसमवहितजन्यत्वनिश्चयप्रयोजकतया तर्कपूर्वं तादृशनिश्चयस्य स्वभावत एव धूमादौ सत्त्वेन निरुक्ततर्कानुसरणमनुचितमिति भावः । ननु वह्निघटितसामग्रीजन्यत्वमेव वह्निसमवहितजन्यत्वमस्तु किं निरुक्तरीत्या गुरुतरनिवेशेनेत्यत आह—**नत्विति** । तथा च वह्निघटितसामग्रीजन्यभिन्नत्वस्य विशेष्यदलस्वरूपत्वे वह्निनान्तरीयकघटे व्यभिचारः तत्र वह्निघटितसामग्रीजन्यभिन्नत्वस्य सत्त्वात्, आपाद्यस्योत्पन्नत्वाभावस्य तत्र विरहात । स्वसमानाधिकरणवह्निमत्स्वाव्यवहितपूर्वक्षणकान्यत्वस्य विशेष्यदलार्थस्य तादृशे घटे सत्त्वमेव न संभवति स्वपदेन तादृशघटस्यैवोपादातुं शक्यत्वान्न तादृशघटे व्यभिचार इत्याशयः । नन्वेवं वह्निव्यधिकरणे घटे व्यभिचारस्तस्य स्वपदेन धर्तुमशक्यतया स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वेन स्वसमानाधिकरणवह्निमत्स्वाव्यवहितपूर्वक्षणकान्यत्वेन चापादकवत्त्वात् तत्र चोत्पन्नत्वाभावरूपापाद्यविरहात् । एवं वह्निजन्यरूपादावपि व्यभिचारः तादृशरूपसमानाधिकरणत्वस्य वह्नौ विरहेण तस्यापि स्वपदेनोपादातुमशक्यत्वादित्यत आह—**वह्निसमानेति** । वह्न्यधिकरणवृत्तित्वविशिष्टत्वे सतीत्यर्थः । आपाद्यप्रतियोगी=उत्पन्नत्वम् । **विशेषणीय इति** । वह्न्यधिकरणवृत्तित्वविशिष्टस्योत्पन्नत्वस्याऽभावस्यैवापाद्यत्वमिति हृदयम् । **न मूलशैथिल्यमिति** । तथा च न वह्निव्यधिकरणघटादौ व्यभिचारः तत्र यथोक्तापादकस्य सत्त्वेऽपि वह्न्यधिकरणवृत्तित्वविशिष्टोत्पन्नत्वाभावरूपापाद्यस्यापि तत्र सत्त्वात् । आपादकवत्यापाद्याभावसत्त्वेनैव व्यभिचारः संभवतीति भावः ।

केचित्तु स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वस्य सत्यन्तार्थत्वमनुक्त्वा लाघवात्स्वसमानाधिकरणवह्निमदन्यस्वोत्पत्तिकक्षणकान्यत्वस्य तथात्वाभिधानेनैव वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादौ व्यभिचारवारणं संभवति तादृशघटे स्वसमानाधिकरणवह्निमदन्यस्वोत्पत्तिक्षणकान्यत्वविरहेण आपादकस्यैव तत्राऽसत्त्वादिति पूर्वपक्षयन्ति । तन्न, यदीयसम्बन्धसामान्ये यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्ति तस्य तत्समयसम्बन्धः उत्पत्तिरित्यस्यैव स्वोत्पत्तिपदार्थतया वक्तव्यतया तस्याः स्वाधिकरणसमयप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति स्वाधिकरणसमयप्रागभावाधिकरणत्वरूपस्वाव्यवहितप्राक्क्षणत्वापेक्षया गुरुत्वात् । किञ्च स्वसमानाधिकरणवह्निमदन्यस्वोत्पत्तिक्षणकान्यत्वस्य सत्यन्तार्थत्वे यादृशघटस्य पूर्वक्षणे वह्निर्नास्ति किन्तु स्वोत्पत्तिक्षणएव

वह्निवर्तने तादृशघटविशेषे व्यभिचारस्तत्र स्वसमानाधिकरणवह्निमदन्यस्वोत्पत्तिक्षणको यो वह्निशून्यताकालीनवह्निमद्देशोत्पन्नो घट स्तदन्यत्वस्य स्वसमानाधिकरणवह्निमत्स्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्निसमवहितजन्यभिन्नत्वस्य च सत्त्वेन आपादकसत्त्वात्तत्र च निरुक्तापाद्यस्योत्पन्नत्वाभावस्य विरहात् । यद्यपि स्वसमानाधिकरणवन्हिमत्स्वोत्पत्तिक्षणकान्यत्वमेव वन्हिसमवहितजन्यभिन्नत्वं, तथा च नोक्तघटे व्यभिचारः तस्य वन्हिमत्स्वोत्पत्तिक्षणकत्वेन स्वसमानाधिकरणवन्हिमत्स्वोत्पत्तिक्षणकान्यत्वविरहादापादकसत्त्वमेव तादृशघटे न संभवतीति विभाव्यते, तदापि नव्यमते निरुक्तघटे व्यभिचारो दुर्वार एव तन्मते आपाद्यप्रतियोग्युत्पन्नत्वस्यैव विशेषणतायाः सत्यन्ते वक्तव्यतया स्वसमानाधिकरणवन्हिमदन्यस्वोत्पत्तिक्षणकान्यत्वविशिष्टोत्पन्नत्वस्यैव यथोक्तघटे सत्त्वेन निरुक्तोत्पन्नत्वाभावस्य तादृशघटे विरहात् । न च नव्यमते तादृशस्वोत्पत्तिक्षणकान्यत्वं न सत्यन्तार्थः । अपि तु तादृशवन्हिमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वमेव तथेति वाच्यं पूर्वाभिहितसत्यन्तार्थस्यैव नव्यमतेऽपि मथुरानाथाभिमतत्वाद् अन्यथा 'तदर्थश्चोक्त एवे' त्यादिग्रन्थस्याऽलग्नतापत्तिः स्यात् । एतेन सत्यन्तार्थस्य तादृशस्वोत्पत्तिक्षणकान्यत्वस्वरूपत्वे अवह्नेरेव भविष्यतीत्यादिशङ्कायास्तादृशस्वाव्यवहितप्राक्क्षणकान्यत्वमंशयस्वरूपतया तस्या निरुक्तसत्यन्तदलप्रतिबन्धकता न संभवतीत्यतः सत्यन्तार्थोऽपि तादृशस्वाव्यवहितप्राक्क्षणकान्यत्वरूप एव वाच्यः निरुक्तसंशयादेः स्वसमानाधिकरणवन्हिमदन्यस्वोत्पत्तिक्षणकान्यत्वकोटिकत्वे 'तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकमित्या'दिमूलग्रन्थस्यासंगतिः स्यादित्यादि केषाञ्चित्तादृशपूर्वपक्षोत्तरमनुत्तरतयैवास्माभिरुपेक्षणीयमित्यलं पल्लवितेन ।

अथ तर्ककारणयोः पक्षे आपाद्यव्यतिरेकनिश्चयाऽपाद्यव्याप्यापादकवत्तानिश्चययोर्युगपत्समावेशो न संभवति आपाद्यव्यतिरेकप्रकारकबुद्धौ आपाद्यव्याप्यवत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयमुद्रया प्रतिबन्धकत्वादिति चेन्न, बाधनिश्चयवत् तदभावव्याप्यवत्तानिश्चयस्य कार्यसहभावेन प्रतिबन्धकतायाः सर्वाऽसम्मततया तर्कपूर्वमापाद्यव्यतिरेकविषयकसमूहालम्बनापाद्यव्याप्यनिश्चयोत्पत्तिसंभवादिति वदन्ति । यत्तु प्रथममापाद्यव्यतिरेकनिश्चयस्ततस्तादृशव्याप्यवत्ताज्ञानं ततस्तर्क इतिमतं तत्तुच्छं, तर्कपूर्वक्षणे आपाद्यव्यतिरेकनिश्चयसत्त्वे तादृशकारणयोरनाहार्यत्वाऽसंभवात् । केचित्तु आहार्यात्मकतादृशकारणसम्वलनात्तर्क उत्पद्यते तर्ककारणेऽनाहार्यत्वस्यानपेक्षितत्वादित्याहुः ।

नन्वेवमपि आपादके आपाद्यव्याप्यतया आवश्यकतया आपाद्याभावे ऽपि आपादकाभावव्याप्यत्वं निर्विवादमिति तर्कपूर्वमवस्थितस्यापाद्यव्यतिरेकनिश्चयस्यापादकाभावव्याप्यवत्तानिश्चयमुद्रयैवापादककोटिकसंशयप्रतिबन्धकत्वसंभवे तादृशसंशयनिवृत्तिफलकस्य तर्कस्य वैफल्यं स्याद् आपाद्याभावे आपादकाभावव्याप्यत्वग्रहस्याऽनियमेऽपि तर्ककारणापाद्यनिष्ठापादकव्यापकतानिश्चयसहितस्यापाद्यव्याप्यप्रकारकनिश्चयस्यापादककोटिकसंशयप्रतिबन्धकताया वारयितुमशक्यत्वादिति चेन्न, तादृशापाद्यव्यतिरेकनिश्चयनाशकाले तन्मूलकमानसाऽपाद्यव्यतिरेकज्ञानं यादृशस्थले न संभवति तादृशस्थले तर्कसत्त्वदशायां संशयप्रतिबन्धार्थं तर्कस्यावश्यकत्वात् । न च धूमे वह्निसमवहितजन्यत्वनिश्चयस्य सत्त्वे तत एव तत्र वन्हिव्याप्यत्वस्यानुमितत्वसंभवे कार्यकारणभावनिश्चयो निरुक्ततर्कजन्यो निरर्थक इति वाच्यं यादृशघटविशेषस्य स्वाव्यवहितपूर्वक्षणावच्छिन्नवन्हिमति तच्छून्ये चोत्पत्ति-

त्वम् । न च पक्षतावच्छेदकविशिष्ट आपाद्याभावेनापादकाभावसाधने नियमतो यद्धर्मावच्छिन्नं सिद्ध्यति तद्धर्मावच्छिन्नाभावकोटिकसंशयं प्रत्येव तर्का विरोधीतिनियमः, प्रकृते तु धूमे उत्पन्नत्वाभावाभावेनोत्पन्नत्वेन वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्याभिन्नत्वस्यापादकीभूतस्याभावसाधने वह्निजन्यभिन्नत्वाभावरूपस्य विशेष्याभावस्य नासिद्धिः विशिष्टाभावस्यातिरिक्तस्यैव सिद्धेस्तथा च कथमस्य वह्निजन्यत्वाभावकोटिकसंशयविरोधित्वमिति वाच्यम्; विशिष्टाभावस्य विशेषणविशेष्याभावानतिरिक्ततया वह्निजन्यभिन्नत्वाभावरूपस्य विशेष्याभावस्य सिद्धेः ।

वह्निसमवहितजन्यत्ववति तादृशघटविशेषे वह्निव्याप्यत्वविरहेण व्यभिचाराद् वह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वानुमापकत्वाऽसंभवात् । वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वानुमापकत्वमपि नाशङ्कनीयं निरुक्तविशिष्टस्य व्यर्थविशेषणघटिततया तादृशव्याप्यत्वानुमापकत्वाऽसम्भवाद् वन्ह्यसमवहिताजन्यत्वविशिष्टजन्यत्वस्यापि हेतुत्वौचित्यादिति तु विभावनीयमिति दिक् ।

शङ्कते—न चेति । वाच्यमिति परेणान्वयः । पक्षतेति । तथा च धूमो यदि वन्हिव्यभिचारी स्याद् वन्हिजन्यो न स्यादित्यादौ सर्वत्र तर्के पक्षतावच्छेदकधूमत्वादिविशिष्टे आपाद्याभावेन वन्हिजन्यत्वाभावाभावेन वन्हिजन्यत्वादिना वन्हिव्यभिचारित्वाभावाद्यनुमितौ नियमतो वह्निव्यभिचारित्वाभावाद्यवच्छिन्नस्यैव विधेयतया तदवच्छिन्नाभावकोटिक 'धूमो वह्निव्यभिचारी न वे' त्याकारकसंशयं प्रत्येव पूर्वोक्ततर्कादेः प्रतिबन्धकत्वमिति नियमः । निरुक्तमूलोक्ततर्कस्थले तु तादृशनियमो न घटते उत्पन्नत्वाभावाभावेन आपाद्याभावरूपोत्पन्नत्वेन वन्ह्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्वाभावरूपापादकाभावस्याऽनुमितौ वह्निजन्यभिन्नत्वाभावत्वावच्छिन्नस्य विधेयत्वाऽसम्भवाद्विशिष्टाभावत्वावच्छिन्नस्यैव तत्र विधेयतया धूमो वह्निजन्यभिन्नत्वाभाववान् न वेत्याकारकशङ्काप्रतिबन्धकत्वमुक्ततर्कस्य न संभवति वह्निजन्यभिन्नत्वाभावकोटिकशङ्काप्रतिबन्धार्थमेव निरुक्ततर्कस्यादरणीयत्वात् । अन्यथा पूर्वोक्तरीत्या निरुक्ततर्केण वन्हिजन्यत्वाऽनिश्चये धूमो वन्हिव्यभिचारी स्यादित्यादितर्कानुत्थितौ वन्हिधूमव्याप्तिग्रहासम्भवेन मूलोक्ततर्कस्य तादृशव्याप्तिग्रहोपयोगित्वं न स्यात्, परन्तु मूलोक्ततर्केण विशिष्टाभावकोटिकशङ्काया एवाऽनुत्पादः स्यादितिशङ्काग्रन्थाभिप्रायः । समाधत्ते—विशिष्टेति । वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवन्हिसमवहितजन्यभिन्नत्वाभावस्येत्यर्थः । विशेषणेति । वन्ह्यसमवहितजन्यभिन्नत्वाभाववन्हिसमवहितजन्यभिन्नत्वाभावानतिरिक्ततयेत्यर्थः । विशेष्याभावस्य सिद्धेरिति । तथा च केवलविशेष्याभावस्य वन्हिजन्यभिन्नत्वाभावस्याऽपाद्याभावेन सिद्धौ सत्यां धूमो वन्हिजन्यो न वेत्याकारकसंशयं प्रति मूलोक्ततर्कस्य प्रतिबन्धकत्वमक्षतं वन्हिजन्यभिन्नत्वाभावत्वावच्छिन्नस्यैवाऽपाद्याभावेन सिद्धिसंभवात् तद्धर्मावच्छिन्नाभावकोटिकशङ्काप्रतिबन्धकत्वमेव तर्कस्य नियम इत्यस्य पूर्वमभिहितत्वादिति भावः

नन्वनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमादुत्पन्नत्वरूपाद्याभावेन, विशिष्टाभावत्वेनैव रूपेण वह्निजन्यभिन्नत्वाभावस्य सिद्धिसंभवाद् वह्निजन्यत्वत्वस्योत्पन्नत्वव्यापकतान-

अथ तथापि न वह्निजन्यभिन्नत्वाभावत्वरूपेण वह्निजन्यत्वस्य सिद्धिः अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन विशिष्टाभावत्वेनैव तत्सिद्धेः। न च विशेषणाभावबाधनिश्चयसहकाराद् व्यापकतानवच्छेदकेनापि विशेष्याभावत्वेन तत्सिद्धिरिति वाच्यम्; तथापि पक्षे विपर्ययानुमाने पूर्वं विशेषणाभावबाधप्रतिसन्धानानावश्यकतया नियमतस्तेन रूपेणासिद्धेरिति चेत्-न; वह्न्यसमवहिताजन्यत्वेन पक्षस्यापि विशेषणीयत्वात् । तथा च पक्षतावच्छेदकावच्छिन्ने विपर्ययानुमाने पूर्वं विशेषणाभावबाधप्रतिसन्धानस्यावश्यकतया नियमतो वह्निजन्यभिन्नत्वाभावत्वरूपेण वह्निजन्यत्वसि-

---

वच्छेदकतया तद्रूपेणानुमितौ सिद्ध्यसंभवात् कथमुक्ततर्कस्य धूमो वह्निजन्यो नवेतिसंशयप्रतिबन्धकत्वमित्याशङ्कते-**अथेति** । तटस्थः शङ्कते-**नचेति** । वाच्यमिति परेणान्वयः **विशेषणेति** । वह्न्यसमवहितजन्यभिन्नत्वाऽभावस्य यो बाधनिश्चयो वह्न्यसमवहितजन्यभिन्नत्वनिश्चयस्तत्सहकृतात्सामान्यपरामर्शादित्यर्थः । विशेष्याभावत्वेन=वह्निजन्यभिन्नत्वाभावत्वेन वह्निजन्यत्वत्वेनेति यावत् । तत्सिद्धिः=वह्निजन्यत्वसिद्धिः । तथा च धूमे वन्ह्यसमवहितजन्यभिन्नत्वरूपविशेषणवत्तानिश्चयसत्वे तादृशनिश्चयस्यैव विशेषणाभावबाधनिश्चयरूपतया सामान्यपरामर्शबलाद् उत्पन्नत्वव्यापकतानवच्छेदकवह्निजन्यत्वत्वेनापि रूपेणानुमितिसंभवादुक्ततर्कस्य वह्निजन्यत्वाभावकोटिकसंशयप्रतिबन्धकत्वं निर्विवादमिति भावः । समाधत्ते-**तथापीति** । पक्षे=धूमे । विपर्ययानुमानात्=उत्पन्नत्वाभावाभावेनोत्पन्नत्वेनापादकाभावरूपविशिष्टाभावानुमानात् । पूर्वम्=अव्यवहितपूर्वम् । **विशेषणेति** । वन्ह्यसमवहितजन्यभिन्नत्वनिश्चयस्याऽनावश्यकतयेत्यर्थः । तेन रूपेण=वह्निजन्यभिन्नत्वाभावत्वेन रूपेण । **असिद्धेरिति** । धूमे यदा आपाद्याऽभावेन आपादकाभावानुमानं तदैव तादृशानुमानात्पूर्वं धूमो वन्ह्यसमवहितजन्यभिन्नइत्याकारकनिश्चयसत्त्वस्य प्रमाणासिद्धत्वादनावश्यकत्वाच्च विशिष्टाभावत्वेनैवाऽनुमितौ सत्यां न वह्निजन्यो नवेतिसंशयप्रतिबन्धकत्वमुक्ततर्कस्य संभवति आपाद्याभावेन केवलवह्निजन्यत्वत्वेनानुमित्यनुदयादिति हृदयम् ।

उपाध्यायमतवलम्ब्य अथेत्यादेरुत्तरमाह-**इतिचेन्नेति** । **वह्न्येति** । स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वेनेत्यर्थः । पक्षस्यापि=धूमस्यापि । **विशेषणीयत्वादिति** । तथा च तादृशवन्ह्यसमवहिताजन्यो धूमो यदि वन्ह्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्ववान् स्यात् तदोत्पन्नत्वाभाववान् स्यादित्येवं तर्काकार उपाध्यायादिमते बोध्य इति भावः । ननु वन्ह्यसमवहिताजन्यत्वस्य पक्षविशेषणत्वे कथं तादृशतर्केण वह्निजन्यत्वशङ्कानिवृत्तिरित्यत आह—**तथाचेति** । निरुक्तवन्ह्यसमवहिताजन्यत्वस्य पक्षविशेषणत्वे चेत्यर्थः । **पक्षतेति** । वन्ह्यसमवहितजन्यभिन्नत्वविशिष्टधूमत्वावच्छिन्न इत्यर्थः । विपर्ययानुमाने=आपाद्याभावेनोत्पन्नत्वेन वन्ह्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्वाभावरूपापादकाभावानुमाने । पूर्वं=निरुक्तानुमानात् प्राक् । **विशेषणेति** । वन्ह्यसमवहितजन्यभिन्नत्वनिश्चयस्येत्यर्थः । नियमतः=विशेषणाभावबाधनिश्चयसहकृतसामान्यपरामर्शादितः । **वह्निजन्येति** । केवलेत्यादिः । **वह्निजन्यत्वसिद्धिरिति** । आपाद्याभावेन तादृशविशेषणविशि धूमादावापादकाभावानुमितेः

द्धिरप्रत्यूहेति सम्प्रदायविदः ।

तदसत्; वह्निसमवहितजन्यभिन्नत्वस्यैव विशेष्यतया बाधसहकारेण तदभावत्वेन तदभावस्य वह्निसमवहितजन्यत्वरूपस्य सिद्धावपि वह्निजन्यभिन्नत्वाभावत्वरूपेण वह्निजन्यभिन्नत्वाभावस्य वह्निजन्यत्वरूपस्यासिद्धेर्वह्न्यजन्यस्यापि वह्निनान्तरीयकस्य घटादेर्वह्निसमवहितजन्यतया वह्निसमवहितजन्यत्ववह्निजन्यत्वयोरत्यन्तं भेदात्, वह्निजन्यत्वासिद्धौ च कुतोऽस्य वह्निजन्यत्वसंशयप्रतिबन्धकत्वम्? ।

पूर्वं पक्षतावच्छेदकतादृशविशेषणविशिष्टधूमत्वावच्छिन्नज्ञानमावश्यकमनुमितौ विशिष्टपक्षज्ञानस्य हेतुत्वात् । एवञ्च धूमे वन्ह्यसमवहिताजन्यत्वनिश्चयस्य विपर्ययानुमानात्पूर्वं सत्त्वे तस्यैव विशेषणाभावरूपवन्ह्यसमवहितजन्यभिन्नत्वाभावसिद्धौ प्रतिबन्धकतया तात्पर्याद् विशेष्याभावात्मकवह्निजन्यभिन्नत्वाभावरूपवह्निजन्यत्वमात्रेण आपाद्याभावेन हेतुनाऽनुमितिसम्भवान्निरुक्तमूलोक्ततर्केण वह्निजन्यत्वाभावकोटिकशङ्काप्रतिबन्ध इत्याशयः । सम्प्रदायविदः = यज्ञपत्युपाध्यायप्रभृतयः प्राचीनाः ।

धूमे वन्ह्यसमवहितजन्यभिन्नत्वस्य विशेषणत्वे आपाद्याभावेन विशिष्टाभावसिद्धौ विशेषणाभावस्य वन्ह्यसमवहितजन्यभिन्नत्वाभावस्य निरुक्तविशेषणवत्तानिश्चयरूपबाधसहकारादसिद्धावपि विशेष्याभावस्य वह्निसमवहितजन्यभिन्नत्वाभावस्य वह्निसमवहितजन्यत्वस्य तादृशापाद्याभावेनावश्यं सिद्धौ धूमो वह्निसमवहितजन्यो न वेत्याकारकसंशयं प्रत्येव मूलोक्ततर्कस्य प्रतिबन्धकत्वे धूमो वह्निजन्यो नवेतिसंशयप्रतिबन्धकत्वमुक्ततर्कस्य न संभवति विशेष्याभावस्य वह्निजन्यत्वातिरिक्तत्वात्, निरुक्ततर्कस्य वह्निजन्यत्वसंशयाप्रतिबन्धकत्वे च धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादिवह्निधूमव्याप्तिग्रहोपयोगितर्कोत्पाद एव न सम्भवति वह्निजन्यत्वसंशयस्य निरुक्ततर्ककारणवह्निजन्यत्वनिश्चयविघटकत्वादित्येवं निरुक्तोपाध्यायमतं दूषयति—**तदसदिति** । बाधसहकारेण = वन्ह्यसमवहितजन्यभिन्नत्वनिश्चयसहकारेण । तदभावस्य=विशेष्याभावस्य । **असिद्धेरिति** । आपाद्याभावेनापादकाभावस्य यद्रूपेण सिद्धिस्तद्रूपावच्छिन्नाभावकोटिकशङ्कां प्रत्येव तर्कस्य विरोधित्वम् । तथा च वह्निजन्यत्वत्वेन रूपेणासिद्धौ कुतोऽस्य तर्कस्य वह्निजन्यत्वाभावकोटिकशङ्काप्रतिबन्धकत्वमित्याशयः । ननु वह्निसमवहितजन्यत्वमेव वह्निजन्यत्वं, तथा च वह्निसमवहितजन्यत्वसिद्धिमात्रेणैव वह्निजन्यत्वशङ्काप्रतिबन्धकत्वमुक्ततर्कस्य संभवतीत्यत आह—**वह्न्यजन्येति** । वह्निजन्यत्वाभाववतोऽपीत्यर्थः । **वह्निनान्तरीयकेति** । स्वसमानाधिकरणवह्निमत्स्वाव्यवहितपूर्वक्षणकस्येत्यर्थः । **वह्निसमवहितेति** ।। स्वसमानाधिकरणवह्निमत्स्वाव्यवहितपूर्वक्षणकतयेत्यर्थः । **अत्यन्तं भेदादिति** । तथा च वह्निसमवहितजन्यत्वं यदि वह्निजन्यत्वस्वरूपं तदा वह्निनान्तरीयकघटादेरपि वह्निजन्यत्वापत्तिरतो वह्निसमवहितजन्यत्वं वन्हिजन्यत्वातिरिक्तमेवेति भावः । अस्य=मूलोक्ततर्कस्य ।

ननु धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निसमवहितजन्यो न स्यादित्येवं तर्के वन्हिधूमव्याप्तिग्रहोपयोगी वक्तव्यस्तादृशतर्के च वन्हिसमवहितजन्यत्वनिश्चय आपाद्य-

न च धूमो यदि संयोगसम्बन्धावच्छिन्नोत्पत्तिसम्बन्धेन वह्निव्यभिचारी स्याद् वह्निसमवहितजन्यो न स्यादिति तर्को वह्निधूमव्याप्तिग्रहोपयोगी, तत्र च बाधनिश्चयविधया वह्निसमवहितजन्यत्वनिश्चयो हेतुस्तन्निश्चयविरोधिनो वह्निसमवहितजन्यत्वसंशयस्य निवर्तकतयैवास्य वह्निधूमव्याप्तिग्रहोपयोगित्वसम्भवेन वह्निजन्यत्वसंशयाप्रतिबन्धकत्वेऽपि न क्षतिरिति वाच्यम्; स्वसमानाधिकरणवह्निमत्स्वाव्यवहितपूर्वक्षणकत्वरूपस्य वह्निसमवहितजन्यत्वस्य धूमे निश्चितत्वेन तत्संशयनिवृत्त्यर्थं तर्कवैफल्यात्। धूमे तन्निश्चयासत्त्वे तु वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य सत्यन्तदलसंशयप्रतिबन्धकत्वस्य वक्ष्यमाणस्यासंगतत्वापत्तेः, निरुक्तवह्निसमवहितजन्यत्वस्यैव वह्न्यन्वयव्यतिरेकानुविधायित्वरूपत्वात्।

व्यतिरेक निश्चयविधया हेतुस्तादृशनिश्चयविघटकश्च धूमो वन्हिसमवहितजन्यो न वेत्याकारकसंशयस्तत्प्रतिबन्धार्थमेव मूलोक्ततर्कानुसरणं वाच्यम् उत्पन्नत्वरूपापाद्यभावेन यदि विशेषणाभावबाधनिश्चयसहकाराद्विशेष्याभावस्य वन्हिसमवहितजन्यत्वमात्रस्य सिद्धिस्तदा निरुक्ततर्कस्यापि वह्निसमवहितजन्यो न वेतिसंशयप्रतिबन्धकत्वं सम्भवत्येवेत्याशङ्कते—**नचेति**। वाच्यमितिपरेणान्वयः। संयोगाद्यतिरिक्तसंबन्धावच्छिन्नोत्पत्तिसंबन्धेन संबन्धसामान्येन वा वह्निव्यभिचारित्वं न वह्निसमवहितजन्यत्वापादकमित्यतः संयोगेत्याद्यभिहितम्। तथा च धूमो यदि संयोगसम्बन्धावच्छिन्नोत्पत्तिसंबन्धेन वह्न्यभाववद्वृत्तितावान् स्यात्तदा स्वसमानाधिकरणवह्निमत्स्वाऽव्यवहितपूर्वक्षणको न स्यादित्येव तर्को वह्निधूमव्याप्तिग्रहोपयोगी वक्तव्य इत्याशयः। तत्र च=निरुक्तवह्निधूमव्याप्तिग्रहोपयोगितर्के च। **बाधेति**। आपाद्यव्यतिरेकनिश्चयविधयेत्यर्थः। तन्निश्चयविरोधिनः=निरुक्तवह्निसमवहितजन्यत्वनिश्चयविरोधिनः। निवर्त्तकतया=प्रतिबन्धकतया। अस्य=मूलोक्ततर्कस्य। न क्षतिः=न वह्निधूमव्याप्तिग्रहोपयोगित्वक्षतिः। समाधत्ते—**स्वसमानेति**। धूमसमानाधिकरणवह्निमत्स्वाऽव्यवहितपूर्वक्षणकत्वरूपस्येत्यर्थः। **निश्चितत्वेनेति**। मूलोक्ततर्कात्पूर्वमित्यादिः। तत्संशयनिवृत्त्यर्थं= वह्निसमवहितजन्यत्वसंशयनिवृत्त्यर्थम्। **तर्कवैफल्यादिति**। मूलोक्तेत्यादिः। तथा च धूमे यदि मूलोक्ततर्कात्पूर्वमेव यथोक्तवह्निसमवहितजन्यत्वनिश्चयो भवति तदा तादृशनिश्चयप्रतिबन्धकसंशयनिवृत्त्यर्थं मूलोक्ततर्कानुसरणं विफलमेव स्यादितिभावः। ननु धूमे तर्कात्पूर्वं वह्निसमवहितजन्यत्वनिश्चयो भवतीत्यत्र किं मानमित्यत आह—**धूम इत्यादि**। तन्निश्चयाऽसत्त्वे=वह्निसमवहितजन्यत्वनिश्चयासत्त्वे। **वह्न्यन्वयेति**। वक्ष्यमाणस्येत्यादिः। **सत्यन्तेति**। स्वसमानाधिकरणवह्निमदन्यस्वाऽव्यवहितपूर्वक्षणकान्यत्वसंशयप्रतिबन्धकस्येत्यर्थः। **असङ्गतत्वापत्तेरिति**। तथा च धूमे पूर्वं वह्निसमवहितजन्यत्वनिश्चयसत्त्वमावश्यकमिति हृदयम्। नन्वेतावता वह्न्यन्वयव्यतिरेकानुविधायित्वस्य पूर्वं धूमे निश्चितत्वेऽपि न वह्निसमवहितजन्यत्वनिश्चयस्तदानीं तत्र संभवतीत्यत आह—**निरुक्तेति**। स्वसमानाधिकरणवह्निमत्स्वाऽव्यवहितपूर्वक्षणकत्वस्यैवेत्यर्थः। तथा च वह्निसमवहितजन्यत्वमेव वह्न्यन्वयव्यतिरेकानुविधायित्वमित्यग्रे स्फुटो भविष्यतीत्याशयः।

ननु वह्निजन्यत्वमेव वह्निसमवहितजन्यत्वमस्तु। तथा चापाद्याभावेन विशेष्याभावस्य

किञ्च पक्षतावच्छेदकविशिष्टे आपाद्याभावेनापादकाभावसाधने यद्धर्ममात्रविधेयतावच्छेदककसिद्धिर्भवति तद्धर्मावच्छिन्नाभावकोटिकसंशयं प्रत्येव तर्को विरोधीत्येव नियमः । अन्यथा "महत्त्वदीर्घत्वेतरपरिमाणाभाववान् घटो यदि परिमाणवान् न स्याद् द्रव्यं न स्यादित्य"स्यापि घटो महान्नवेत्यादिसंशयप्रतिबन्धकत्वापत्तिः, बाधसहकारेण विपर्ययानुमाने महत्त्व-

---

वह्निजन्यभिन्नत्वाभावस्य वह्निजन्यत्वस्य सिद्धौ वह्निजन्यत्वाभावकोटिकसंशयं प्रत्येव मूलोक्ततर्कस्य प्रतिबन्धकत्वं संभवति । न चैवं वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निजन्यभिन्नत्वस्यापादकत्वे वह्निनान्तरीयकघटे व्यभिचारस्तत्रोक्तापादकसत्त्वादिति वाच्यं वह्निनान्तरीयकघटादिभिन्नत्वविशिष्टस्योत्पन्नत्वस्य योऽभावस्तस्यैवापाद्यत्वेनाऽपन्या कथञ्चिद्व्यभिचारस्य वारणीयत्वात्तादृशघटादिभिन्नत्वरूपविशेषणाभावेन विशिष्टोत्पन्नत्वाभावरूपापाद्यस्याऽपि तादृशनान्तरीयकघटादौ सत्त्वादिति यदि ब्रूयात् तदाप्याह—**किंचेति** । पक्ष एवापादककोटिकशङ्काप्रतिबन्धस्तर्केण भवतीत्याशयेनाह—**पक्षतेति** । आपादकाभावसाधने=आपादकाभावानुमितौ । निरूपितत्वं सप्तम्यर्थः, अन्वयश्चास्य यद्धर्ममात्रविधेयतावच्छेदकतायामिति ध्येयम् । **यद्धर्ममात्रेति** । यद्धर्मपर्याप्तावच्छेदकताकविधेयताकनिश्चयो भवति तद्धर्मपर्याप्तावच्छेदकताकप्रतियोगिताकाभावकोटिकसंशयं प्रत्येव तर्कः प्रतिबन्धक इत्येव नियम इत्यर्थः । तेन घटो यदि विशिष्टसत्त्वाभाववान् स्यात्तदा द्रव्यं न स्यादित्यादितर्कस्य घटो विशिष्टसत्त्वाऽभाववान्नवेति संशयप्रतिबन्धकत्वं, न तु घटः सत्तावान्नवेति संशयं प्रत्यपि तस्य तथात्वमिति मन्तव्यम् । मात्रपदप्रयोजनं पर्याप्तिनिवेशस्य च प्रयोजनमाह—**अन्यथेति** । मात्रपदानुपादाने इत्यर्थः । **महत्त्वेति** । महत्त्वं दीर्घत्वञ्च परिणामविशेषः तदितरपरिमाणाभाववानित्यर्थः । **घटो यदीत्यादि** । तथा च महत्त्वपरिमाणभिन्नत्वे सति दीर्घत्वपरिमाणभिन्नपरिमाणाभाववान घटो यदि परिमाणाभाववान् स्यात्तदा द्रव्यत्वाभाववान् स्यादित्यस्यापि तर्कस्येत्यर्थः पर्यवसितः । **घटो महान्नवेत्यादि** । आदिपदाद्दीर्घो नवेत्यादिसंशयमात्रपरिग्रहः । संशयप्रतिबन्धकत्वापत्तिः=संशयमात्रप्रतिबन्धकत्वापत्तिः । **बाधसहकारेणेत्यादि** । अयमाशयः मात्रपदानुपादाने आपाद्याभावेन यद्धर्मविधेयतावच्छेदकताकानुमितिस्तद्धर्मावच्छिन्नाभावकोटिकशङ्कां प्रति तर्कस्य प्रतिबन्धकत्वं भवतीत्यर्थः पर्यवसितः स्यात् । तथा सति महत्त्वदीर्घत्वेतरपरिमाणाभाववान् घटो यदि परिमाणवान् न स्याद्द्रव्यं न स्यादित्याकारकतर्कीयापाद्याभावेन द्रव्यत्वेन पक्षे महत्त्वदीर्घत्वेतरपरिमाणाभावरूपेतरबाधनिश्चयसहकृतेन महत्त्वस्याऽपि सिद्धिर्भवति, तस्य सिद्धौ च निरुक्ततर्केण महत्त्वाद्यभावमात्रकोटिकसंशयनिवृत्त्यापत्तिः स्याद् । मात्रपदोपादाने तु न निरुक्ततर्कस्य महत्त्वाभावमात्रकोटिकशङ्काप्रतिबन्धकत्वापत्तिस्तादृशेतरबाधसहकारादापाद्याभावेन द्रव्यत्वेन केवलं महत्त्वत्वावच्छिन्नस्य न सिद्धिरपि तु दीर्घत्वत्वावच्छिन्नस्याऽपि । एवञ्च निरुक्ततर्कस्य 'महान् न वा' 'दीर्घो नवेत्या'कारकशङ्काद्वयं प्रत्येव प्रतिबन्धकत्वं महत्त्वत्वदीर्घत्वत्वधर्मद्वयपर्याप्तावच्छेदकताकविधेयताकानुमितेरेव द्रव्यत्वरूपापाद्याभावेनोत्पादादिति ।

त्वावच्छिन्नस्य दीर्घत्वत्वावच्छिन्नस्य च सिद्धः। तथाच प्रकृते बाधसहकारेण व्यापकतानवच्छेदकीभूतेन विशेष्याभावत्वेन सिद्धावपि न तन्मात्रप्रकारेण सिद्धि र्व्यापकतावच्छेदकीभूतेन विशिष्टाभावत्वेनापि विशेषणाभावविशेष्याभावयोः सिद्धौ बाधकाभावादिति वह्निसमवहितजन्यत्वसंशयं प्रत्येव कुतोऽस्य प्रतिबन्धकत्वम ?।

नव्यास्तु वह्निसमवहिताजन्यः स्यादित्यत्र वह्निसमवहितजन्यत्वं वह्निजन्यत्वमेव वक्तव्यम्। सत्यन्तं चापाद्यकोटिप्रतियोगिविशेषणं वक्तव्यम्। तथाच "धूमो यदि वह्निजन्यत्वाभाववान् स्यात् वह्न्यसमवहिताजन्यत्वविशिष्टस्योत्पन्नत्वस्याभाववान् स्यादि"त्याकारकस्तर्कः। अत्र घटादौ मूलशैथिल्यवारणाय आपाद्ये विशिष्टान्तं प्रतियोगिविशेषणं नत्वभावविशे-

---

प्रकृते दोषं सङ्गमयति—**तथा चेति**। प्रकृते=उपाध्यायप्रभृतिमतसिद्धतर्कस्थले। बाधसहकारेण=पक्षविशेषणवह्न्यसमवहितजन्यभिन्नत्वनिश्चयसहकारेण। **व्यापकतानवच्छेदकीभूतेनेति**। आपाद्याभावस्योत्पन्नत्वस्येत्यादिः। विशेष्याभावत्वेन=वह्निसमवहितजन्यभिन्नत्वाभावत्वेन वह्निजन्यत्वत्वेनेति यावत्। सिद्धावपि=अनुमितावपि। न तन्मात्रप्रकारेण=न तादृशविशेष्याभावत्वप्रकारेण। सिद्धिः=अनुमितिः। **व्यापकेनेति**। आपाद्याभावस्येत्यादिः। विशिष्टाभावत्वेनापि=वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्वाभावत्वेनापि। **विशेषणेति**। वह्निसमवहितजन्यभिन्नत्वाभाववह्न्यसमवहितजन्यभिन्नत्वाभावयोरित्यर्थः। सिद्धौ=अनुमितौ। **बाधकाभावादितीति**। विशिष्टाभावत्वावच्छिन्नेतरबाधस्याऽसत्त्वादिति भावः। अस्य=मूलोक्ततर्कस्य। **प्रतिबन्धकत्वमिति**। उत्पन्नत्वाभावाभावेन विशेषणाभावबाधसहकारात्पक्षे विशेष्याभावस्य वह्निसमवहितजन्यत्वाभावस्य न केवलं विशेष्याभावत्वेन सिद्धिस्तस्योत्पन्नत्वव्यापकतानवच्छेदकतया व्यापकतावच्छेदकीभूतविशिष्टाभावत्वेनाऽपि सिद्धिर्भवति, एवञ्च विशेष्याभावरूपवह्निसमवहितजन्यत्वत्वमात्रनिष्ठावच्छेदकताकविधेयताकसिद्ध्यसम्भवान्न मूलोक्ततर्कस्य वह्निसमवहितजन्यत्वाभावकोटिकशङ्कां प्रत्यपि प्रतिबन्धकत्वमिति हृदयम्।

दीधितिकारमतमवलम्ब्य समाधत्ते—**नव्यास्त्विति**। **वह्नीति**। वह्न्यसमवहिताजन्यत्वविशिष्टेत्यादिः। **वह्निजन्यत्वमेवेति**। एवकाराद् वह्निसमवहितजन्यत्वस्यापादकघटकत्वव्यवच्छेदः। अत एव 'वस्तुतो वह्न्यजन्यमपि वह्निसमवहितजन्यमि"त्युक्तं दीधितिकृता। **सत्यन्तञ्चेति**। वह्न्यसमवहिताजन्यत्वञ्चेत्यर्थः। **आपाद्यकोटिप्रतियोगीति**। उत्पन्नत्वाभावप्रतियोग्युत्पन्नत्वविशेषणमित्यर्थः। निरुक्तमते समुदिततर्काकारमाह—**तथा चेति**। **वह्न्येति**। स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकं यद् यत्तदन्यत्वविशिष्टस्योत्पन्नत्वस्याभाववान् स्यादित्यर्थः। तर्कः=मूलोक्ततर्कः। नन्वापाद्यप्रतियोग्युत्पन्नत्वविशेषणं निरर्थकमित्यत आह—**अत्रेति**। अस्मिन् तर्के इत्यर्थः। घटादौ=वह्निशून्यतादृशायां वह्निमद्देशोत्पन्नघटादौ, न तु वह्निव्यधिकरणे घटे तत्र विशिष्टान्तोपादानेऽपि व्यभिचारवारणासम्भवात्। वक्ष्यमाणपारिभाषिकोत्पन्नत्वविवक्षयैव तत्र व्यभिचारस्य वारणीयत्वादिति ध्येयम्। **मूलशैथिल्यवारणायेति**। आपाद्य-

षणं घटादौ मूलशैथिल्यतादवस्थ्यापत्तेः। तदर्थश्चोक्त एव, ननु वह्नि-मद्भिन्नदेशोत्पत्तिकान्यत्वं तत्, वह्निमति वह्नेः पूर्वमुत्पन्ने रासभादौ व्य-

---

प्रतियोग्युत्पन्नत्वे वह्न्यसमवहिताजन्यत्वस्याविशेषणत्वे वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादौ व्यभिचारः तादृशघटादौ वह्निजन्यत्वाभावस्याऽऽपादकस्य सत्त्वेन तत्रापाद्यस्योत्पन्नत्वाभावस्य विरहात् । तादृशोत्पन्नत्वे वन्ह्यसमवहिताजन्यत्वस्य विशेषणत्वे तु न तादृशघटादौ व्यभिचारस्तत्र वन्हिजन्यत्वाभावस्यापादकस्य सत्त्वेऽपि वन्ह्यसमवहिताजन्यत्वरूपविशेषणाभावेन तादृशविशेषणविशिष्टोत्पन्नत्वस्याऽभावरूपापाद्यस्याऽपि तत्र सत्त्वादितिभावः । विशिष्टान्तं = वन्ह्यसमवहिताजन्यत्वम् । ननु उत्पन्नत्वाभावरूपापाद्यस्यैव वन्ह्यसमवहिताजन्यत्वविशेषणमस्तु किं तादृशापाद्यप्रतियोग्युत्पन्नत्वे तस्य विशेषणत्वेनेत्यत आह—**न त्विति** । अभावविशेषणम् = उत्पन्नत्वाभावविशेषणम् । घटादौ = वन्हिशून्यतादशायां वन्हिमद्देशोत्पन्नघटादौ । **मूलशैथिल्यतादवस्थ्यापत्तेरिति** । तथा च वह्न्यसमवहिताजन्यत्वं यदि उत्पन्नत्वाभावरूपापाद्यविशेषणं स्यात्तदा वन्हिशून्यतादशायां वन्हिमद्देशोत्पन्नघटादौ व्यभिचारः स्यात् । स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वरूपवन्ह्यसमवहिताजन्यत्वविशेषणविशिष्टस्योत्पन्नत्वाभावस्य नित्यवस्तुनिष्ठस्य तादृशघटादावसत्त्वादतः उत्पन्नत्वविशेषणमेव तादृशं वन्ह्यसमवहिताजन्यत्वं, तथा सति विशेषणाभावेन विशिष्टोत्पन्नत्वस्याभावस्यापि तादृशघटादौ सत्त्वान्न व्यभिचार इत्याशयः । तदर्थश्च = आपाद्यप्रतियोगिविशेषणसत्यन्तार्थश्च । **उक्त एवेति** । स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितपूर्वक्षणकं यद्यत्तदन्यत्वरूपोऽर्थोऽभिहित एवेत्यर्थः । एवकारात्सत्यन्तस्यान्यविधार्थकत्वव्यवच्छेदः। एवकारव्यवच्छेद्यमाह—**नत्विति** । **वन्हिमदिति** । वन्हिमद्भिन्नदेशोत्पत्तिको यो यस्तदन्यत्वमित्यर्थः । वन्ह्युत्तरमुत्पन्ने रासभादौ स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वस्योत्पन्नत्वस्य च सत्त्वेन सत्यन्तस्य निरुक्तार्थकत्वेऽपि तत्र व्यभिचारवारणं न संभवतीत्यतो वन्हेः पूर्वमित्युक्तम् । **रासभादाविति** । आदिना वन्हिशून्यतादशायां वन्हिमद्देशोत्पन्नघटादिपरिग्रहः । तेन वन्हिमद्भिन्नदेशोत्पत्तिकान्यत्वस्य सत्यन्तार्थत्वे निरुक्तघटादावपि व्यभिचारसम्भवे वन्हेः पूर्वमुत्पन्नरासभादौ व्यभिचाराभिधानमसङ्गतमित्यपि समाहितमिति ध्येयम् । **व्यभिचारापत्तेरिति** । तथा च वन्हिजन्यत्वाभावरूपापादकवति वह्नेः पूर्वमुत्पन्ने रासभादौ वन्हिमद्भिन्नदेशोत्पत्तिकान्यत्वरुपसत्यन्तार्थस्योत्पन्नत्वस्य च सत्त्वेन तादृशविशिष्टोत्पन्नत्वाभावरूपापाद्यविरहाद् व्यभिचारः स्याद् यदि वन्हिमद्भिन्नदेशोत्पत्तिकान्यत्वस्य सत्यन्तार्थत्वं स्यात्, स्वसमानाधिकरणवन्हिमदन्यस्वाऽव्यवहितप्राक्क्षणकान्यत्वस्य सत्यन्तार्थत्वे तु न तत्र व्यभिचारः निरुक्तसत्यन्तार्थस्य तादृशरासभादौ विरहेण तद्विशिष्टोत्पन्नत्वाभावस्य तत्र सत्त्वादिति भावः ।

अथ स्वसमानाधिकरणवन्हिमत्स्वाव्यवहितप्राक्क्षणकत्वरूपवन्हिसमवहितजन्यत्वस्योत्पन्नत्वविशेषणत्वेनैवोपपत्तौ निषेधद्वयगर्भवन्ह्यसमवहिताजन्यत्वस्याऽऽपाद्यप्रतियोग्युत्पन्नत्वविशेषणत्वमनर्थकं वन्हिशून्यताकालीनवन्हिमद्देशोत्पन्नघटादौ यथोक्तवन्हिसमवहितजन्य-

भिचारापत्तेः। अजन्ये मूलशैथिल्यवारणाय विशेष्यदलम्। न च वह्न्य-जन्ये वह्निसमवधाननियतोत्पत्तिके घटादिविशेषे मूलशैथिल्यमिति वाच्य-म्, उत्पन्नत्वं हि वह्न्यसमवहितवह्नितत्संयोगेतरयावत्कारणाधिकरणक्षण-

त्वरूपविशेषणाभावेनैव विशिष्टोत्पन्नत्वाभावस्य तत्राक्षतत्वादिति चेदत्र केचित्–अवन्हे-रेव भविष्यतीत्यादिवक्ष्यमाणायाः शङ्कायाः स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्-क्षणकान्यत्वशङ्कास्वरूपायाः सत्यन्तदलनिश्चयविघटकताया एव वक्तव्यतया वन्हिसमव-हितजन्यत्वस्य सत्यन्तार्थत्वे तदनुपपत्तिः स्याद् वन्हिसमवहितजन्यत्वबुद्धौ तादृशशङ्काया अप्रतिबन्धकत्वादतः सत्यन्तं निषेधद्वयगर्भम्। न च अवन्हेरित्यादिशङ्काऽपि स्वसमा-नाधिकरणवन्हिमत्स्वाव्यवहितप्राक्क्षणकत्वसंशयरूपैवास्त्विति वाच्यं, तथा सति यथाश्रुता-र्थपरित्यागापत्तेरिति वदन्ति। अन्ये तु यादृशघटस्य स्वाव्यवहितप्राक्क्षणावच्छिन्नवन्हि-मति तादृशवन्हिशून्ये चोत्पत्तिस्तादृशघटविशेषे स्वसमानाधिकरणवन्हिमत्स्वाऽव्यवहित-प्राक्क्षणकत्वविशिष्टोत्पन्नत्वसत्त्वेन तत्रापाद्यविरहादतः सत्यन्तं निषेधद्वयगर्भमित्याहुस्त-च्चिन्त्यम्। यत्तु स्वसमानाधिकरणवन्हिमदन्यस्वाऽव्यवहितप्राक्क्षणकान्यत्वस्य सत्यन्ता-र्थत्वे वन्हिव्यधिकरणे घटादौ व्यभिचारवारणायैवोत्पन्नत्वस्य वक्ष्यमाणपारिभाषिकत्वस्या-वश्यकतया वन्हिनान्तरीयकघटादौ व्यभिचारवारणाय तस्य तथात्वाभिधानमनुचितमिति भट्टाचार्यैरुक्तं तदसङ्गतम्, एतन्मते वन्हिव्यधिकरणघटादौ व्यभिचारवारणाय वन्हिसमा-नाधिकरणत्वस्योत्पन्नत्वविशेषणतायाः पूर्वमुक्तत्वादुत्पन्नत्वस्य तदर्थं पारिभाषिकत्वा-ऽभिधानस्यानौचित्यादिति ध्येयमिति दिक्।

उत्पन्नत्वरूपविशेष्यदलं विहाय स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्क्षणका-न्यत्वाभावमात्रस्याऽऽपाद्यत्वे नित्यगगनादौ व्यभिचारः वन्हिजन्यत्वाभावरूपापादकवति तत्र स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवन्ह्यसमवहिताजन्यत्व-स्यैव सत्त्वेन तदभावस्य तत्र विरहात्। उत्पन्नत्वरूपविशेष्यदलप्रवेशे तु न तादृशगग-नादौ व्यभिचारः उत्पन्नत्वरूपविशेष्यदलस्य तत्र विरहेण विशिष्टोत्पन्नत्वाभावरूपापाद्यस्य तत्र सत्त्वादित्याह—**अजन्येति**। नित्यगगनादावित्यर्थः। **विशेष्यदलमिति**। उत्पन्नत्वरूपमित्यादिः। न च स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्व-विशिष्टाभावस्यैवाऽऽपाद्यत्वमस्तु किमुत्पन्नत्वपदेन गगनादौ तादृशक्षणकान्यत्वविशिष्टाभा-वसत्त्वादेव व्यभिचारवारणं सम्भवतीति वाच्यं, तथा सति वन्हिशून्यतादशायां वन्हिमद्दे-शोत्पन्नघटादौ व्यभिचारापत्तेस्तत्र तादृशवन्ह्यसमवहिताजन्यत्वरूपविशेषणाभावेन तादृश-विशेषणविशिष्टाभावरूपापाद्यस्याऽसत्त्वादिति भावः।

नन्वेवमपि वन्हिजन्यत्वाभावरूपापादकवति वन्हिनान्तरीयकघटे व्यभिचारस्तत्र यथो-क्तवन्ह्यसमवहिताजन्यत्वस्योत्पन्नत्वस्य च सत्त्वेन तादृशविशिष्टोत्पन्नत्वाभावरूपापाद्यवि-रहादित्याशङ्कते–**न चेति**। वाच्यमितिपरेणान्वयः। वन्ह्यजन्य इत्यनेन वन्हिजन्यत्वाभाव-रूपाऽपादकसत्त्वं सूचितम्। **वह्निसमवधानेति**। वन्हिसत्त्व एव यादृशघटस्योत्पत्तिस्तादृ-शघटविशेष इत्यर्थः। समाधत्ते–**उत्पन्नत्वमित्यादि**। स्वसमानाधिकरणवन्हिमदन्यक्षणवृ-त्तीनि वन्हितत्संयोगेतरयावत्त्वविशिष्टकारणानि यस्य स्वस्य एवं भूतं यत्स्वं तत्त्वमेवोत्पन्न-

कत्वम् । नान्तरीयके उक्तमूलशैथिल्यवारणाय वह्न्यसमवहितेति क्षणविशेषणम्, स्वसमानाधिकरणवह्निमदन्यत्वं तदर्थः । वह्निनान्तरीयकस्य यावत्कारणाधिकरणक्षणस्तु न वह्निमदन्यः, तथा सति वह्निं विनापि तदुत्पत्त्यापत्तेः, नहि यावत्कारणसत्त्वे कार्य्यविलम्बः ।

पक्षीभूते धूमे इष्टापत्तेः, महाप्रलये मानाभावात्, खण्डप्रलयेऽपि ब्रह्माण्डान्तरे वह्निसत्त्वादसिद्धेर्वारणाय स्वसमानाधिकरणेति वह्निविशेषणम् ।

त्वमित्यर्थः । वन्ह्यसमवहिताजन्यत्वविशिष्टस्य तादृशोत्पन्नत्वस्याभावश्चापाद्यं, तथा च न वन्हिनान्तरीयकघटे व्यभिचारस्तादृशघटे स्वसमानाधिकरणवन्हिमदन्यत्वाव्यवहितप्राक्क्षणकान्यत्वरूपवन्ह्यसमवहिताजन्यत्वस्य सत्वेऽपि तद्विशिष्टस्य स्वसमानाधिकरणवन्हिमदन्यवन्हितत्संयोगेतरयावत्कारणाधिकरणक्षणकत्वरूपधूमनिष्ठोत्पन्नत्वस्य विरहेणापाद्यस्य तादृशनान्तरीयके ऽक्षतत्वादित्याशयः । वन्ह्यसमवहितत्वं यदि तादृशयावत्कारणाधिकरणक्षणविशेषणं न स्यात्तदा निरुक्तवह्निनान्तरीयके व्यभिचारः स्यात्तत्र वह्नितत्संयोगेतरयावत्कारणाधिकरणक्षणकत्वमात्ररूपोत्पन्नत्वस्य सत्वेन तदभावरूपापाद्यस्य तत्रासत्वादित्याह—**नान्तरीयक इति** । **क्षणविशेषणमिति** । वन्हितत्संयोगेतरयावत्कारणाधिकरणेत्यादिः। वन्ह्यसमवहितत्वं न कालिकसम्बन्धावच्छिन्नवन्ह्यभाववत्त्वं महाप्रलये व्यभिचारापत्तेः वन्ह्यजन्ये तत्र तादृशवन्ह्यभाववत्सकलतत्कारणक्षणकत्वरूपोत्पन्नत्वस्य सत्वेन तदभावरूपापाद्यस्य तत्र विरहादत आह—**स्वसमानाधिकरणेति** । स्वमुत्पन्नत्वेनाभिमतं वस्तु तत्समानाधिकरणो यो वन्हिस्तद्वदन्यत्वं वन्हितत्संयोगेतरयावत्कारणाधिकरणक्षणविशेषणं बोध्यमित्यर्थः । तदर्थः = वन्ह्यसमवहितदलस्यार्थः । वन्हिनान्तरीयके व्यभिचारं वारयति—**वह्निनेति** । न वह्निमदन्यः = न तादृशघटसमानाधिकरणवन्हिमदन्यः । तथा सति = तादृशघटस्य यावत्कारणाधिकरणक्षणस्य वन्हिमदन्यत्वे सति । तदुत्पादापत्तेः = नान्तरीयकघटस्योत्पादापत्तेः । तादृशघटोत्पादापत्तौ साधिकां युक्तिमप्याह—**न हीति** । **यावत्कारणसत्त्व इति** । तादृशघटस्येत्यादिः ।

ननु वन्हिमदन्यत्वमेव वन्ह्यसमवहितत्वं स्याद्वन्हौ स्वसामानाधिकरण्यविशेषणन्त्वनर्थकमेवेत्याह—**पक्षीभूत इत्यादि** । **इष्टापत्तेरिति** । तथा च सर्वस्यैव महाप्रलयातिरिक्तस्य जन्यवस्तुनः पूर्वं कारणाधिकरणक्षणस्य देशान्तरे वन्हिसत्वेन वन्हिमत्त्वाद् धूमस्याप्यव्यवहितपूर्वक्षणस्य वन्हिमत्तया वन्हिमदन्यवन्हितत्संयोगेतरयावत्कारणाधिकरणक्षणकत्वरूपोत्पन्नत्वं महाप्रलयमात्रएव वर्त्तमानं, तदभावरूपापाद्यस्य तु धूमे सत्त्वात्तत्रेष्टापत्तिः स्यात्, पक्षे आपाद्यसत्वस्यैवेष्टापत्तिपदार्थत्वादित्याशयः । महाप्रलयाऽनङ्गीकारपक्षे निरुक्तेष्टापत्त्यसंभवादाह—**महाप्रलय इति** । युगपद्ब्रह्माण्डानां प्रलयस्य नव्यैरनभ्युपगमादाह—**मानाभावादिति** । तथा च वन्हिमदन्यतादृशयावत्कारणाधिकरणक्षणत्वं न कुत्रापि प्रसिद्ध्यतीति भावः। ननु खण्डप्रलयस्य नव्यैरभ्युपगम्यमानतया तत्पूर्वक्षणस्य वन्हिमदन्यत्वं प्रसिद्धमित्यत आह—**खण्डप्रलय इति** । **वन्हिसत्त्वादिति** । तथा च खण्डप्रलयपूर्वक्षणस्यापि ब्रह्माण्डान्तरावच्छेदेन वन्हिमत्त्वाद्वन्हिमदन्यत्वं न कस्याऽपि जन्यस्य पूर्वक्षणे संभवतीति हृदयम् । तादृशयावत्कारणाधिकरणक्षणे स्वसामानाधिकरण्यसहितवन्हिमदन्यत्वनिवेशे तु नाऽप्रसिद्धिरित्याह—**स्वसमानाधिक-**

वह्न्यसमवहिताजन्यत्वविशिष्टस्य वह्न्यसमवहितयावत्कारणाधिकरणक्ष-णकत्वस्याप्रसिद्धत्वाद् वह्नितत्संयोगेतरेति यावत्कारणविशेषणम् । इत्थं च

रणेतीति । तादृशवन्ह्यसमवहिताजन्यत्वविशिष्टस्य निरुक्तोत्पन्नत्वस्य प्रसिद्धिर्धूम एव संभवतीत्यग्रे स्फुटीभविष्यिति ।

यथोक्तवन्ह्यसमवहिताजन्यत्वविशिष्टस्य स्वसमानाधिकरणवन्हिमदन्ययावत्कारणाधि-करणक्षणकत्वस्य कुत्राऽपि प्रसिद्धिर्न स्यात् वन्हितत्संयोगघटितयावत्कारणाधिकरणक्षणस्य स्वसमानाधिकरणवन्हिमदन्यत्वाऽसंभवात् । अतो वन्हितत्संयोगेतरत्वं यावत्कारणविशेषणं वाच्यमित्याह—**वन्ह्येति** । तथा च वन्हितत्संयोगेतरयावत्कारणाधिकरणक्षणकत्वं धूम एव प्रसिद्धयतीत्याह—**इत्थञ्चेति**। वन्हिपदानुपादाने वन्हिघटितयावत्कारणाधिकरणक्षण-स्य तादृशवन्ह्यसमवहितत्वाऽप्रसिद्धिरतो वन्हीतरत्वं यावत्कारणविशेषणम् । एवं वन्हिसं-योगघटितकारणाधिकरणक्षणस्याऽपि वन्ह्यसमवहितत्वमप्रसिद्धं स्यादतो वन्हिसंयोगेतरत्व-मपि तादृशकारणविशेषणं वक्तव्यमिति **नव्याः**। अथ वन्ह्युत्पत्तिक्षणस्याऽपि धूमाधिकरण-वृत्तित्वविशिष्टवन्हिमदन्यत्वेन वन्हिघटितयावत्कारणाधिकरणत्वेन च धर्तुं शक्यतया वह्नी-तरत्वमनिवेश्यापि तादृशयावत्कारणाधिकरणक्षणकत्वस्य धूमे प्रसिद्धिसंभवाद् वन्हीतरत्वस्य यावत्कारणविशेषणत्वमनर्थकम् । न च धूमाधिकरणवृत्तित्वोपलक्षितवन्हिमदन्यत्वं विव-क्षणीयं, तच्च न वन्ह्युत्पत्तिक्षणे प्रसिद्धयतीति वाच्यं, तादृशवृत्तित्वोपलक्षितवन्हिमदन्य-त्वं निवेश्य वन्हीतरत्वस्य सार्थक्योपपादनस्याऽनौचित्यादिति चेन्न, केवलवन्हिमत्त्वस्य वन्ह्युत्पत्तिक्षणे सत्त्वे धूमाधिकरणवृत्तित्वविशिष्टवन्हिमदन्यस्य तत्रासंभवात् । मथुरानाथ-मते विशेष्यवति विशिष्टभेदमस्वीकृत्यैव वन्हीतरत्वनिवेशस्याऽवश्यकत्वात् ।

यत्तु धूमाधिकरणवृत्तित्वविशिष्टवन्हिमदन्यत्वप्रतियोगितावच्छेदकताघटकसंबन्धस्तु वन्हिप्रतियोगिकः कालिक एव वक्तव्यः, तथा च तादृशसंसर्गतावच्छेदकतायाः पर्याप्तिविव-क्षणे गौरवं स्यादतो धूमाधिकरणवृत्तित्वोपलक्षितवन्हिमदन्यत्वमेव विवक्षणीयम् । तथा च वन्ह्युत्पत्तिक्षणेऽपि तादृशवन्हिमदन्यत्वविरहाद् वन्हीतरत्वं यावत्कारणविशेषणमावश्यक-मिति मतं, तत्तुच्छं, धूमाधिकरणवृत्तित्वोपलक्षितवन्हिमदन्यत्वस्य किञ्चिदवच्छेदेन सत्त्वाद् भेदस्याऽव्याप्यवृत्तित्वात् । प्रकारान्तरेण तादृशवन्हिमदन्यत्वविवक्षणे लाघवानवका-शादिति ध्येयम् ।

यत्तु समवायसंबन्धावच्छिन्नकार्यतानिरूपितयावत्कारणधिकरणक्षणस्य धूमाधिकरण-वृत्तित्वविशिष्टवन्हिमदन्यत्वाद् वन्हितत्संयोगेतरत्वं यावत्कारणविशेषणमनर्थकं, वन्हित-त्संयोगादेः संयोगेन धूमं प्रत्येव जनकत्वादिति; तदपि तुच्छं तादृशसमवायावच्छिन्नपारि-भाषिककार्यत्वरूपोत्पन्नत्वेनाऽपादकाभावस्य संयोगावच्छिन्नवन्हिकार्यत्वस्य धूमेऽनुमानाऽ-संभवात् संयोगावच्छिन्नवन्हिकार्यतानिश्चयार्थमेव मूलोक्ततर्कस्याऽनुसरणीयत्वात् ; अन्यथा निरुक्ततर्कस्य वन्हिधूमव्याप्तिग्रहोपयोगित्वोपपादनस्याऽसंगतत्वापत्तिः स्यात् । एतेन समवायावच्छिन्नकार्यतानिरूपितयावत्कारणाधिकरणक्षणकत्वविवक्षणे यादृशस्थले घटा-वयवद्वयसंयोगोत्पत्तिर्दण्डनाशो वन्हिनाशश्चेत्येकः कालस्ततो दण्डान्तरोत्पत्तिस्ततो वन्हि-

धूम एव प्रसिद्धिः। दण्डादिर्यत्किञ्चित्कारणाधिकरणक्षणस्य वह्न्यसमवहितत्वात् नान्तरीयकघटविशेषादौ मूलशैथिल्यनादरणीयत्वाद्ध यावदिति। न च वह्न्यजन्ये वह्न्यभिघातजाततण्डुलादिकर्मणि पाकजरूपादिनाशे च व्यभिचार इति वाच्यम्; संयोगेन स्वसामानाधिकरण्यस्य उत्पन्नत्वघटक-वह्न्यसमवहितत्वघटकतया भेदकूटस्यापाद्यस्य तत्रापि सत्त्वात्।

संयोगोत्पत्तिस्ततः पूर्वावयवद्वयसंयोगाद्घटोत्पत्तिस्तादृशस्थले तादृशघटविशेषे व्यभिचारः, निरुक्तघटावयवद्वयसंयोगाधिकरणक्षणस्य वन्हिमदन्यतादृशकारणाधिकरणक्षणत्वादित्युत्तरमप्यनादेयमिति दिक्।

ननु कारणे यावत्त्वविशेषणमनुपादेयमेवेत्यत आह—**दण्डादीनि**। तथा च वन्हितत्संयोगेतरकारणविशेषणयावत्त्वानुपादाने वन्हिनान्तरीयकघट एव व्यभिचारः तादृशघटीययत्किञ्चिद्दण्डादिकारणाधिकरणक्षणस्य तादृशघटाधिकरणवृत्तिवन्हिमदन्यत्वेन स्वसमानाधिकरणवन्हिमदन्यवन्हितत्संयोगेतरयत्किञ्चिद्दण्डादिकारणाधिकरणक्षणकत्वरूपोत्पन्नत्वस्यैव तादृशघटे सत्त्वेनापाद्यविरहात्। यावत्कारणनिवेशे तु न तत्र व्यभिचारः, वन्हितत्संयोगेतरयावत्कारणाधिकरणक्षणस्य वन्हिमदन्यत्वविरहेण तादृशवन्हिमदन्यत्वविशिष्टतादृशयावत्कारणाधिकरणक्षणकत्वस्य धूमनिष्ठस्याभावरूपापाद्यस्य तत्र सत्त्वादिति भावः। **न चेति**। वाच्यमितिपरेणान्वयः। वन्ह्यजन्ये=वन्हिजन्यत्वाभावरूपापादकवति। **वन्ह्येति**। वन्ह्यभिघातसंयोगजन्या या तत्तत्तण्डुलादिक्रिया तत्रेत्यर्थः। तादृशतण्डुलकर्मणि तादृशवन्हिसंयोगजन्यत्वसत्त्वे यदि वन्हिजन्यत्वमपि तत्र वर्तत एवेत्युच्युते तदाप्याह—**पाकजेति**। विजातीयतेजःसंयोगावच्छिन्नक्रियाजन्ये रूपादिनाशे चेत्यर्थः। निरुक्तक्रियाजन्यरूपादिनाशस्तु न वन्हिजन्य इति तत्राऽपादकसत्त्वं निर्विवादमित्याशयः। **व्यभिचार इति**। तथा च निरुक्ततण्डुलादिकर्मसमानाधिकरणवन्हिमदन्यत्वस्य तादृशकर्मजनकयावत्कारणाधिकरणक्षणे सत्त्वात् स्वपदेन कर्मणो धर्तुं शक्यतया तादृशपारिभाषिकोत्पन्नत्वस्यैव तत्र सत्त्वेन आपाद्यविरहादिति हृदयम्। समाधत्ते—**संयोगेनेति**। **अयमाशयः**—स्वसमानाधिकरणवन्हिमदन्यवन्हितत्संयोगेतरयावत्कारणाधिकरणक्षणकत्वरूपोत्पन्नत्वघटकं स्वसामानाधिकरण्यं स्वाधिकरणवृत्तित्वरूपं, स्वाधिकरणत्वञ्च संयोगेनैव वाच्यम्। एवञ्च निरुक्ततण्डुलक्रियायास्तादृशरूपादिनाशस्य च स्वपदेनोपादानमेव न संभवति, तयोः संयोगेनाधिकरणत्वाऽप्रसिद्धेरतः स्वपदेन धूममादाय तन्निष्ठतादृशक्षणकत्वरूपोत्पन्नत्वस्याभावस्यापाद्यस्य निरुक्ततण्डुलकर्मणि तादृशरूपादिनाशे च सत्त्वान्न व्यभिचार इति। **भेदकूटस्येति**। धूमान्तरे इष्टापत्तिवारणाय संयोगेन स्वसमानाधिकरणवन्हिमदन्यवन्हितत्संयोगेतरयावत्कारणाधिकरणं यद्यत् स्वं तत्तद्व्यक्तित्वावच्छिन्नभेदकूटस्यापाद्यत्वमवश्यं वक्तव्यमिति हृदयम्। तत्रापि=तयोरपि निरुक्ततण्डुलकर्मपाकनाशयोरपीति यावत्। **सत्त्वादिति**। तथा च न व्यभिचार इति भावः।

धूमावयवद्वयसंयोगधूमप्रागभावघटितवन्हितत्संयोगेतरधूमीययावत्कारणक्षणस्य धूमोत्पत्त्यव्यवहितपूर्वक्षणतया तत्र वन्हेरपि सत्त्वेन स्वसमानाधिकरणवह्नितत्संयोगेतरयावत्का-

ननु तथापि आपाद्यप्रतियोगिनो विशिष्टस्याऽप्रसिद्धिः, धूमावयवतदुभयसंयोगधूमप्रागभावघटिततद्धूमीययावत्कारणस्य धूमोत्पत्त्यव्यवहितप्राक्क्षणे एव सत्त्वेन तदानीं वह्नेरपि कारणतया आवश्यकत्वेन धूमीयवह्नितत्संयोगेतरयावत्कारणाधिकरणक्षणस्यापि वह्न्यसमवहितत्वाभावात् धूमेऽपि विशिष्टप्रसिद्ध्यसम्भवात्। न च वह्निविरहेऽपि तदुत्पन्नधूमद्व्यणुकानामेव परस्परसंयोगक्रमेण धूमोत्पादसम्भवात् न तदानीं वह्नेरावश्यकत्वं, धूमनिष्ठजातिविशेषस्यैव वह्नितत्संयोगजन्यतावच्छेदकतया धूमं प्रति तयोर्व्यभिचाराभावात्, तथा च तादृशधूमे एव प्रसिद्धिरिति वाच्यम्; तादृशधूमस्य घटादितुल्यतया तत्र सत्यन्तदलाभावेनैव विशिष्टप्रसिद्ध्यसम्भवात्। न च यावत्कारणपदेन संयोगसम्बन्धावच्छिन्नस्वनिष्ठजन्यता-

---

रणाधिकरणक्षणकत्वं धूमेऽपि न प्रसिद्ध्यतीत्याशङ्कते—**नन्विति**। **आपाद्येति**। पारिभाषिकोत्पन्नत्वरूपस्येत्यर्थः। **विशिष्टस्येति**। स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वविशिष्टस्याप्रसिद्धिरित्यर्थः। केवलस्य पारिभाषिकोत्पन्नत्वस्य वन्हिशून्यतादशायां वन्हिमद्देशोपन्नघटादौ प्रसिद्धिसंभवात् तादृशविशेषणविशेषस्याऽप्रसिद्धिरित्युक्तमिति ध्येयम्। तदानीं=धूमप्रागभावाधिकरणकारणक्षणे। **कारणतयेति**। अन्यथा तस्य धूमस्य घटादिसमशीलत्वापत्तिः स्यादिति भावः। **वन्ह्येति**। धूमसमानाधिकरणवन्हिमदन्यत्वाभावादित्यर्थः। **धूमेऽपीति**। अपिना सर्वत्रैवाऽप्रसिद्धिः सूचिता। **विशिष्टेति**। पूर्वोक्तार्थकम्। ननु वन्ह्यादिजन्यधूमद्व्यणुकाधिकरणक्षणे वन्हिविरहेऽपि परस्परसंयुक्ततादृशद्व्यणुकादित एव धूमोत्पत्तिसंभवात् स्वपदेन धूममेवोपादाय तत्समानाधिकरणवन्हिमदन्यवन्हितत्संयोगेतरयावत्कारणरूपधूमद्व्यणुकसंयोगाद्यधिकरणक्षणकत्वस्य धूमे प्रसिद्धिसंभवात्कथं तादृशमुत्पन्नत्वमप्रसिद्धमित्याशङ्कते—**नचेति**। वाच्यमितिपरेणान्वयः। **तदुत्पन्नेति**। वन्ह्यादिजन्यधूमद्व्यणुकानामेवेत्यर्थः। **परस्परेति**। तादृशद्व्यणुकानां परस्परसंयोगक्रमेणेत्यर्थः। तदानीं=द्व्यणुकसंयोगाधिकरणक्षणे। नन्वेवं वन्हितत्संयोगं विनापि धूमोत्पादे वन्हिसंयोगयोर्धूमं प्रति व्यभिचारित्वमित्यत आह—**धूमनिष्ठेति**। तथा च विजातीयधूमत्वावच्छिन्नं प्रत्येव वन्हितत्संयोगयोर्जनकतया न तयोस्तं प्रति व्यभिचारित्वमित्याशयः। उपसंहरति—**तथाचेति**। धूम एव=वन्हिजन्यतावच्छेदकानाक्रान्तधूम एव। समाधत्ते—**तादृशेति**। निरुक्तद्व्यणुकादिसंयोगजन्यधूमस्येत्यर्थः। **घटादीति**। वन्हिशून्यतादशायां वन्हिमद्देशोत्पन्नघटादितुल्यतयेत्यर्थः। तत्र=तादृशधूमे। **सत्यन्तेति**। स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपस्य सत्यन्तदलस्याऽभावेनेत्यर्थः। सत्यन्तदलस्थस्वपदेन निरुक्तधूमस्यापि धर्त्तुं शक्यत्वात्तदन्यत्वस्य तत्र विरहादिति भावः। **विशिष्टेति**। स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वविशिष्टस्य स्वसमानाधिकरणवन्हिमदन्यवन्हितत्संयोगेतरयावत्काराणाधिकरणक्षणकत्वरूपस्योत्पन्नत्वस्य प्रसिद्ध्यसंभवादित्यर्थः।

पुनः शङ्कते—**नचेति**। वाच्यमितिपरेणान्वयः। **यावत्कारणपदेनेति**। वन्हितत्संयोगेतरेत्यादिः। **संयोगसम्बन्धेति**। संयोगसंबन्धावच्छिन्ना या स्वनिष्ठ-

प्रतियोगिककारणताश्रयो यावान् विवक्षणीयः, भेदकूटं चापाद्यम्, तथा च धूमे एव प्रसिद्धिरिति वाच्यम्; यस्य नान्तरीयकस्य घटविशेषादेः संयोगसम्बन्धावच्छिन्नजन्यताप्रतियोगिककारणताश्रयो दण्डादिर्यावान् वह्न्यनधिकरणकाले वर्तते केवलमवयवसंयोगमात्रं वह्न्यधिकरण एव काले जातं तादृशनान्तरीयके व्यभिचारापत्तिरिति ।

मैवं; यत्र धूमावयवद्वयोत्पत्तिर्वह्नेर्नाशश्चेत्येकः कालः, ततो धूमावयवद्वयसंयोगस्तदनन्तरं न वह्निजन्यतावच्छेदकाक्रान्तधूमोत्पत्तिस्तत्र वह्नितत्संयोगयोः साक्षाद्धेतुत्वेन तद्विरहात्; अपि तु वह्न्यन्तरोत्पत्तिस्ततः संयोगोत्पत्तिस्ततः पूर्वोत्पन्नधूमावयवद्वयसंयोगाद् वह्निजन्यविलक्षणधूमोत्पत्तिस्तत्रैव धूमव्यक्तिविशेषे विशिष्टप्रसिद्धिसम्भवात्, धूमावयवद्वयसंयोगोत्पत्तिक्षणस्यैव तदीयतादृशयावत्कारणाधिकरणत्वेन तदानीं वह्न्यभावस्य सत्त्वात्, उत्पत्तिप्राक्क्षणे च वह्नेः सत्त्वात् ।

जन्यता तन्निरूपितकारणताश्रयो यावानित्यर्थः । **विवक्षणीय इत्यादि** । तथा च स्वसमानाधिकरणवन्हिमदन्यो यः स्वनिष्ठसंयोगसंबन्धावच्छिन्नजन्यतानिरूपितवन्हितत्संयोगेतरयावत्कारणाधिकरणक्षणः स एव यस्य स्वस्य एवम्भूतं यद्यत् स्वं, तत्तद्व्यक्तित्वावच्छिन्नभेदकूटश्चापाद्यमित्यर्थः पर्यवसितः । उपसंहरति—**तथा चेति** । **प्रसिद्धिरिताति** । वन्ह्यसमवहिताजन्यत्वविशिष्टस्य निरुक्तयावत्कारणाधिकरणक्षणकत्वरूपोत्पन्नत्वस्य प्रसिद्धिरित्यर्थः । तथा च संयोगेन धूमोत्पत्तिप्रयोजकवन्हितत्संयोगेतरपर्वतादिरूपतत्तत्कारणाधिकरणक्षणस्य धूमाधिकरणवृत्तिवह्निमदन्यत्वेन स्वपदेन धूमस्यैव धर्तुं शक्यतया यथोक्तोत्पन्नत्वस्य धूमे प्रसिद्धिरिति भावः । यस्य वन्हिनान्तरीयकघटविशेषस्य संयोगेनोत्पादकारणीभूतदण्डादिर्यावानेव तादृशघटाधिकरणवृत्तिवन्हिमदन्यक्षणे वर्त्तते केवलमवयवद्वयसंयोगमात्रं वह्न्यधिकरणकाल उत्पन्नं भवति,तादृशघटविशेषे व्यभिचारः स्याद् यदि यावत्कारणपदेन संयोगसंबन्धावच्छिन्नस्वनिष्ठकार्यतानिरूपितकारणताश्रययावतां विवक्षा स्यात् । निरुक्तघटे स्वसमानाधिकरणवन्हिमदन्यवन्हितत्संयोगेतरतादृशयावत्कारणाधिकरणक्षणकत्वरूपोत्पन्नत्वस्यैव सत्त्वेनापाद्यविरहादित्याशयेन समाधत्ते—**यस्येत्यादि** । वन्ह्यनधिकरणकाल इति तु तादृशदण्डादिकारणाधिकरणक्षणस्य स्वसमानाधिकरणवन्हिमदन्यत्वरक्षार्थं । तादृशघटस्य वन्हिनान्तरीयकत्वरक्षार्थमाह—**केवलमिति** ।

नन्वित्यादेः समाधानं—**मैवमिति** । तथा च यत्रैकस्मिन्काले धूमावयवद्वयोत्पत्ति र्वह्निनाशश्च भवति, ततो धूमावयवद्वयसंयोगो वन्ह्यन्तरोत्पत्तिश्च, ततस्तत्संयोगाद्धूमावयवद्वयसंयोगजन्यस्य वन्हिजन्यतावच्छेदकाक्रान्तधूमविशेषस्योत्पत्तिस्तादृशधूमविशेषे स्वसमानाधिकरणवन्हिमदन्यवन्हितत्संयोगेतरधूमावयवद्वयसंयोगाधिकरणक्षणकत्वरूपपारिभाषिकोत्पन्नत्वस्य प्रसिद्धिरतो नाऽऽपाद्यप्रतियोगिनो विशिष्टस्याऽप्रसिद्धिरिति भावः । निरुक्तधूमोत्पत्तेरव्यवहितप्राक्क्षणे वन्हेरसत्त्वे तस्य वन्हिजन्यत्वं न संभवतीत्याह—**उत्पत्तिप्राक्क्षणे चेति** । न च धूमावयवद्वयसंयोगानन्तरं धूमोत्पत्तिः स्यादिति वाच्यं, कस्यचित्प्रतिबन्धकस्य तदानीं सत्त्वेन धूमोत्पादाऽ-

इत्यत्र किं धूमोऽवह्नेरेव भविष्यति ? क्वचिद् वह्निं विनापि भविष्यति ? अहेतुक एव वोत्पत्स्यत इति शङ्का स्यात्,

---

न च तत्रैव विशिष्टप्रसिद्धौ धूममात्रस्य पक्षत्वाद् धूमान्तरेंऽशत इष्टापत्तिरिति वाच्यम्, पक्षतावच्छेदकावच्छेदेनापत्तेरुद्देश्यत्वादिति प्राहुरिति संक्षेपः ।

अवह्नेरेवेति । न विद्यते वन्हिर्यत्रेतिव्युत्पत्त्या स्वसमानाधिकरणवह्निमद्भिन्नात् क्षणादेवेत्यर्थः । अव्यवहितोत्तरत्वं पञ्चम्यर्थः । *क्वचिद्वन्हि विनापीति*। किंधूमः क्वचिदव्यवहितपूर्वं स्वसामाधिकरणवन्हि विनापि भविष्यतीत्यर्थः । *अहेतुक इति* । कि धूमो निर्हेतुक एवोत्पत्स्यत इत्यर्थः । *इतिशंका स्यादिति* । इति शंका विरोधिनी स्यादित्यर्थः । आद्यशङ्काद्वयस्य सम्प्रदायमते निरुक्तवन्ह्यसमवहिताजन्यत्वरूपपक्षविशेषणाभावविषयकतया तर्कजनकपरामर्शविघटकत्वेन तर्कविरोधित्वात्,

---

संभवात् । नचैवमग्रेऽपि कथं धूमोत्पत्तिरिति वाच्यं तादृशप्रतिबन्धकस्य वन्ह्यन्तरोत्पत्तिक्षणादौ विनाशं कल्पयित्वा तादृशधूमोत्पादसंभवादिति वदन्तीत्यास्तां विस्तरः । निरुक्तधूमव्यक्तिविशेषे यथोक्तपारिभाषिकोत्पन्नत्वस्य प्रसिद्धत्वेऽपि धूमान्तरे तादृशोत्पन्नत्वाभावसत्त्वात्तत्रेष्टापत्तिः स्यादित्याशङ्कते—**न चेति** । तत्रैव=निरुक्तधूमव्यक्तिविशेष एव । विशिष्टप्रसिद्धौ=वन्ह्यसमवहिताजन्यत्वविशिष्टनिरुक्तोत्पन्नत्वस्य प्रसिद्धौ । धूमान्तरे=तादृशधूमव्यक्तिभिन्नधूमे । अंशतः=धूमत्वसामानाधिकरण्येन । इष्टापत्तिः=तादृशापाद्यस्योत्पन्नत्वाभावस्य सत्त्वम् । समाधत्ते—**पक्षतेति** । तथा च धूमत्वसामानाधिकरण्येन कुत्रचिद्धूमे आपाद्यसत्त्वं न क्षतिकरं पक्षतावच्छेदकीभूतधूमत्वावच्छेदेनैव निरुक्तोपन्नत्वाभावापत्तेरुद्देश्यतया धूमत्वावच्छेदेनैवेष्टापत्तेर्दोषत्वादिति भावः । एतन्मतस्य निर्दोषत्वात् प्रकर्षसूचनाय प्राहुरित्युक्तमिति ध्येयम् ।

अवह्नेरेवेत्यादिमूलं व्याकुरुते—**न विद्यत इति** । यत्र=क्षणे । पञ्चम्यर्थमन्तर्भाव्य समुदितार्थमाह—**स्वसमानेति** । तथा च धूमोऽवह्नेरेव भविष्यतीत्यादिप्रथमशङ्का तु 'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणको न वे'त्याकारिका पर्यवसिता । क्वचिदित्यस्यार्थमाह—**क्वचिदव्यवहितपूर्वमिति** । तथा च द्वितीयापि शङ्का धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणको न वे'त्याकारिका पर्यवसिता । प्रथमा धूमत्वावच्छेदेन, द्वितीया तु धूमत्वसामानाधिकरण्येनातो द्वयोर्नाभेद इत्यग्रे स्वयमेव वक्ष्यते । **अहेतुक इतीति** । तथा च 'धूमो निर्हेतुक न वे'त्याकारिका शङ्का तृतीया पर्यवसितेति भावः। **विरोधिनीति** । मूलोक्ततर्क इत्यादिः । मूलोक्ततर्कं प्रति शङ्कात्रयस्य विरोधित्वं व्यवस्थापयति—**आद्यशङ्काद्वयस्येति** । सम्प्रदायमते=उपाध्यायप्रभृतीनां मते । **निरुक्तेति** । स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपधूमात्मकपक्षविशेषणाभावविषयकतयेत्यर्थः । **तर्केति** । तर्कजनको यः पक्षे आपाद्यव्याप्यापादकवत्तानिश्चयरूपः परामर्शस्तद्विघटकत्वेनेत्यर्थः । तर्कविरोधित्वात्=तर्कानुत्पा-

पक्षतावच्छेदकांशेऽनाहार्यपरामर्शस्यैव तर्कजनकत्वात् । नव्यमते तु निरुक्तवह्न्यसमवहिताजन्यत्वरूपापाद्यप्रतियोगिविशेषणाभावविषयकतया तर्कजनकापाद्यव्यतिरेकनिर्णयविघटकत्वेन तर्कविरोधित्वात् । तृतीयायास्तु संप्रदायमते व्याप्यसंशयविधया आपाद्याभाववत्तया निश्चिते

दप्रयोजकत्वात् । अयं भावः—आद्यशङ्काद्वयी च स्वसमानाधिकरणवह्निमदन्यत्वाभावविषयिणी, सा तु संशयसामग्रीसंपादकतया संप्रदायमते स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपपक्षतावच्छेदकविशिष्टे धूमे आपाद्यव्याप्यापादकवत्तानिश्चयरूपपरामर्शप्रतिबन्धिका, तादृशपरामर्शस्य पक्षतावच्छेदकविशिष्टपक्षनिश्चयरूपत्वात्, सुतरां परामर्शानुत्पादेन तर्क एव कारणाभावान्नोत्पद्यत इति । ननु तादृशसंशययोः पक्षविशेषणाभावविषयकत्वेऽपि तादृशसंशयसत्त्वे आहार्यात्मकपरामर्शादेव तर्कः सम्भवतीत्यत आह—**पक्षतेति** । तथा च पक्षविशेषणाभावावगाहिज्ञानानुत्तरजायमानपरामर्शस्यैव तर्कजनकतया निरुक्तसंशयदशायां जायमानपक्षतावच्छेदकांशे आहार्यात्मकपरामर्शात् तर्को न भवत्येवेति हृदयम् ।

दीधितिकारमते तर्ककारणीभूतो निश्चयस्तु 'स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयः, तादृशनिश्चयं प्रति यथोक्तवह्न्यसमवहिताजन्यत्वाभावज्ञानं विशेषणाभावविषयकज्ञानविधया प्रतिबन्धकं, तादृशं च ज्ञानं 'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वे'त्याकारकसंशयः । निरुक्तसंशयसत्त्वे तु यथोक्तापाद्यव्यतिरेकनिश्चय एव न भवति, तादृशनिश्चयाभावे च कारणाभावान्मूलोक्ततर्कोत्पादो न सम्भवतीति तर्कं प्रतिपरम्परया निरुक्तवह्न्यसमवहिताजन्यत्वसंशयः प्रतिबन्धक इत्याह—**नव्यमते त्विति** । दीधितिकृन्मते त्वित्यर्थः । **निरुक्तेति** । स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपं यदापाद्यप्रतियोग्युत्पन्नत्वविशेषणं तदभावविषयकतयेत्यर्थः । **तर्कजनकेति** । न च धूमधर्मिकनिरुक्तवह्न्यसमवहिताजन्यत्वाभावज्ञानात्मकसंशयः कथमुत्पन्नत्वविशेष्यकवह्न्यसमवहिताजन्यत्वविषयकनिश्चये प्रतिबन्धकः विभिन्नधर्मिकत्वादिति वाच्यं, सामानाधिकरण्यसंबन्धेनोत्पन्नत्वविशेष्यकवह्न्यसमवहिताजन्यत्वबुद्धेस्तादृशाजन्यत्वाधिकरणत्वेन धूमावगाहितया तत्रापि धूमधर्मिकतादृशविशेषणसंशयस्य प्रतिबन्धकत्वसंभवादिति ध्येयम् । **तर्कविरोधित्वादिति** । मूलोक्तेत्यादिः । यत्राहेतुकत्वं तत्र वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहिताजन्यत्वमित्यहेतुकत्वं तादृशविशिष्टापादकव्याप्यम् । एवञ्चोत्पन्नत्वाभावाभावरूपापाद्यव्यतिरेकनिश्चयविषयीभूते धूमे अहेतुकत्वसंशयो व्याप्यसंशयविधया निरुक्तविशिष्टापादकसंशये हेतुः, तादृशापादकसंशयस्तु व्यभिचारसंशयः पर्यवसितः, तत्सत्त्वे चाऽपाद्यव्याप्तिज्ञानमेवापादके न संभवति अनाहार्यव्यभिचारसंशयस्य व्याप्तिग्रहविरोधित्वात्, तादृशव्याप्तिग्रहाभावे च तर्कोत्पाद एव न संभवति कारणाभावादिति परम्परया तृतीयाया धूमधर्मिकाहेतुकत्वशङ्कायाः संप्रदायमते तर्कविरोधित्वं निर्विवादमित्याह—**तृतीयास्त्विति** । शङ्काया इति शेषः । **व्याप्येति** । विशिष्टापादकस्येत्यादिः । **आपाद्याभावेति** । इदन्तु अनाहार्यनिश्चितापाद्याभाववति आपादकसंशयात्मकव्यभिचार-

सर्वत्र स्वक्रियाव्याघातः स्यात् ।

पक्षे आपादकसंशयात्मकानाहार्यव्यभिचारसंशयाधायकतया तर्कविरोधित्वात् । नव्यमते आश्रये च पक्षे आपाद्यप्रतियोगिकोटिविशेष्यविरोधित्वेन तर्कजनकापाद्यव्यतिरेकनिश्चयविघटकतया तर्कविरोधित्वादिति भावः । न चाद्ययोः शंकयोरभेद इति वाच्यम्; प्रथमा धूमत्वावच्छेदेन, द्वितीया धूमत्वसामानाधिकरण्येनेति भेदात् ।

नचैवं धूमत्वसामानाधिकरण्येन वन्ह्यसमवन्हिताजन्यत्वसत्त्वेऽपि धूमत्वसामानाधिकरण्येन वन्ह्यसमवहिताजन्यत्वनिश्चये बाधकाभावाद् द्वितीयसंशयस्य कुतः तर्कविरोधित्वमिति वाच्यम्; विशेष्यतावच्छेदकसामानाधिकरण्येन बाधनिश्चयस्य विशेष्यतावच्छेदकसामानाधिकरण्येन विशिष्टबुद्ध्यप्रतिबन्धकत्वेऽपि विशेष्यतावच्छदकसामानाधिकरण्येन बाधसंशयस्य संशयसामग्रीसंपादकतया विशेष्यतावच्छेदकसामानाधिकरण्येन विशिष्टनिश्चयं प्रत्यपि प्रतिबन्धकत्वात् ।

सर्वत्रेति । षष्ठ्यर्थे सप्तमी, सर्वस्याः शङ्काया इत्यर्थः । *स्वक्रिया-

---

संशयप्रदर्शनार्थमभिहितम् । आपादकेति वन्ह्यसमवहिताजन्यत्वविशिष्टवह्निसमवहिताजन्यत्वरूपापादकार्थकम् । **तर्कबिरोधित्वादिति** । मुलोक्तेस्यादिः ।

नव्यमते तु धूमः अहेतुको न वेत्याकारकसंशयो हेतुजन्यत्वसामान्याभावविषयकतया धूमधर्मिकविशिष्टोत्पन्नत्वरूपापाद्यव्यतिरेकनिश्चये प्रतिबन्धकः सामान्यभावज्ञानस्य विशेषवत्ताबुद्धौ प्रतिबन्धकत्वादिति तर्कजनकापाद्यव्यतिरेकनिश्चयविघटकतया मूलोक्ततर्कविरोधित्वं नव्यमते तृतीयाया अपिशङ्कायाः संभवत्येवेत्याह—**नव्यमत** इति । पक्षे=धूमे । प्रथमशङ्काया द्वितीयायाश्च भेदं प्रदर्शयितुं न चेत्याद्याशङ्क्य समाधत्ते-**प्रथमेति** । तथा च प्रथमा स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वशङ्का धूमत्वावच्छेदेन, द्वितीया तु तादृशी शङ्का धूमत्वसामानाधिकरण्येनेति तयोः शङ्कयोर्भेद इति भावः । यथा धर्मितावच्छेदकसामानाधिकरण्येन तदभावनिश्चयो धर्मितावच्छेदकसामानाधिकरण्येन तत्प्रकारकबुद्धिं न प्रतिबध्नाति, तथा द्वितीयाया अपि वन्ह्यसमवहिताजन्यत्वशङ्काया धूमत्वसामानाधिकरण्येन धूमधर्मिकतया धूमत्वसामानाधिकरण्येन धूमधर्मिकवन्ह्यसमवहिताजन्यत्वबुद्धिं मा प्रतिबध्नात्विति द्वितीयशङ्कायाः कथं तर्कविरोधित्वमिति शङ्कते—**न चैवमिति** । एवं=द्वितीयशङ्काया धूमत्वसामानाधिकरण्यावगाहित्वे । समाधत्ते-**विशेष्यतेति** । तथा च बाधनिश्चयस्य सामानाधिकरण्येन विशिष्टबुद्धिप्रतिबन्धकत्वाभाववत्त्वेऽपि धर्मितावच्छेदकीभूतधूमत्वादिसामानाधिकरण्येन तदभावसंशयस्तत्प्रकारकबुद्धिं प्रतिबध्नात्येव, सामानाधिकरण्येन तदभावसंशयस्य सामानाधिकरण्येन तादृशसंशयसामग्रीसंपादकत्वात्, सामानाधिकरण्येन तत्प्रकारकनिश्चयोत्पादासंभवाद्धूमत्वसामानाधिकरण्येन द्वितीयसंशयोऽपि धूमत्वसामानाधिकरण्येन वन्ह्यसमवहिताजन्यत्वनिश्चयं प्रति प्रतिबन्धक एवेति भावः ।

मूलस्यसर्वत्रेत्यत्र सप्तम्यर्थान्वयासंभवादाह—**षष्ठ्यर्थे सप्तमीति** ।

यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात् ? तेन विनापि

व्याघात इति* । स्वं = तर्कप्रयोक्ता पुरुषः, तस्य या क्रिया = वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानं, क्रियते प्रवर्ततेऽनेनेतिव्युत्पत्तेः, तेन व्याघातः तत्प्रयुक्तोऽनुत्पाद इत्यर्थः । अन्वयव्यतिरेकाभ्यां प्रत्यक्षतो वन्हिजन्यत्वनिश्चये एवैतत्तर्कस्य सहकारितया वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्यावश्यं पूर्वं सत्त्वादिति भावः ।

अन्वयव्यतिरेकानुविधायित्वज्ञानस्य तादृशशङ्कानुत्पादप्रयोजकत्वे मानमाह—*यदि हीति* । *गृहीतान्वयेति* । तदन्वयव्यतिरेकानुविधायित्वज्ञानसत्त्वेऽपि तदसमवहिताजन्यत्वं सामान्यतोऽहेतुकत्वं वा शङ्केतेत्यर्थः । परप्रतिपत्त्यर्थं = परकीयशाब्दबोधार्थम् । उपादानं = प्रयत्नः । नियमतः = अन्वयव्यतिरेकाभ्यां प्रत्यक्षेण धूमादिरूपेष्टसाधनतानिश्चयतः । नहि धूमादौ वह्न्याद्यसमवहितोत्पत्तिकत्वस्याहेतुकत्वस्य वा ग्रहस्य सामग्र्यां सत्यां वन्ह्यादौ धूमादिरूपेष्टसाधनतानिश्चयः सम्भवतीत्याह—*तेनेति* । तादृशग्रहसामग्रीसमवधानेनेत्यर्थः । विनापि = विनैव । तत्स-

---

तर्कप्रयोक्ता=तर्कप्रयोगकर्ता । तस्य=तर्कप्रयोक्तुः पुरुषस्य । भावार्थकक्रियायाः शङ्काप्रतिबन्धकत्वे मानाभावादाह-क्रियत इति । तेन=वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानेन । इत्यर्थ इति । तथा च तर्कपूर्वकालीनं यद्वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानं तदेव प्रथमशङ्काया द्वितीयशङ्कायास्तृतीयशङ्कायाश्च प्रतिबन्धकमित्याशयः । ननु वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य तर्कपूर्वकालीनत्वं कथं संभवतीत्यत आह-अन्वयेति । तथा च मूलोक्ततर्केण वह्निजन्यत्वनिश्चयो भवति, तादृशनिश्चये च वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानं कारणम्, अतस्तर्कपूर्वं तादृशज्ञानस्य सत्त्वमावश्यकमिति भावः ।

अन्वयेति । वन्ह्यन्वयेत्यर्थकम् । तादृशेति । स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वशङ्काया अहेतुकत्वशङ्कायाश्चानुत्पादप्रयोजकत्व इत्यर्थः । तदन्वयेति वह्न्यन्वयेत्यर्थकम् । तदसमवहितेति । वन्ह्यसमवहिताजन्यत्वमित्यर्थः । सामान्यत इति । कार्यमहेतुकं नवेत्यर्थः । मूले स्वयमेवेति । शङ्कावान् पुरुष एवेत्यर्थः । तथा च कार्यमात्रे यदि अहेतुकत्वादिशङ्का स्यात्तदा वह्नौ धूमसाधनतानिश्चयासंभवात्, भोजने च तृप्तिसाधन तानिश्चयाऽसंभवात, शब्देऽपि परप्रतिपत्तिसाधनतानिश्चयस्याऽसंभवात्, इष्टसाधनताज्ञानाभावेन वन्ह्यादौ प्रवृत्तिरेव न संभवतीत्याशयपरोऽयं मूलग्रन्थो बोध्यः । टीकायां नियमत इत्यस्य व्याख्यामाह—अन्वयेति । वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानाधीनधूमादिरूपेष्टसाधनतानिश्चयत इत्यर्थः । ग्रहस्य = शङ्कायाः । तादृशेति । वन्ह्यसमवहिताजन्यत्वाहेतुकत्वादिसंशयरूपतादृशसंशयसामग्रीसमवधानेनेत्यर्थः । निरुक्तसंशयसामग्र्या एव तादृशेष्टसाधनतानिश्चयविघटकतया विनापीत्यत्रापिकारस्यैवार्थकत्वमाह—विनैवेति ।

तत्सम्भवात् । तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम् ।

म्भवात् = वह्न्यादौ धूमादिरूपेष्टसाधनतानिर्णयसम्भवात् । ननु कार्यानुत्पादस्य कारणविरहमात्रप्रयुक्तत्वात् कथं तादृशानुत्पादस्य स्वक्रियाप्रयुक्तत्वमत आह-* तस्मादिति * । प्रयत्नान्यथानुपपत्त्येति शेषः । *तदुपादनमेवेति* । वन्ह्युपादानमित्यर्थः । उपादानञ्चोपादत्ते प्रवर्ततेऽनेनेतिकरणव्युत्पत्त्या प्रवृत्तिप्रयोजकीभूतान्वयव्यतिरेकानुविधायित्वज्ञानपरम् ।

यत्तु भावव्युत्पत्त्या उपादानं प्रवृत्तिः, पूर्वमपि स्वक्रियापदं तत्परमिति, तन्न, प्रवृत्तेः शङ्काप्रतिबन्धकत्वे मानाभावात्, प्रवृत्तेः कारणताग्रहोत्तरकालीनत्वेन तत्पूर्ववर्तिशङ्काप्रतिबन्धकत्वासम्भवाच्च ।

केचित्तु करणव्युत्पत्त्या उपादानपदं धूमादिसाधनतानिश्चयपरं, पूर्व-

तथा च तादृशसंशयसामग्र्यभावदशायामेवेत्यर्थः । वन्ह्यादाविति । तथा च वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानसत्त्वेऽपि यदि वन्ह्यसमवहिताजन्यत्वादिसंशयः स्यात्तदा तादृशसंशयस्यैव वन्ह्यादौ धूमसाधनतानिश्चयप्रतिबन्धकतया निरुक्तनिश्चयानुत्पत्तौ धूमार्थं वन्ह्यादौ प्रयत्न एव न संभवतीति हृदयम् ।

नन्विति । कार्यानुत्पादस्य तादृशसंशयादिरूपकार्यानुत्पादस्य । कारणेति । संशयादिकारणीभूतदोषाद्यभावप्रयुक्तत्वादित्यर्थः । स्वक्रियेति पूर्वोक्तार्थकम् । प्रयत्नेति । तथा च वन्ह्यादौ प्रयत्नानुत्पादार्थमेव वन्ह्याद्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य पूर्वोक्तशङ्काप्रतिबन्धकत्वमावश्यकमिति भावः । यथाश्रुतोपादानपदस्य प्रवृत्त्यर्थकत्वे प्रवृत्तेः शङ्काप्रतिबन्धकत्वं न संभवतीत्यत उपादानपदस्य प्रवृत्तिकरणार्थकत्वमाह-उपादत्त इत्यादि । प्रवृत्तिप्रयोजकीभूतेति । इष्टसाधनतानिश्चयं सम्पाद्य अन्वयव्यतिरेकानुविधायित्वज्ञानं प्रवृत्तिप्रयोजकमित्यवधेयम् ।

पूर्वं स्वक्रियापदं तार्किकपुरुषप्रवृत्तिपरम्, अत्राप्युपादानपदं करणल्युटा प्रवृत्तिप्रयोजकीभूतान्वयव्यतिरेकानुविधायित्वज्ञानपरं न वाच्यम्; अपि तु भावल्युटा प्रवृत्तिपरमेव । तथा च तार्किकपुरुषीयप्रवृत्तेरेव सर्वस्या एव पूर्वोक्तायाः शङ्कायाः प्रतिबन्धकत्वं संभवतीतिमतं दूषयितुमुपन्यस्यति—यत्त्विति । पूर्वमपि = पूर्वोक्तमपि । तत्परम् = प्रवृत्तिपरम् । प्रवृत्तेः शङ्काविषयीभूतकोटेरभावानवगाहितया तादृशशङ्काप्रतिबन्धकत्वमप्रामाणिकमित्याशयेन दूषयति—तन्नेति । मानाभावादिति । अभावानवगाहिज्ञानातिरिक्तस्य प्रतिबन्धकताया अदृष्टचरत्वादित्याशयः । न मणिमन्त्रादिन्यायेनैव प्रवृत्तेः शङ्काप्रतिबन्धकताया आवश्यकत्वे उपादानादिपदस्य करणव्युत्पत्तिप्रदर्शनमनर्थकमित्यत आह-प्रवृत्तेरित्यादि । तथा च मूलोक्ततर्केण वह्नौ धूमजनकत्वनिश्चयस्ततः प्रवृत्तिरिति प्रवृत्तेः कारणतानिश्चयोत्तरकालीनत्वात्तत्पूर्ववर्तिवह्न्यसमवहिताजन्यत्वादिसंशयप्रतिबन्धकत्वं न संभवति प्रतिबन्धकस्य शङ्कापूर्वमवस्थितस्यैव शङ्कानुत्पादप्रयोजकतया कारणतानिश्चयोत्तरकालीनायाः प्रवृत्तेस्तादृशशङ्कानुत्पादप्रयोजकत्वाऽसंभवादिति भावः ।

उपादानपदं धूमादिरूपेष्टसाधनतानिश्चयपरम् । एवं पूर्वमपि स्वक्रियापदं तादृश-

शङ्कायां न नियतोपादानं, नियतोपादाने च न शङ्का।

मपि स्वक्रियापदं तत्परमित्याहुस्तदसत्; धूमादिसाधनतानिश्चयस्य तर्कोत्तरकालीनत्वेन तत्पूर्ववर्त्तिशङ्काप्रतिबन्धकत्वाभावात्।

तस्य शङ्काप्रतिबन्धकतायामन्वयव्यतिरेकौ दर्शयति-*शङ्कायामिति*। यत इत्यादिः। यतः शङ्कायामुत्पद्यमानायां न नियतोपादानं=नान्वयव्यतिरेकानुविधायित्वज्ञानं, नियतोपादाने च=अन्वयव्यतिरेकानुविधायित्वज्ञाने च न शङ्केत्यर्थः। नियतमुपादानं यस्येतिव्युत्पत्त्या नियतोपादानपदस्यान्वयव्यतिरेकानुविधायित्वज्ञानपरत्वात्। न च वन्ह्यन्वयव्यतिरेकानुविधायित्वस्य वन्हिसत्त्वे उत्पद्यमानत्वे सति वह्निं विनानुत्पद्यमानत्व-

---

निश्चयपरं करणव्युत्पत्त्यैव बोध्यमित्यपि केषाञ्चिन्मतं दूषयति—तदसदिति। अत्रापि वह्नौ धूमजनकत्वनिश्चयरूपधूमादिसाधनतानिश्चयस्य तर्कोत्तरकालीनत्वात्तर्कपूर्वकालीनायास्तादृशाहेतुकत्वादिशङ्कायाः पूर्वोक्तनिश्चयेन प्रतिबन्धाऽसंभवात्तन्मतं युक्तमिति हृदयम्। तस्य=वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य। शङ्कासत्त्वे अन्वयव्यतिरेकानुविधायित्वज्ञानरूपं शङ्काप्रतिबन्धकं नास्तीत्यवगम्यत इत्याह—शङ्कायामिति। अत्रापि नियतोपादानपदं पूर्वोक्तार्थकमेवेत्याह—नियतोपादानमिति। इष्टसाधनतानिश्चयजन्या प्रवृत्तिरित्यर्थः। अन्वयेति। तथा चेष्टसाधनतानिश्चयं सम्पाद्य वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानमेव प्रवृत्तिप्रयोजकतया नियतोपादानपदेनाभिहितमित्याशयः।

ननु वह्न्यन्वयव्यतिरेकानुविधायित्वस्य स्वसमानाधिकरणवह्निमत्त्वाव्यवहितप्राक्क्षणकत्वे सति स्वसमानाधिकरणवह्निमदन्यत्वाव्यवहितप्राक्क्षणकान्यत्वस्वरूपतया तन्निश्चयस्य धूमः स्वसमानाधिकरणवह्निमदन्यत्वाव्यवहितप्राक्क्षणकान्यो न वेत्याकारकवन्ह्यसमवहिताजन्यत्वसंशयात्मकस्वसमानाधिकरणवह्निमदन्यत्वाव्यवहितप्राक्क्षणकान्यत्वाभावबुद्धौ तदभावप्रकारकनिश्चयविधया प्रतिबन्धकत्वं तु निर्विवादमेव। धूमत्वावच्छेदेन तादृशप्राक्क्षणकान्यत्वाभावबुद्धौ धूमत्वसामानाधिकरण्येन यथोक्तवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य प्रतिबन्धकतायाः सर्वानुभवसिद्धत्वात्। एवमपि धूमोऽहेतुको नवेत्याकारकतृतीयशङ्कां प्रति कथमुक्तवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य प्रतिबन्धकत्वं निरुक्तसंशयात्मकाहेतुकत्वबुद्धौ तादृशाहेतुकत्वाद्यभावनिश्चयस्यैव तदभावप्रकारकनिश्चयविधया प्रतिबन्धकतया निरुक्तवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य निरुक्ताहेतुकत्वसंशयीयकोट्यभावानवगाहित्वात्। एवं धूमत्वसामानाधिकरण्येन प्रागुक्तवह्न्यसमवहिताजन्यत्वसंशयात्मकद्वितीयशङ्कां प्रत्यपि कथं वोक्तवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य प्रतिबन्धकत्वं संभवति निरुक्तनिश्चयस्य तादृशसंशयीयकोट्यभावावगाहित्वेऽपि सामानाधिकरण्यावगाहिवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य सामानाधिकरण्यावगाहिवह्न्यसमवहिताजन्यत्वाभावाभावावगाहिसंशयाऽप्रतिबन्धकत्वादित्याशङ्कते-नचेति। वह्नौति। स्वसमानाधिकरणवह्निमत्त्वाव्यवहितप्राक्क्षणकत्वे सतीत्यर्थः। वह्निं विनेति।

रूपतया निरुक्तवह्न्यसमवहितजन्यत्वाभावघटितत्वेन तन्निश्चयस्य बाधनिश्चयतया प्रथमसंशयप्रतिबन्धकत्वसम्भवेऽपि विरोध्यविषयकतया कथं तृतीयशङ्काप्रतिबन्धकत्वं ? कथं वा द्वितीयशङ्काप्रतिबन्धकत्वमपि ? अंशतो बाधनिश्चयस्य विशेष्यतावच्छेदकसामानाधिकरण्येन संशया प्रतिबन्धकतया बाधनिश्चयविधया द्वितीयशङ्काप्रतिबन्धकत्वासंभवादिति वाच्यम्; वह्न्यन्वयव्यतिरेकानुविधायित्वावच्छेदेन वह्निजन्यालोकादा नान्तरीयकवह्निके घटादौ च वह्न्यसमवहिताजन्यत्वसहेतुकत्वनिश्चयात् व्यावर्तकधर्मदर्शनविधयैव तस्य तादृशशङ्कायामपि प्रतिबन्धकत्वात्। न चांशतो

स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपतयेत्यर्थः । **निरुक्तेति** । स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वाभावघटिततयेत्यर्थः । तन्निश्चयस्य = निरुक्तप्राक्क्षणकत्वाभावघटितवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य । बाधनिश्चयतया = धूमधर्मिकवह्न्यसमवहिताजन्यत्वसंशयविषयीभूतवह्न्यसमवहिताजन्यत्वाभावाभावनिश्चयरूपतया वह्न्यसमवहिताजन्यत्वनिश्चयरूपतयेति यावत् । विरुद्धविषयकतया=धूमधर्मिकाहेतुकत्वसंशयीयाहेतुकत्वाद्यभावाविषयकतया । **द्वितीयशङ्केति** । न च वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य धूमत्वावच्छेदेन स्वीकारादेव प्रथमशङ्कां प्रति, समानाधिकरण्येन द्वितीयशङ्कां प्रत्यपि प्रतिबन्धकत्वसंभवे कथं वा द्वितीयशङ्केत्याद्यभिधानमसङ्गतमिति वाच्यं, वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य प्रत्यक्षनिश्चयात्मकतया धूमत्वावच्छेदेन तन्निश्चयोत्पादासंभवादिति भावः । अंशतः=सामानाधिकरण्येन । बाधनिश्चयविधया=द्वितीयशङ्काविषयकोटयभावावगाहिनिश्चयत्वेन वह्न्यन्वयव्यतिरेकानुविधायित्ववान् वह्न्यसमवहिताजन्यत्ववान् वह्न्यन्वयव्यतिरेकानुविधायित्ववांश्च धूम इत्याकारकनिश्चयविशिष्टनिश्चयस्य धूमधर्मिकवह्न्यसमवहिताजन्यत्वाभावबुद्धौ प्रतिबन्धकताया वह्न्यन्वयव्यतिरेकानुविधायित्ववान् सहेतुकत्ववान् वह्न्यन्वयव्यतिरेकानुविधायित्ववांश्च धूमइत्यकारकनिश्चयविशिष्टनिश्चयस्य धूमधर्मिकसहेतुकत्वाभावबुद्धावपि प्रतिबन्धकतायाश्च सर्वानुभवसिद्धतया तादृशनिश्चयविशिष्टनिश्चयमादायैव धूमो वन्ह्यसमवहिताजन्यो न वेत्याकारकद्वितीयशङ्काया धूमो सहेतुको न वेत्यकारकतृतीयशङ्कायाश्चानुत्पादस्यैव मूलाभिप्रेतत्वमित्याशयेन समाधत्ते—**वह्न्यन्वयव्यतिरेकानुविधायित्वावच्छेदेनेति** । यत्र वह्न्यन्वव्यतिकानुविधायित्वं तत्रैव वह्न्यसमवहिताजन्यत्वं सहेतुकत्वञ्चेति प्रदर्शयितुमाह—**वह्निजन्येति** । न केवलं वह्निजन्यालोकादौ तादृशावच्छेदकधर्मदर्शनमपि तु अन्यत्रापीत्याह—**नान्तरीयकेति** । वह्न्येति = प्रत्यक्षत इत्यादिः । **व्यावर्त्तकेति** । सहेतुकत्वाभावादिव्यावृत्तिप्रयोजकीभूतावच्छेदकधर्मदर्शनतयैवेत्यर्थः । एवकारादवच्छेदकधर्मदर्शनानात्मकवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य सहेतुकत्वादिसंशयप्रतिबन्धकत्वव्यवच्छेदः । तस्य = तादृशान्वव्यतिरेकानुविधायित्वनिश्चयस्य ।

ननु यथा सामानाधिकरण्येन बाधनिश्चयः सामानाधिकरण्येन तत्प्रकारकबुद्धौ न प्रतिबन्धकस्तथा धूमत्वसामानाधिकरण्येन निरुक्तव्यावर्त्तकधर्मदर्शनमपि धूमत्वसामाना-

बाधनिश्चयवत् अंशतो व्यावर्तकधर्मदर्शनमपि न विशेष्यतावच्छेदकसामानाधिकरण्येन संशयनिवर्तकमिति वाच्यम्; बाधनिश्चयस्थले तथा नियमेऽपि व्यावर्तकधर्मदर्शनादिस्थले तथानियमविरहात् । न चैवं वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानं व्यावर्तकधर्मदर्शनविधया वह्निजन्यत्वसंशयं प्रत्येव प्रतिबन्धकमस्तु किमुक्ततर्केणेति वाच्यम्; अनन्यथासिद्धत्वाविशेषितस्य वह्न्यन्वयव्यतिरेकानुविधायित्वस्य नान्तरीयकवह्निके घटादौ वह्निजन्यत्वव्यभिचारितया वह्निजन्यत्वाभावव्यावर्तकत्वाभावात् तद्विशेषितस्य वह्न्यन्वयव्यतिरेकानुविधायित्वस्य च वह्निजन्यत्वानतिरिक्तत्वात्,

---

धिकरण्येन वन्ह्यसमवहिताजन्यत्वाभावबुद्ध्यात्मकद्वितीयशङ्कां मा प्रतिबध्नात्वित्येवं पुनरप्याशङ्क्य समाधत्ते-**बाधेति** । तथा च सामानाधिकरण्येन बाधनिश्चयस्य सामानाधिकरण्येन तत्प्रकारकबुद्धावप्रतिबन्धकत्वेऽपि सामानाधिकरण्येनावच्छेदकधर्मदर्शनस्य सामानाधिकरण्येनापि तत्प्रकारकबुद्धिप्रतिबन्धकत्वं प्राचीनमतसिद्धमेवेति भावः । **नचैवमिति** । एवं=वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्यावच्छेदकधर्मदर्शनविधया द्वितीयशङ्कां प्रति तृतीयशङ्कां प्रत्यपि प्रतिबन्धकत्वाभ्युपगमे ।

व्यावर्तकेति । तथा च वन्ह्यन्वयव्यतिरेकानुविधायित्ववान् वह्निजन्यत्ववान्, वन्ह्यन्वयव्यतिरेकानुविधायित्ववांश्च धूम इत्याकारकनिश्चयविशिष्टनिश्चयस्य धूमधर्मिकवह्निजन्यत्वाभावबुद्धौ प्रतिबन्धकतया धूमो वह्निजन्यो न वेत्याकारकसंशयं प्रत्यपि निरुक्तरीत्या वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्यैव प्रतिबन्धकत्वसंभवे मूलोक्ततर्कानुसरणं विफलं स्यात्, वह्निजन्यत्वसंशयनिवृत्त्यर्थमेव निरुक्ततर्कानुसरणस्याऽऽवश्यकतायाः पूर्वमभिहितत्वादित्येवं शङ्काग्रन्थस्य तात्पर्यमवसेयम् ।

वन्ह्यन्वयव्यतिरेकानुविधायित्वमात्रस्य तु नान्तरीयकवह्निके घटादौ वर्तमानतया तत्र वह्निजन्यत्वाऽसत्त्वेन वन्ह्यन्वयव्यतिरेकानुविधायित्वस्य वह्निजन्यत्वव्यभिचारित्वाद्वह्निजन्यत्वाभावव्यावृत्तिप्रयोजकतायास्तत्र वक्तुमशक्यत्वात् । अन्यथासिद्धत्वानिरूपकत्वविशिष्टस्य वन्ह्यन्वयव्यतिरेकानुविधायित्वस्य तादृशघटादाववर्तमानस्याऽऽलोकादिनिष्ठस्य वह्निजन्यतावच्छेदकतया वह्निजन्यत्वाभावव्यावर्तकत्वसंभवेऽपि अनन्यथासिद्धत्वविशिष्टस्य वह्न्यन्वयव्यतिरेकानुविधायित्वस्य वह्निजन्यत्वस्वरूपतया तन्निश्चयस्य तर्कोत्तरकालीनत्वेन तस्य तर्कपूर्वकालीनशङ्काप्रतिबन्धकत्वाऽसंभवात्, स्वस्य स्वावच्छेदकत्वाऽसंभवाच्च न तर्कवैफल्यमित्याह—**अनन्यथेति** । अन्यथासिद्धत्वाऽनिरूपकत्वाविशेषितस्येत्यर्थः । **नान्तरीयकेति** । तादृशघटे केवलस्य वन्ह्यन्वयव्यतिरेकानुविधायित्वस्य सत्त्वेऽपि वह्निजन्यत्वस्य तत्र विरहादिति भावः । तद्विशेषितस्य=अनन्यथासिद्धत्वविशिष्टस्य । **वह्निजन्यत्वेति** । वह्निजन्यत्वस्य वह्निजन्यतावच्छेदकधर्मत्वं न संभवति, न वा तादृशवह्निजन्यत्वनिश्चयस्तर्कपूर्वकालीन इति हृदयम् ।

ननु अनन्यथासिद्धत्वाविशेषितवन्ह्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य वह्निनान्तरीयकघटादौ सत्त्वेऽपि तत्र वह्निजन्यत्वव्यभिचाराऽग्रहकाले भ्रमात्मकवह्निजन्यत्वनिश्चयसंभवाद् वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानमेवावच्छेदकधर्मदर्शनविधया वह्निजन्यत्वशङ्काप्र-

उपायान्तरस्य उपायान्तरादूषकत्वाच्च ।

न च सर्वत्र धूमे वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानविरहाद् यत्र तादृशज्ञानं तत्र वह्न्यसमवहितजन्यत्वादिसंशयासम्भवेऽपि धूमान्तरे तत्संशये किं बाधकमिति वाच्यम्; समानधर्मितावच्छेदककव्यावर्तकधर्मदर्शनस्यैव प्रतिबन्धकतया धूमत्वरूपेण यत्किञ्चिद्धूमे वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानसत्त्वे धूमान्तरेऽपि तेन रूपेण वह्न्यसमवहितजन्यत्वसंशयायोगात्, गृहीतान्वयव्यतिरेकधूमव्यक्तिविशेषस्यैव वा धूमत्वरूपेण तर्के पक्षतया धूमान्तरे तत्संशयेऽपि क्षतिविरहात् ।

तिबन्धकत्वं संभवतीति तर्कवैफल्यं दुर्वारमेवेत्यत आह—उपायेति । निरुक्तावच्छेदकधर्मदर्शनात्मकतर्कातिरिक्तवह्निजन्यत्वशङ्काप्रतिबन्धकस्येत्यर्थः । उपायान्तरेति । तर्करूपोपायान्तरस्याऽदूषकत्वादित्यर्थः । तथा चैकेन वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानेन वह्निजन्यत्वशङ्कानिवृत्तिसंभवेऽपि तन्निवृत्त्यर्थं तर्कानुसरणस्य न वैफल्यम्, एकस्मिन् कार्ये नानाप्रतिबन्धकसद्भावे क्षतिविरहादिति भावः ।

अथ प्रत्यक्षतः कुत्रचिद्धूमे वन्ह्यन्वयव्यतिरेकानुविधायित्वनिश्चयसंभवेऽपि यस्मिन् धूमे तादृशनिश्चयो नोत्पन्नस्तत्र वन्ह्यसमवहिताजन्यत्वसंशयः स्यात् प्रत्यक्षतस्तादृशान्वयव्यतिरेकानुविधायित्वनिश्चयस्य सर्वत्र धूमेऽसंभवात् । न चेष्टापत्तिः अवच्छेदावच्छेदेनैवापत्तेरुद्देश्यत्वादिति न चेत्यादिनाऽऽशङ्क्य समाधत्ते—समानेति । धूमत्वादिसमानधर्मितावच्छेदककवह्न्यन्वयव्यतिरेकानुविधायित्वरूपव्यावर्त्तकधर्मदर्शनस्यैवेत्यर्थः । प्रतिबन्धकेति । तथा च यद्रूपावच्छिन्नविशेष्यकयद्व्यावर्त्तकधर्मज्ञानं भवति तद्रूपावच्छिन्नविशेष्यकतत्प्रकारकज्ञानं प्रत्येव व्यावर्त्तकधर्मदर्शनं प्रतिबन्धकमिति धूमत्वेन रूपेण वह्न्यसमवहिताजन्यत्वाभावव्यावर्त्तकवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य यत्किञ्चिद्धूमधर्मिकत्वेऽपि धूमत्वेन रूपेण धूमान्तरे वह्न्यसमवहिताजन्यत्वाभावकोटिकसंशयप्रतिबन्धकत्वं निराबाधमेवेत्याशयः । यदि च धूमत्वेन रूपेण यत्किञ्चिद्धूमे वह्न्यन्वयव्यतिरेकानुविधायित्वरूपव्यावर्त्तकधर्मज्ञानसत्त्वे धूमान्तरे तादृशज्ञानं न वह्न्यसमवहिताजन्यत्वज्ञानं प्रति प्रतिबन्धकं समानविशेष्यकत्वस्यैव प्रतिबन्धकतायां तन्त्रत्वादित्युच्यते तदाप्याह—गृहीतेति । वह्न्यन्वयव्यतिरेकानुविधायिधूमव्यक्तिविशेषस्यैवेत्यर्थः । तर्के=मूलोक्ततर्के । धूमान्तरे=गृहीतान्वयव्यतिरेकधूमभिन्ने धूमे । तत्संशयेऽपि=वह्न्यसमवहिताजन्यत्वसंशयेऽपि । क्षतिविरहादिति । तथा च वह्न्यन्वयव्यतिरेकानुविधायी धूमो यदि वह्निजन्यत्वाभाववान् स्यात्तदा वह्न्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाववान् स्यादित्यस्यैव नव्यमतसिद्धतर्कतया धूमान्तरस्य पक्षत्वाभावेन तत्र वह्न्यसमवहिताजन्यत्वस्य सन्देहेऽपि निरुक्ततर्के तादृशसन्देहस्याऽप्रतिबन्धकतया निरुक्तगृहीतान्वयव्यतिरेकधूमपक्षकतर्कोत्पत्तौ बाधकाभावादित्याशयः ।

नन्वेवमपि मूलोक्ततर्कप्रतिबन्धकस्य वह्न्यसमवहिताजन्यत्वादिसंशयस्य निरुक्ततर्कभिन्नतर्केतरवह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानान्निवृत्तावपि यथोक्ततर्कमूलीभूतव्याप्तिग्रहप्रतिबन्धकव्यभिचारसंशयप्रतिबन्धार्थं तर्कान्तरानुसरणावश्यकत्वेऽनवस्था स्यात् । य-

न चैतावता वह्न्यसमवहितजन्यत्वादिसंशयस्य तर्कतरप्रतिबन्धकवशान्निवृत्तावपि व्यभिचारसंशयनिवृत्त्यर्थमवश्यं तर्कान्तरापेक्षा, पक्षभिन्ने आपाद्याभावविरहेऽपि आपाद्याभावांशे भ्रमात्मकस्य पक्षभिन्ने व्यभिचारसंशयस्य सम्भवादिति वाच्यम्; अनायत्या व्यभिचारसंशयं प्रत्यपि तत्तदन्वयव्यतिरेकानुविधायित्वज्ञानव्यक्तेर्विरोध्यविषयकत्वेऽपि प्रतिबन्धक-

---

द्यपि नव्यमते वह्न्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वरूपापाद्याभावस्य धूम एव प्रसिद्धतया तत्र चापादकाभावस्य वह्निजन्यत्वस्य निश्चितत्वेनापादके आपाद्याभाववद्वृत्तित्वरूपव्यभिचारसंशय एव न संभवति, तथापि पक्षीभूतधूमातिरिक्तरासभादौ तादृशोत्पन्नत्वरूपापाद्याभावभ्रमसंशयदशायां तत्रापादकस्यापि संशये निरुक्तोत्पन्नत्वरूपविशेषणसंशयाधीनस्य विशिष्टोत्पन्नत्ववद्वृत्तित्वरूपव्यभिचारसंशयस्यौचित्यावर्जनस्यापादके सत्त्वं नासंभवीति तादृशव्यभिचारशङ्कानिवृत्त्यर्थं तर्कान्तरानुसरणेऽनवस्था इत्यादिराशङ्कते—**नचेति** । वाच्यमित्यन्वयि । **तर्कतरेति** । वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानरूपप्रतिबन्धकवशादित्यर्थः । निवृत्तावपि = अनुत्पादेऽपि । **तर्कान्तरापेक्षेति** । तथा चानवस्था तदवस्थेति भावः । **आपाद्याभावविरहेऽपीति** । इदन्तु नव्यमतानुसारेण बोध्यम् । संप्रदायमते तु उत्पन्नत्वमात्रस्यैवाऽपाद्याभावतया तस्य पक्षीभूतधूमातिरिक्तेऽपि प्रसिद्धिसंभवादिति ध्येयम् । पक्षभिन्ने = धूमभिन्नरासभादौ । व्यभिचारसंशयस्य = आपाद्याभावभ्रमविषयीभूते रासभादौ आपादकवृत्तित्वसंशयस्य ।

समाधत्ते—**अनायत्येति** । उपायान्तराभावादित्यादिः । **तत्तदिति** । तद्व्यक्तित्वेन प्रतिबन्धकत्वकल्पनार्थकम्, तेन न विनिगमनाविरह इति भावः । विरुद्धविषयकत्वेऽपि = ग्राह्याभावानवगाहित्वेऽपि, तादृशव्यभिचाराद्यभावानवगाहित्वेऽपीति यावत् । **प्रतिबन्धकत्वोपगमादिति** । मणिमन्त्रादिन्यायेनेत्यादिः । तथा च निरुक्ततर्कमूलीभूतव्याप्तिग्रहप्रतिबन्धकव्यभिचारसंशयस्याऽपि तर्कान्तरं विनैव निरुक्तवह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानादेवानुत्पादसंभवे नानवस्थेत्याशयः ।

केचित्तु निरुक्ततर्कमूलीभूतव्याप्तिग्रहप्रतिबन्धकव्यभिचारसंशयं प्रत्यपि यद्यन्वयव्यतिरेकानुविधायित्वज्ञानं प्रतिबन्धकं तदा संप्रदायविदामुपाध्यायप्रभृतीनां मते धूमेऽहेतुकत्वसंशयस्य व्याप्यसंशयविधया व्यभिचारसंशयप्रयोजकत्वेन तर्कविरोधित्वाभिधानमसंगतं स्यात् । अन्वयव्यतिरेकानुविधायित्वज्ञानेनैव तादृशव्यभिचारसंशयानुत्पादसंभवे अहेतुकत्वसंशयस्याऽकिञ्चित्करत्वादित्याक्षिप्य वन्ह्यन्वयव्यतिरेणानुविधायित्वाभावव्याप्यस्याऽहेतुकत्वस्य वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानोत्तरसंशये तादृशज्ञाने अप्रामाण्यसंशयस्तावदुत्पद्यते । तद्वत्ताज्ञानोत्तरं तदभावव्याप्यसंशयस्य तत्प्रकारकनिश्चयविशेष्यकाप्रमाण्यसंशयप्रयोजकत्वादिति अहेतुकत्वसंशयनिवृत्तिं विना व्यभिचारशङ्काऽनुत्पाद एव न संभवत्यतोऽन्वयव्यतिरेकानुविधायित्वज्ञानस्य तर्कविरोध्यहेतुकत्वसंशयप्रतिबन्धकत्वं व्यवस्थापितमिति त एव समाहितवन्तस्तदसत्, पक्षभिन्ने आपाद्याभावविरहेणेत्यादिना नव्यमत एव व्यभिचारसंशयं प्रति वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य प्रतिबन्धकताया व्यवस्थापिततया संप्रदायविदां मतेऽहेतुकत्वसंशयं विना तादृशव्यभिचारसंशयस्याऽनभ्युपगमात् ।

तदिदमुक्तं "तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघाता न भवन्तीति; न हि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते, तत्कारणं तन्नेत्याशङ्क्यते चे"ति।

एतेन व्याघातो विरोधः स च सहानवस्थाननियम इति

स्वोपगमात्। एवं क्रमेण वह्निजन्यत्वादिसंशयं प्रत्येव तस्य प्रतिबन्धकत्वसंभवेऽपि उपायान्तरस्योपायान्तराऽदूषकत्वान्न तर्कवैयर्थ्यमिति भावः।

स्वोक्ते प्राचां संवादमाह-*तदिदमुक्तमिति*। तदेवेत्याद्याशङ्क्यते चेत्यन्तं प्राचीनग्रन्थः। आशङ्क्यते=प्रवृत्तिपूर्वं शङ्काविषयो भवति। आशङ्क्यमाने=प्रवृत्तिपूर्वं सन्देहविषये सति। *स्वक्रियेति*। स्वक्रियायाः स्वप्रवृत्तेर्व्याघातो न भवतीत्यर्थः।

ननु धूमोऽवह्नेरेव भविष्यतीत्यादिसंशयेऽपि प्रवृत्तिर्नानुपयुक्तेत्यत आह—*न हीति*। नियमतः=धूमादिरूपेष्टसाधनतः निर्णयतः, उपादत्ते=प्रयत्नविषयं कुरुते। *तत्कारणमिति*। तदव्यवहितपूर्ववर्त्ति तन्नेत्यर्थः, धूमोऽवह्नेरेव भविष्यतीत्यादिसंशयस्यैव प्रतिबन्धकत्वात्।

एतेनेति। निरस्तमित्यनेनान्वयः। तत्रापि=तज्ज्ञानेऽपि स्वक्रियाया व्याघातज्ञानं प्रतिबन्धकमुक्तं; व्याघातश्च विरोधः, विरोधश्च स्वक्रियायास्तादृशसंशयेन सहानवस्थाननियमः, नियमश्च व्याप्तिरेवेति तज्ज्ञानेऽपि व्यभिचारशङ्का विरोधिनी, तन्निवृत्तिश्च तर्कान्तरादित्यनवस्थेत्यर्थः।

अहेतुकत्वशङ्कानिवृत्त्यर्थं तन्मतेऽन्वयव्यतिरेकानुविधायित्वज्ञानस्य प्रतिबन्धकताया एवाऽऽवश्यकत्वादिति ध्येयम्। नन्वेवं वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानं वह्निजन्यत्वसंशयप्रतिबन्धकमपि स्यादित्याशङ्कते-**एवं क्रमेणेति**। तस्य=तादृशान्वयव्यतिरेकानुविधायित्वज्ञानस्य। **उपायान्तरस्येति**। पूर्वोक्तार्थकम्। **न तर्कवैयर्थ्यमिति**। तथा च तादृशान्वयव्यतिरेकानुविधायित्वज्ञानस्य वह्निजन्यत्वशङ्काप्रतिबन्धकत्वेऽपि न क्षतिः, तर्केणापि तादृशशङ्कानुत्पादसंभवादिति हृदयम्।

स्वोक्त इति। मूलकारोक्त इत्यर्थः। **प्रवृत्तिपूर्वमिति**। तार्किकपुरुषस्येत्यादिः। स्वक्रियेतीति स्वक्रियापदं प्रवृत्तिपरमेवेत्याह—**स्वप्रवृत्तेरिति**। धूमो वह्न्यसमवहिताजन्यो न वेत्यादिसंशयेऽपि प्रवृत्तिः स्यात्, न स्यादित्यर्थपरं मूलमवतारयति—**नहीतीति**। **निर्णयत इति**। तथा च वह्नौ धूमादिसाधनतानिश्चयप्रयोजकीभूतवह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य पूर्वं सत्त्वेन तत एव तादृशसंशयनिवृत्तौ न प्रवृत्तिव्याघात इत्याशयः। यद्यपि शङ्कासत्त्वमावश्यकं स्यात्तदा तादृशशङ्काया एव प्रतिबन्धकतया इष्टसाधनतानिश्चयानुत्पादात्प्रवृत्तिरेव न भवतीत्याशयेनाह-**धूमोऽवह्नेरेवेति**। तज्ज्ञानेऽपि=सहानवस्थाननियमज्ञानेऽपि। **सहानवस्थानेति**। तादृशसंशयाधिकरणावृत्तित्वनियम इत्यर्थः। तज्ज्ञानेऽपि=नियमात्मकव्याप्तिज्ञानेऽपि। तन्निवृत्तिश्च=व्यभिचारशङ्कानिवृत्तिश्च। **तर्का**-

तत्राप्यनवस्थेति निरस्तम्, स्वक्रियाया एव शङ्काप्रतिबन्धकत्वात् । अतएव "व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् । व्याघा-

---

स्वक्रियाया इति । स्वस्य क्रिया प्रवृत्तिर्यस्येति व्युत्पत्त्या स्वक्रियाप्रयोजकीभूतनियतान्वयव्यतिरेकानुविधायित्वबुद्धेरित्यर्थः । *व्याघातो यदीति* । व्याघातो यद्यस्ति तदा शङ्काप्यवश्यमस्तीत्यर्थः। स्वक्रियावृत्तिशङ्काप्रतियोगिकविरोधरूपस्य व्याघातस्य प्रतियोगिनीं शङ्कां विना स्थातुमशक्यत्वादित्यभिमानः । *न चेदिति* । न चेद्व्याघातस्तदा, ततः=प्रतिबन्धकाभावतः, तरां=सुतरां शङ्केत्यर्थः । *व्याघातावधिरिति* । तथा चेत्यादिः । व्याघातावधिः=व्याघातनिवर्त्या व्याघातप्रतिबध्याऽऽशङ्का, तर्कश्च शङ्कावधिः=शङ्कानिवर्तकः कुत इत्यर्थः । व्याघातसत्त्वे शङ्काया आवश्यकत्वे,

---

न्तरादिति । प्रकृततर्कभिन्नात्तर्कादित्यर्थः । स्वस्य=तार्किकपुरुषस्य । स्वक्रियेति । तथा च प्रवृत्तिप्रयोजकीभूतनियतान्वयव्यतिरेकानुविधायित्वज्ञानस्य तर्कपूर्वं सत्त्वात्तत एव शङ्कानुत्पादसम्भवे तादृशशङ्कया सहानवस्थाननियमस्यानभ्युपगमेन निरुक्तनियमप्रतिबन्धकव्यभिचारशङ्कानिवृत्त्यर्थं तर्कान्तरस्यावश्यकतैव नास्तीति कुतोऽनवस्थेति भावः ।

'शङ्का चेदनुमास्त्येवे'त्यादिकुसुमाञ्जलिकारिकया उदयनाचार्येण कुत्रचित्तर्कप्रतिबन्धकीभूतां शङ्कां प्रति व्याघातस्य प्रतिबन्धकत्वमुक्त्वा अनवस्थापरिहारः कृतः । तदुपरि खण्डनकारेण तावदेवमाशङ्कितं यदि प्रवृत्तिप्रयोजकीभूतान्वयव्यतिरेकानुविधायित्वज्ञानं कुत्रचिच्छङ्काप्रतिबन्धकं स्यात्तदा प्रतिबन्धकस्य शङ्काधिकरणावर्त्तमानरूपस्य शङ्कानुत्पादेऽवस्थितिरेव न स्यात् प्रतिबन्धकस्य प्रतिबध्यप्रतियोगिकतया प्रतिबन्धकसत्त्वे प्रतिबध्यीभूतायास्तत्प्रतियोगिन्याः शङ्काया आवश्यकत्वादिति । शङ्कासत्त्वे कुतो व्याघातस्य शङ्काप्रतिबन्धकत्वमितिनिरुक्ताभिमानं मूलकृन्निराकरोति—व्याघातो यदीति । मूलं व्याचष्टे टीकायां—व्याघातवित्यादि । प्रवृत्तिप्रयोजकीभूतान्वयव्यतिरेकानुविधायित्वज्ञानं यद्यस्तीत्यर्थः । तादृशज्ञानसत्त्वे शङ्कासत्त्वस्यावश्यकत्वं द्रढीकरोति—स्वक्रियेति । स्वक्रिया=प्रवृत्तिप्रयोजकीभूतान्वयव्यतिरेकानुविधायित्वज्ञानं, तन्निष्ठो यः शङ्काप्रतियोगिको विरोधः=शङ्काधिकरणावृत्तित्वं, तद्रूपस्य=तद्विशिष्टस्य तादृशज्ञानस्येत्यर्थः । व्याघातस्य=तादृशान्वयव्यतिरेकानुविधायित्वज्ञानरूपप्रतिबन्धकस्य । प्रतियोगिनीमिति । शङ्काधिकरणवृत्तित्वाभावप्रतियोगिकोटौ शङ्कायाः प्रविष्टत्वादिति भावः । घटाभावस्य प्रतियोगिनं घटं विनाऽप्यवस्थितेरनुभवसिद्धत्वादित्यभिमान इत्युक्तम् । व्याघातः=अन्वयव्यतिरेकानुविधायित्वज्ञानरूपप्रतिबन्धकः । प्रतिबन्धकाभावतः=तादृशव्याघाताभावतः । व्याघातनिवर्त्या=व्याघातप्रतिबध्या । शङ्कानिवर्त्तकः=शङ्काप्रतिबन्धकः । भावमाह—व्याघातेति । पूर्वोक्तार्थकम् । अयमाशयः—शङ्काधिकरणावृत्तित्वविशिष्टं वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानं यदि निरुक्ततर्कपूर्वमवश्यं वर्त्तते तदा शङ्काया अपि सत्त्वमावश्यकं, प्रतियोगिनिरूपकस्य वस्तुनः प्रतियोगिनं विनाऽवस्थितेर्वक्तुमशक्यत्वात्, तथा

तावधिराशङ्का तर्कः शङ्कावधिः कुतः ? ॥" इत्यपास्तम् । न हि व्याघातः शङ्काश्रितः, किन्तु स्वक्रियैव शङ्काप्रतिबन्धिकेति, न वा विशेषदर्शनात् क्वचिच्छङ्कानिवृत्तिरेवं स्यात् ।

व्याघातस्य शङ्कानिवर्तकत्वासम्भवात् । व्याघातस्य शङ्कानिवर्तकत्वाभावे शङ्कया तर्कस्यैवानवतारेण तर्कस्यापि शङ्कानिवर्तकत्वाभावादिति भावः । *इत्यपास्तमिति* । खण्डनकारमतमपास्तम् । क्वचित्तथैव पाठः ।

शङ्काश्रितः=शङ्काप्रतियोगिकः, प्रतिबन्धक इति शेषः । *स्वक्रियैवेति* । स्वस्य क्रिया प्रवृत्तिर्यस्या इति व्युत्पत्त्या स्वक्रियाप्रयोजकीभूतनियतान्वयव्यतिरेकानुविधायित्वधीरेवेत्यर्थः । शङ्काप्रतियोगिकविरोधस्य प्रतिबन्धकत्वेऽपि न क्षतिरित्यभिप्रायेणाह—*न वेति* । विशेषदर्शनात्=विरोधिभूतादर्शनाद् या शङ्कानिवृत्तिः साऽप्येवं न स्यात्, विरोधप्रतियोगिनीं शङ्कां विना तद्विरोधाश्रयदर्शनस्य स्थातुमशक्यत्वादित्यर्थः । यदि च विरो-

---

च शङ्कायाः सर्वथैव सत्त्वसंभवात्प्रतिबन्धकीभूतया शङ्कयैव तर्कानुत्पादेन कुतस्तर्कस्य वह्निजन्यत्वादिशङ्कानिवर्त्तकत्वमिति । तथैव = खण्डनकारमतमपास्तमित्येव । शङ्काप्रतियोगिकः = शङ्काधिकरणावृत्तित्वविशिष्टः । शङ्काधिकरणावृत्तित्वविशिष्टस्य प्रतिबन्धककत्वव्यवच्छेदार्थकं मूलकारोक्तमेवकारमन्तर्भाव्य व्याचष्टे—**स्वक्रियेति** । तथा च पूर्वोक्तव्युत्पत्त्या शङ्काधिकरणावृत्तित्वाविशेषितस्यैव स्वक्रियारूपान्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्काप्रतिबन्धकत्वे शङ्कायाः प्रतियोगिकोटयप्रविष्टतया तादृशज्ञानेनैव शङ्काऽनुत्पादसंभवात्, सत्यां च विरोधिभूतायां शङ्कायां निवृत्तौ तर्कावतारो भविष्यत्येवेति खण्डनकारमतमतितुच्छमित्याशयः ।

शङ्काधिकरणावृत्तित्वविशिष्टस्य यदि शङ्काप्रतिबन्धकत्वं तदा बाधनिश्चयादेः शङ्काप्रतिबन्धकत्वं न स्यात् प्रतियोगिभूतां शङ्कां विना तस्य स्थातुमशक्यत्वादतो यत्र कुत्रचित्प्रतियोगिसत्त्वमात्रमपेक्षितं न तु प्रतिबन्धकेन सहैव तस्यावस्थानमित्यभिप्रायकं 'न वेत्या'-दिमूलमवतारयति–**शङ्काप्रतियोगिकेति** । शङ्काधिकरणावृत्तितावत इत्यर्थः । **न क्षतिरिति** । न तादृशस्य प्रतिबन्धकत्वेऽपि शङ्कासत्त्वमावश्यकमित्याशयः । **विरोधीति** । तत्तच्छङ्कारूपप्रतिबध्याधिकरणावृत्तित्वविशिष्टबाधादिनिश्चयादित्यर्थः । या शङ्कानिवृत्तिः= यः शङ्कानुत्पादः । **विरोधेति** । शङ्काधिकरणावृत्तित्वप्रतियोगिनीमित्यर्थः । **तद्विरोधेति** । शङ्काधिकरणावृत्तित्वाश्रयबाधादिनिश्चयरूपदर्शनस्येत्यर्थः। **स्थातुमशक्यत्वादिति** । भवन्मते बाधादिनिश्चयादपि शङ्कानुत्पादो न स्यात् शङ्कायाः सत्त्वस्यावश्यकत्वादिति हृदयम् । यदि च भवतोच्यते बाधादिनिश्चयस्थले यदा कदाचिद् यत्र कुत्रचिद्वा देशे शङ्कासत्त्वमात्रमपेक्षितं,न तु प्रतिबन्धकसत्त्वेऽवश्यं तत्सत्त्वं संभवति, तदा वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्काधिकरणावृत्तित्वविशिष्टस्य शङ्काप्रतिबन्धकत्वेऽपि न काऽपि क्षतिः, कुत्रचिच्छङ्कासत्त्वेनैव तादृशज्ञानेन शङ्कानुत्पादसंभवे शङ्कया सह तादृशप्रतिबन्धकावस्थानस्य वक्तुमशक्यत्वादित्येवं भावमाह—**यदि चेत्यादि** ।

न चैतादृशतर्कावतारो भूयोदर्शनं विनेति भूयोदर्शनादरः, न तु स स्वत एव प्रयोजकः । अत एव तदाहितसंस्कारो न मानान्तरं, तर्कस्याप्रमात्वात् ।

धप्रतियोगिनो यदा कदा चित् यत्र कुत्रचित् सत्त्वमात्रमपेक्षितं न तु तदा तत्र(तदुत्तरं) तत्सत्त्वमिति विभाव्यते तदा तुल्यं प्रकृतेऽपीति भावः ।

नन्वेवं व्याप्तिज्ञानं भूयोदर्शनादिति सिद्धान्तः कथं संगच्छत इत्यपेक्षायामाह-*न चेति* । वह्निधूमयोर्भूयः सहचारनिश्चयं विना धूमे वह्न्यसमवहितसामग्र्यजन्यत्वनिश्चयासम्भवात् । अयमेव धूमो वह्निपूर्वक एतदन्यस्तु न; एवमेतद्धूमद्वयमेव वह्निपूर्वकं नन्वेतदन्य इत्यादिशङ्कासम्भवादिति भावः । भूयोदर्शनादरः=कदाचित्कुत्रचित्तदुपयोगः । *न त्विति* । सः=भूयः सहचारग्रहः, स्वत एव =साक्षादेव । *प्रयोजक इति* । व्याप्तिग्रहप्रयोजक इत्यर्थः । भूयोदर्शनस्य संस्कारद्वारा व्याप्तिग्राहकत्वे तदाहितसंस्कारस्य मानान्तरत्वापत्तिः, यदसाधारणं सहकार्यासाद्य मनो वहिर्गोचरां प्रमां जनयति तदेव प्रमाणान्तरमिति पूर्वपक्षोक्तं दूषयति- *अतएवेति* । यत एव भूयोदर्शनजन्यसंस्कारस्तर्क एव प्रयोजको न तु व्याप्तिग्रहेऽत एवेत्यर्थः । *अप्रमात्वादिति* ।

तर्केणैव यदि व्याप्तिग्रहः स्यात्तर्हि भूयो दर्शनाद् व्याप्तिग्रहो भवतीति प्राचीनसिद्धान्तव्याघातः स्यादतः भूयो दर्शनेन तर्कावतारस्ततो व्याप्तिग्रह इति परम्परया भूयोदर्शनस्य व्याप्तिग्रहहेतुत्वव्यवस्थापकं न चैतादृशेतिमूलं नन्वित्यादिना अवतार्य भूयोदर्शनस्य तर्कप्रयोजकत्वं प्रदर्शयति-**वह्निधूमयोरित्यादि** । भूयः=वारम्बारं । सहचारनिश्चयं विना=सामानाधिकरण्यप्रत्यक्षनिश्चयं विना । **धूम इति** । तथा च धूमे सत्यन्तदलनिश्चयं प्रति निरुक्तभूयोदर्शनस्य हेतुत्वे तर्कं प्रत्यपि तस्य हेतुत्वमिति भावः । न केवलं भूयोदर्शनस्य तादृशनिश्चयसंपादकत्वेनैव हेतुत्वमपि तु तर्कविरोधिशङ्काविघटकत्वेनापीत्याह—**अयमेवेति** । तथा च यद्युक्तशङ्का स्यात् तदा वह्निसमवहितजन्यत्वनिश्चय एव न स्यादित्याशयः । यत्र तादृशशङ्कासंभवस्तत्रैव भूयोदर्शनादर इत्याह-**कदाचिदिति** । भूयो दर्शनस्य साक्षाद्व्याप्तिग्रहे प्रयोजकत्वन्तु नास्ति, अपि तु तर्कप्रयोजकत्वेनैव कदाचित्तस्य व्याप्तिग्रहप्रयोजकत्वमित्याह—**साक्षादेवेत्यादि** । भूयोदर्शनस्य = भूयः सहचारप्रत्यक्षस्य । व्याप्तिग्राहकत्वे = व्याप्तिग्रहजनकत्वे । **तदाहितेति** । भूयोदर्शनजन्यसंस्कारस्येत्यर्थः । **यदसाधारणेति** । यद्वाह्यार्थविशेष्यकयत्प्रकारकप्रत्यक्षप्रमितेर्मनोऽन्यासाधारणकारणं यद् भवति तद् सर्वं मानसान्यप्रमायाः करणं भवतीत्यर्थः । पूर्वपक्षोक्तं = परामर्शपूर्वपक्षोक्तम् । **न तु व्याप्तिग्रह इति** । व्याप्तिग्रहे यदि भूयोदर्शनजन्यसंस्कारो हेतुः स्यात् तदा तस्य मानसान्यप्रमायाः करणत्वं स्यादित्याशयः । ननु भूयोदर्शनजन्यसंस्कारो यदि तर्कजनकः स्यात्तदापि संस्कारस्य प्रमाणान्तरत्वापत्तिरित्याह मूले-**तर्कस्येति** । **अप्रमात्वादितीति** । तथा च तर्कस्याऽप्रमात्वेन भूयोदर्शनजन्यसंस्कारस्य प्रमाकरणत्वं न-

तच्च प्रत्यक्षव्याप्तिज्ञाने हेतुस्तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात् । ननु सहचारदर्शनव्यभिचारादर्शनवद्व्यभिचारशङ्काविरहानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चय इति चेत्—न; स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात् ।

इदमापाततः, तर्कस्याप्यंशतः प्रमात्वात् । वस्तुतस्तर्कस्य प्रमात्वेऽपि तं प्रति संस्कारो न जनकः किन्तु प्रयोजक एवेति न प्रमाणान्तरत्वमित्येव तत्त्वम् । *तच्चेति* । व्यभिचारसन्देहाभाववत्त्वञ्चेत्यर्थः । तदभावेऽपि=व्यभिचारसन्देहाभावाभावेऽपि व्यभिचारसन्देहेऽपीति यावत् । व्यभिचारसन्देहस्य योग्यतादिसन्देहरूपतया शब्दादिना अर्थनिर्णयऽविरोधित्वादिति भावः ।

भ्रान्तो देशयति-*नन्विति* । व्यभिचारादर्शनवदिति* । व्यभिचारनिर्णयाभाववदित्यर्थः । यथा व्यभिचारनिश्चयाभावसहचारदर्शनं न व्याप्तिग्राहकम्, अन्यथा यत्र व्यभिचारसंशयो वर्तते तत्र व्याप्तिग्रहापत्तेः, तत्रापि व्यभिचारनिश्चयाभावसहचारदर्शनयोः सत्त्वात्, तथा व्यभिचारसंशयाभावतर्कयोर्ज्ञानं न व्याप्तिग्राहकं, शङ्कासत्त्वदशायामपि व्यभिचारशङ्काविरहानुकूलतर्कयोर्ज्ञानसम्भवात् तत्र व्याप्तिग्रहापत्तेरिति । *व्यभिचारीति* । सन्दिग्धव्यभिचारीत्यर्थः । व्याप्तिग्राहकत्वात्=व्याप्तिग्रहे

संभवतीति हृदयम् । टीकायामाक्षिपति-**इदमापातत इति** । **अंशतः प्रमात्वादिति** । तथा च यथाश्रुतमूलेन तादृशसंस्कारस्य प्रमाणान्तरत्वाभावो न घटत इति भावः । तर्कस्यांशतः प्रमात्वेऽपि स्वयं तादृशसंस्कारस्य प्रमात्वं खण्डयति—**वस्तुत इति** । तं प्रति= तर्कं प्रति । न जनक इत्यनेन तादृशासाधारणजनकत्वस्यैव प्रमाणान्तरत्वप्रयोजकत्वमभिहितम् । **न प्रमाणान्तरत्वमिति** । तादृशसंस्कारस्य तर्कजनकत्वाभावेनेत्यादिः ।

'तच्चे'तिमूलघटकं तत्पदं तात्पर्यवशाद्व्याप्तिग्रहोपायोक्तं व्यभिचारसन्देहाभावपरमित्याह—**व्यभिचारेति** । प्रत्यक्षात्मकव्याप्तिज्ञान एव व्यभिचारसन्देहाभावो हेतुः, न तु शाब्दात्मकव्याप्तिज्ञान इत्याह—**व्यभिचारसन्देहेति** । व्यभिचारसन्देहसत्त्व इत्यर्थः । ननु व्यभिचारसन्देहः कथं न शाब्दात्मकव्याप्तिज्ञाने प्रतिबन्धक इत्यतो भावमाह-**योग्यतादीति** । तथा च शब्दादिना व्याप्तिनिश्चये व्यभिचारसन्देहस्य योग्यतासन्देहस्वरूपतया योग्यताज्ञानत्वेन तस्य जनकत्वमेव, न तु प्रतिबन्धकत्वमित्याशयः । व्यभिचारसन्देहाभावतर्कयोर्ज्ञानमेव व्याप्तिग्रहे जनकं न तु व्यभिचारसन्देहाभावतर्कौ जनकाविति भ्रमं निराकुर्वतो मूलकारस्य नन्वित्याद्याशङ्कां निराकरोति—**यथेत्यादि** । व्यभिचारनिश्चयाभावस्य व्याप्तिग्राहकत्वे दोषमाह—**यत्र व्यभिचारेति**। व्यभिचारसंशयाभावतर्कयोर्ज्ञानं यदि व्याप्तिग्राहकं तदा व्यभिचारशङ्कादशायामपि व्यभिचारशङ्काभावतर्कज्ञानसंभवाद्व्याप्तिज्ञानापत्तिः स्यादतो तादृशज्ञानं न व्याप्तिज्ञानजनकमित्याह—**तथा व्यभिचारेति** । मूले **स्वरूपसतोरेवेति** । अज्ञायमानयोरेव व्यभिचारसन्देहाभावतर्कयोर्व्याप्तिग्राहकत्वमिति भावः । व्यभिचारसन्देहाभावतर्कयोः साक्षाद्व्याप्तिग्रहजनकत्वाऽसंभवाद् व्याप्तिग्राहकत्वादिति मूलं व्याचष्टे टीकायां—**व्याप्तिग्रहे प्रयोजकत्वादिति** ।

सत्तर्काद् व्याप्तिप्रमा,

प्रयोजकत्वात् । ननु तथापि व्यभिचारज्ञानविरहानुकूलतर्कयो व्यभिचारिण्यपि सत्त्वात्कथं प्रमाभ्रमविभाग इत्यत आह—*सत्तर्कादिति* ।

यद्यपि तर्कस्य सत्त्वं मूलशैथिल्यादिदोषरहितत्वं, तद्विशिष्टत्वमेव भ्रमत्वं, तच्च न प्रामाण्याप्रामाण्यप्रयोजकं, वस्तुगत्या व्याप्तिमत्त्वे तादृशदोषविशिष्टाद् धूमो यदि वह्निव्यभिचारी स्यात् पृथिवी न स्यादित्यादितर्कादपि प्रमाभ्रमयोरुत्पादानुत्पादाभ्यां व्यभिचारात् । एवं विशेषदर्शने सत्यत्वासत्यत्वमपि न प्रामाण्यादिप्रयोजकं विषयस्याबाधितत्वेऽसत्यादपि विशेषदर्शनात् प्रमाभ्रमयोरुत्पादानुत्पादाभ्यां व्यभिचारात् ।

न च तर्कस्य सत्त्वं वस्तुगत्या व्याप्तिमद्विषयकत्वम्, आभासत्वञ्च-

* नन्विति । तथापि = व्यभिचारज्ञानाभावानुकूलतर्कयो व्याप्तिग्राहकत्वेऽपि । **व्यभिचारिण्यपीति** । कदाचिद् भ्रान्तस्येत्यादिः । **सत्त्वादिति** । व्यभिचारज्ञानविरहानुकूलतर्कयोरितिपूर्वेणान्वयः । **कथं प्रमाभ्रमविभाग इति** । तथा च व्यभिचारिण्यपि हेतौ तादृशकारणसमवधानाद्व्याप्तिग्रहोत्पत्तौ कुत्र व्याप्तिग्रहस्य प्रमात्वं भ्रमत्वञ्चेति विभागो न स्यादिति भावः । शङ्कते—**यद्यपीति** । **मूलशैथिल्येति** । व्यभिचारादिदोषरहितत्वमित्यर्थः । आदिना पक्षे आपाद्यसत्त्वादिपरिग्रहः । **तद्विशिष्टेति** । व्यभिचारादिविशिष्टत्वमेवेत्यर्थः । एवकाराद्बाधादेर्दोषत्वव्यवच्छेदः । **भ्रमत्वमिति** । तर्कस्येतिपूर्वेणान्वयः । **तच्चेति** । तादृशदोषरहितत्वं तादृशदोषवत्त्वञ्चेत्यर्थः । **न प्रामाण्येति** । यथाक्रमं तादृशदोषराहित्यं प्रमात्वप्रयोजकं, तादृशदोषवत्त्वञ्चाऽप्रमात्वप्रयोजकं नेति पर्यवसितार्थः । तत्र हेतुमाह—**वस्तुगत्येति** । वास्तविकव्याप्तिसत्त्व इत्यर्थः । **तादृशेति** । व्यभिचारादिदोषविशिष्टादित्यर्थः । तर्कादितिपरेणान्वयः । वह्निव्यभिचारित्वस्य घटपटादौ सत्त्वेन तत्र पृथिवीत्वाभावरूपापाद्यविरहादुक्ततर्कस्य व्यभिचारादिदोषवत्त्वेन भ्रमत्वं, दोषवत्त्वञ्च तादृशदोषवदापादककत्वं बोध्यम् । तथा चोक्ततर्कस्य भ्रमत्वेऽपि ततः प्रमात्मकव्याप्तिज्ञानोत्पादाद्व्यभिचारः, अप्रमात्ववद्व्याप्तिज्ञानानुत्पादाच्च व्यभिचार इति तादृशदोषराहित्यमपि न व्याप्तिप्रमाप्रयोजकं, न वा तादृशदोषवत्त्वमपि व्याप्तिभ्रमोत्पादप्रयोजकमित्याशयः । **एवमिति** । विशेषदर्शने = विरोधिव्याप्यदर्शने । **सत्यत्वेति** । दोषराहित्यं दोषवत्त्वमपीत्यर्थः । **न प्रामाण्येति** । सत्यत्वं=प्रमात्मकपुरुषज्ञानप्रयोजकम्, असत्यत्वं=भ्रमात्मकपुरुषज्ञानप्रयोजकं नेत्यर्थः । कथन्तानिवृत्त्यर्थमाह—**विषयस्येति** । विशेष्यीभूतवस्तुन इत्यर्थः । अबाधितत्वे=पुरुषत्वाद्यभाववत्तयाऽनिश्चितत्वे । असत्यादपि= व्यभिचारादिदोषयुक्तादपि । विशेषदर्शनाद्=विरोधीभूतस्य व्याप्यदर्शनात् । **प्रमाभ्रमयोरित्यादि** । असत्याद्विशेषदर्शनात्प्रमात्मकपुरुषज्ञानस्योत्पादेन भ्रमात्मकपुरुषज्ञानस्यानुत्पादेन च व्यभिचारादित्यर्थः । तथा दोषयुक्तं विशेषदर्शनं न भ्रमात्मकपुरुषज्ञानप्रयोजकं, न वा प्रमात्मकपुरुषज्ञानाऽप्रयोजकमिति भावः ।

यद्यपि तर्कनिष्ठं सत्यत्वं वास्तविकव्याप्तिमदापादककत्वं, तद्भिन्नाभासत्वञ्च वास्तविकव्याप्त्यभाववदापादककत्वम्, विशेषदर्शननिष्ठसत्यत्वमपि वास्तविकपुरुषत्ववद्विषयकत्वं,

तदाभासात्तदप्रमा विशेषदर्शनसत्यत्वासत्यत्वाभ्यां पुरुषज्ञानमिव ।

वस्तुगत्या व्याप्त्यभाववद्विषयकत्वम्, एवं विशेषदर्शनस्य सत्यत्वं वस्तुगत्या पुरुषत्ववद्विषयकत्वम्, वस्तुगत्या तदभाववद्विषयकत्वञ्चासत्यत्वमिति वाच्यम्; तस्यापि स्वतः सिद्धशङ्काविरहस्थले तर्कं विनैव व्याप्तिग्रहेण व्यभिचारात् तस्य प्रमाभ्रमप्रयोजकत्वासम्भवात् ।

तथापि सत्तर्कात्=सत्यव्याप्तिज्ञानात्, तदाभासात्=तदऽभावात् । तथा च व्याप्तिप्रमात्वावच्छिन्नं प्रति व्याप्तिप्रमात्वेन हेतुत्वम्, समानविशेष्यत्वंप्रत्यासत्तिः । व्याप्तिभ्रमत्वावच्छिन्नं प्रति विशेष्यत्वसम्बन्धावच्छिन्नव्याप्तिप्रमाविरहत्वेन हेतुत्वम् । विशेषणताविशेषविशेष्यताभ्यां सामानाधिकरण्यं प्रत्यासत्तिः । सर्वत्रान्ततो भगवद्व्याप्तिप्रमैव पूर्वं सुलभेति भावः । विशेषदर्शनसत्यत्वासत्यत्वाभ्यां=सत्यविशेषणज्ञानतद्विरहाभ्यां पुरुषत्वप्रमातद्विरहाभ्यामिति यावत् । पुरुषज्ञानमिव=पुरुषत्वप्रमाभ्रम इव । तर्कस्य शङ्कामात्रनिवर्तकत्वात्, यत्र स्वतः सिद्धः शङ्काविरहस्तत्र तर्कं विनैव व्याप्तिग्रह इति नानवस्थेति

तन्निष्ठासत्यत्वञ्च वास्तविकपुरुषत्वाभाववद्विषयकत्वमित्युच्यते, तथापि व्यभिचारो दुर्वार एव, यादृशस्थले स्वभावादेव व्यभिचारादिशङ्काविरहस्तादृशस्थले तर्कं विनैव प्रमात्मकव्याप्तिग्रहस्य कदाचिद् भ्रमात्मकव्याप्तिग्रहस्योदयेन तर्करूपकारणाभावस्य तदानीं सत्त्वादित्येवं न चेत्यादिनाऽऽशङ्क्य प्रमाभ्रमप्रयोजकत्वाऽसंभवादित्यन्तेन समाधानं बोध्यम् । यद्यपीत्यादेरुत्तरं—**तथापीति** । **सत्येति** । प्रमात्मकव्याप्तिज्ञानादित्यर्थः । भावमाह—**तथा चेति** । व्याप्तिप्रमात्वेति । तथा च विशेष्यतासंबन्धेन व्याप्तिप्रमात्वावच्छिन्नं प्रति विशेष्यतासंन्धेन व्याप्तिप्रमात्वेन हेतुता । व्याप्तिप्रमोत्पादात्पूर्वमवश्यं व्याप्तिप्रमायाः सत्त्वमावश्यकमन्यथा व्याप्तिप्रमैव नोत्पद्यत इति भावः । **व्याप्तिभ्रमेति** । विशेष्यतासंबन्धेन व्याप्तिभ्रमत्वावच्छिन्नं प्रति विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकव्याप्तिप्रमाभावत्वेन स्वरूपसंबन्धेन कारणत्वमित्याशयः । **सामानाधिकरण्येति** । कार्यकारणयोरेकाधिकरणवृत्तित्वमित्यर्थः । प्रत्यासत्तिः=संबन्धः ।

नन्वेवं यदा तत्पुरुषीयव्याप्तिप्रमा पूर्वं नास्ति तदा व्याप्तिप्रमैव नोत्पद्यतामित्यत आह—**सर्वत्रेति** । तथा च व्याप्तिप्रमापूर्वमवश्यमेव भागवती व्याप्तिप्रमा वर्त्तत इति न कुत्रापि व्यभिचार इति भावः । विशेषदर्शनसत्यत्वाऽसत्यत्वं विशिष्य दर्शयति-**पुरुषत्वप्रमेति** । पुरुषत्वप्रमापुरूषत्वप्रमाभावाभ्यामित्यर्थः । तथा च विशेष्यतासंबन्धेन पुरुषत्वप्रमात्वावच्छिन्नं प्रति विशेष्यतासंबन्धेन प्रमात्मकपुरुषत्वव्याप्यदर्शनं हेतुः । एवं विशेष्यतासंबन्धेन पुरुषत्वभ्रमत्वावच्छिन्नं प्रति विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकस्य पुरुषत्वव्याप्यप्रकारकप्रमाभावस्य स्वरूपसंबन्धेन हेतुतेत्यभिप्रायः । **यत्रेत्यादि** । यस्मिन् स्थल इत्यर्थः । स्वतःसिद्धशङ्काविरहः=तर्कविघटशङ्कायाः स्वभावादेवानुत्पादः । तत्र=तादृशस्थले । **तर्कं विनैवेति** । तर्कविघटकशङ्काविघटकमित्यादिः । व्याप्तिग्रहः=तर्कमू-

अपरे तु यत्र तर्के व्याप्त्यनुभवो मूलं तत्र तर्कान्तरापेक्षा, यत्र तु व्याप्तिस्मरणं हेतुस्तत्र न तर्कान्तरापेक्षेति नाऽनवस्था। अस्ति च जातमात्राणामिष्टानिष्टसाधनतानुमितिहेतुव्याप्तिस्मरणं तदानीं व्याप्त्य-(नुभावकाभावात्) नुभवाभावात्, तन्मूलाऽनुभवमूला चाग्रेऽपि व्याप्तिस्मरणपरम्परेति ।

स्वयमुक्तम् ।

प्राञ्चस्तु तर्कस्य व्याप्तिग्राहकत्वमभ्युपेत्य प्रकारान्तरेणानवस्थां परिहरन्ति, तदेवाह-*अपरे त्विति* । *यत्र तु व्याप्तिस्मरणमिति* । व्याप्त्यनुभवं प्रत्येव तर्कस्य हेतुत्वादिति भावः । व्याप्तिस्मरणे तर्कापेक्षा नास्तीत्यत्र हेतुमाह—*अस्ति चेति* । भवति चेत्यर्थः । चो हेतौ । *व्याप्तिस्मरणमिति* । तर्कं विनैवेति शेषः । *व्याप्त्यनुभावकाभावादिति* । तर्काभावादित्यर्थः । यद्वा ननु जातमात्रस्य व्याप्तिज्ञानं स्मरणमेव न, किन्तु अनुभवरूपमित्यत आह—*तदानीमिति* ।

ननु तथापि विनाऽनुभवं स्मरणायोगाज्जन्मान्तरीणो व्याप्त्यनुभवो हेतुर्वाच्यस्तत्र तर्को हेतु स्तत्र तर्के व्याप्त्यनुभवान्तरं हेतुरिति क्रमेणानवस्था तदवस्थैवेत्यत आह-*तन्मूलेति*। व्याप्तिस्मरणमूलको यः प्राग्भवीयव्याप्त्यनुभवस्तन्मूलिका अग्रे=भाविजन्मनि व्याप्तिस्मरणपरम्परेत्यर्थः ।

लीभूतव्याप्तिग्रहः । स्वयमुक्तं=मूलकारेणोक्तम् ।

प्राचीनमते तर्कस्य व्याप्तिग्राहकत्वमेव, तन्मते यदि तर्कमूलीभूताऽपि व्याप्तिः तर्कादेव भवति तदाऽनवस्था स्यादतस्तन्मते प्रकारान्तरेणानवस्थापरिहारायाऽपरे त्वित्यादिना मूलकृता प्रदर्शितं पन्थानं स्वयं विशिष्य दर्शयति—व्याप्त्यनुभवं प्रत्येवेति । एवकाराद् व्याप्तिस्मरणे तर्कस्य हेतुत्वव्यच्छेदः । चो हेताविति । यतो व्याप्त्यनुभवस्तर्के हेतु र्न तु व्याप्तिस्मरण अत एवेत्यर्थः । तथाच जातमात्रस्य स्तन्यपानादौ सुखसाधनतानुमितौ हेतुभूतव्याप्तिस्मरणे तर्को न हेतुः व्याप्त्यनुभवं प्रत्येव तर्कस्य हेतुत्वादिति नानवस्थेति भावः । जातमात्रस्य व्याप्तिज्ञानं स्मरणरूपमेवेत्यत्र प्रमाणं दर्शयितुमाह—यद्वेति । तदानीमितीति । तथा च जातमात्रस्य व्याप्तिज्ञानं नानुभवरूपं, तदानीं व्याप्त्यनुभवजनकतर्काभावादित्याशयः । यद्यपि जातमात्रस्य व्याप्तिस्मरणं प्रति जन्मान्तरीयव्याप्त्यनुभवः संस्कारद्वारा हेतुः, अनुभवं विना स्मरणानुपपत्तेः । एवञ्च तादृशव्याप्त्यनुभवं प्रत्यपि तर्को हेतुः, तादृशतर्कमूलीभूतव्याप्त्यनुभवेऽपि तर्कान्तरं हेतुरित्यनवस्था दुर्वारैव । तथापि तत्तज्जन्मनि स्तन्यपानादौ सुखसाधनतानुमितिजनकव्याप्तिस्मरणे तर्कस्याहेतुत्वात्कदाचित्कदाचित्तर्कविच्छेदेन नाऽनवस्थेत्यादिकं नन्वित्यादिनाऽऽशङ्क्य 'व्याप्तिस्मरणमूलको यः' इत्यादिना समाधत्ते-प्राग्भवीयेति । पूर्वजन्मोत्पन्नो व्याप्त्यनुभव इत्यर्थः । तन्मूलिका = तज्जन्या । भाविजन्मनि = भविष्यज्जन्मनि । भावमाह—

यत्त्वनादिसिद्धकार्यकारणभावविरोधादिमूलाः केचित्तर्का इति

तथा च जन्मान्तरीयव्याप्तिस्मरणमूलीभूतव्याप्त्यनुभवमूलीभूततर्के व्याप्त्यनुभवो न हेतुः, किन्तु व्याप्तिस्मरणमिति नानवस्था, कदाचिदन्तरान्तरा व्याप्तिस्मरणेन विच्छेदात् तर्कधाराया अविरललग्नत्वाभावादिति प्राचामाशयः। अत्रेदमस्वरसवीजं—नहि कदाचिदन्तरा विच्छेद एवानवस्थापरिहारः, किन्तु आत्यन्तिकविच्छेद एवेति सकलसम्प्रदायसिद्धमिति।

तथाचेति। जन्मान्तरीयेति। तत्तज्जन्मनि व्याप्तिस्मरणकारणीभूतव्याप्त्यनुभवजनके तर्के इत्यर्थः। **व्याप्त्यनुभवस्त्वित्यादि।** तर्कमूलीभूताया व्याप्तेरनुभवो न कारणमित्यर्थः। **व्याप्तिस्मरणमितीति।** तथा च तादृशस्मरणे तर्कस्य कारणत्वमेव न संभवतीत्याशयः।

नानवस्थेत्यत्र हेतुमाह—**कदाचिदिति।** तत्तत्पुरुषीयतत्तदुत्पत्तिकालावच्छेदेन यदा व्याप्तिस्मरणं भवति तदा पूर्वं तर्काभावेनाऽनवस्थैव न संभवतीति हृदयम्। **विच्छेदादिति।** कदाचिदिति पूर्वेणान्वयः। **तर्कधाराया इति।** व्याप्त्यनुभवमूलीभूताया इत्यादिः। **अविरललग्नत्वेति।** तथा च मध्ये मध्ये एकस्यैव पुंसो व्याप्तिस्मरणस्योदयात् तत्पूर्वत्र तर्कापेक्षाया अनावश्यकत्वात्तर्कस्य धारावाहिकत्वाभावादेव नानवस्थेति तात्पर्यम्।

प्राचीनमतेऽस्वरसं दर्शयति—**नहीति।** कदाचित्=किञ्चित्कालावच्छेदेन। अन्तरा= तत्तज्जन्मनि। **विच्छेद एवेति।** तर्कस्येत्यादिः। आत्यन्तिकविच्छेदे=सर्वकालावच्छेदेन तर्काभावे। **एवेति।** एवकारात्किञ्चित्कालावच्छेदेन तर्काभावस्याऽनवस्थापरिहारहेतुत्वव्यवच्छेदः। तर्कप्रतिबन्धकशङ्कानुत्पादो यदि सर्वकालावच्छेदेन तर्काभावातिरिक्तकारणप्रतियोगिकाभावादेव भवति, तदैवाऽनवस्थापरिहारः स्यात्, न तु यत्किञ्चित्कालावच्छेदेन तर्कं विनाऽपि व्याप्तिज्ञानसंभवेऽनवस्थापरिहारः कदाचित्सम्प्रदायसिद्धः, तर्कस्याऽऽत्यन्तिकोच्छेदासंभवादित्याशयः।

मूले **अनादिसिद्धेति।** अनादित्वं स्वसजातीयानां ध्वंसव्यापकप्रागभावप्रतियोगित्वं, तेन रूपेण सिद्धा निश्चिता ये कार्यकारणभावविरोधास्तन्मूलास्तर्कविघटकशङ्काविघटकत्वेन प्रयोजकीभूता इत्यर्थः। **केचित्तर्का इति।** वह्न्यादावनादिसिद्धधूमकारणत्वनिश्चयस्तत्र धूमकारणत्वाभावकोटिकशङ्काप्रतिबन्धकतया 'धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादि' त्यादितर्कोत्थापकत्वेन वह्निधूमव्याप्तिग्रहे प्रयोजकः। एवं 'शिंशपा यदि वृक्षान्यतादात्म्यवती स्यात्तदा वृक्षतादात्म्यवती न स्यादि'त्याकारकतर्कस्य प्रतिबन्धकशङ्काविघटकन्तु भेदाऽभेदयोरनादित्वेन विरोधज्ञानम्। तच्च तादृशशङ्कानुत्पादकतया वृक्षशिंशपयोस्तादात्म्येन व्याप्तिग्रहप्रयोजकं भवति। तथा च तादृशतर्के तर्कान्तरस्याऽप्रयोजकतया नानवस्थेति भावः। कार्यकारणभावादौ अनादिसिद्धत्वज्ञानमवश्यं प्रमाणजन्यं वाच्यम्। प्रमाणप्रश्ने यदि तद् अनुमानप्रमाणजन्यं, तदा तत्रापि व्यभिचारशङ्कानिवृत्त्यर्थं तर्कान्तरस्याऽऽवश्यकतेति नानवस्थापरिहारः संभवतीत्याशयेन दूषयति—

तन्न; तत्र प्रमाणानुयोगेऽनुमान एव पर्यवसानात् । न च व्याप्तिग्रहाऽन्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानमिति वाच्यम्; अनुपपत्तेरप्यनुमानत्वात् ।

कार्यकारणभावविरोधादीनामनादिप्रसिद्धिविषयत्वनिश्चय एव कुत्रचित्तर्के संशयनिवर्तक इति केचिद् वदन्ति, तन्मतमाशङ्क्य निराकरोति-*यत्त्विति* । अनादिसिद्धेति कार्यकारणभावविरोधादीनां विशेषणम् । तथा चानादित्वेन=अनादिप्रसिद्धिविषयत्वेन, सिद्धः=निश्चितः कार्यकारणभावादयः, क्वचित्तर्के संशयनिवर्तिका इति नानवस्थेत्यर्थः । यथाश्रुते कार्यकारणभावे विरोधे चानादित्वस्य दुर्वचत्वात् । आदिना व्याप्तिपरिग्रहः । *नन्वेति* । कार्यकारणभावादीनामनादिप्रसिद्धिविषयत्व इत्यर्थः । प्रमाणानुयोगे=प्रमाणप्रश्ने । *अनुमान एवेति* । प्रत्यक्षस्य तत्रासंभवादित्यर्थः । तथा च तत्राप्यनुमाने तर्कापेक्षाऽऽवश्यकीत्यनवस्था तदवस्थैवेति भावः । व्याप्तिग्राहकतर्कमूलीभूतव्याप्तिग्रहो न तर्कान्तरादपितु व्याप्तिग्रहान्यथानुपपत्तिग्रहादेवेत्याह-*नचेति* । अनुमानत्वात्=व्याप्तिनिश्चयाधीनप्रवृत्तिकत्वात् ।

तन्नेति । तत्र=अनादिसिद्धत्वज्ञाने । प्रमाणानुयोगे=प्रमाणप्रश्ने । **अनुमान एवेतीति** । अनादिसिद्धत्वस्य कार्यकारणभावादौ विवादग्रस्तत्वादित्याशयः । **न चेति** । वाच्यमिति॰ परेणान्वयः । व्याप्तिग्रहान्यथानुपपत्त्या=व्याप्तिग्रहान्यथानुपपत्तिज्ञानेन । **तर्कस्येत्यादि** । तर्कमूलीभूतानादिसिद्धव्याप्तिकत्वज्ञानं भवतीति शेषः ।

अर्थापत्तिप्रमाणस्यापि नैयायिकमतेऽनुमानमध्येऽन्तर्गततया तत्रापि व्यभिचारशङ्कानिवृत्त्यर्थं यदि तर्कान्तरापेक्षा स्यात्तदा स्यादेवानवस्थेत्याशयेन समाधत्ते—**अनुपपत्तेरप्येति** । अनाप्तिसिद्धविषयत्वस्याऽज्ञायमानस्य शङ्काविरोधित्वे प्रमाणाभावः, कथञ्चित्तस्य सप्रमाणकत्वेऽपि प्रमाणानुयोगइत्यादिमूलाऽसङ्गतिः स्यात् प्रमाणानां ज्ञानफलकत्वनियमादित्याशयेनाह टीकायाम्—**अनादीति** । तथा चाऽनादिसिद्धिविषयत्वनिश्चयस्यैव शङ्काप्रतिबन्धकत्वमिति भावः । समुदितार्थमाह—**तथा चेति** । **अनादीति** । अनादित्वप्रकारकज्ञानविशेष्यत्वेनेत्यर्थः । कुत्रचित्तर्के इति तु पूर्वमेव प्रपञ्चितमस्माभिः । **नानवस्थेति** । तर्कस्य तर्काजन्यत्वेनेत्यादिः । अनादित्वस्य विरोधे कार्यकारणभावे चानुगततया वक्तुमशक्यत्वादाह—**यथा श्रुत इति** । तादृशविरोधादिनामित्यत्र आदिपदग्राह्यमाह—**व्याप्तिपरिग्रह इति** । स्वतःसिद्धव्यभिचारशङ्कादिविरहस्थलेष्वेत्यादिः । प्रत्यक्षस्य=प्रत्यक्षप्रमाणस्य । **तत्राऽसम्भवादिति** । अनादिसिद्धिविषयत्वस्य अनादित्वघटिततयाऽतीन्द्रियत्वादिति भावः । पीनत्वाऽन्यथानुपपत्तिग्रहाद् यथा ब्राह्मणादौ भोजनकल्पनं, तथा व्याप्तिग्रहान्यथानुपपत्तिग्रहादपि तर्कमूलीभूतव्याप्तिकल्पनं संभवति, न तु तर्कान्तरादेव तर्कमूलीभूतव्याप्तिग्रह इत्यपि मतं न समीचीनमित्याह—**व्याप्तिनिश्चयाधीनेति** । अनुपपत्तेरुपपादकाभावव्यापकाभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिनिश्चयाधीनापादकज्ञानजन्य-

अन्ये तु विपक्षबाधकतर्कादनौपाधिकत्वग्रह एव, तदधीनो व्याप्तिग्रह इति, तदपि न: तर्कस्याप्रमाणत्वात्; व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेन्न; अनवस्थाभयेन तर्कं विना व्याघाताद् यत्र शङ्काविरहस्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात्।

यथाश्रुतासंगतेः, परैरर्थापत्तेरनुमानत्वानभ्युपगमात्। तथा च तत्रापि तर्कापेक्षावश्यकीत्यनवस्था तदवस्थेति भावः।

तदेवं व्यभिचारादर्शनसहकृतसहचारज्ञानं व्याप्तिग्राहकं, तर्कः शंकानुत्पत्तौ प्रयोजक इति व्यवस्थाप्य तर्कादनौपाधिकत्वग्रहस्तदुभाभ्यां मिलित्वा व्याप्तिग्रह इत्येकदेशिमतमाशङ्क्य दूषयति-*अन्येत्विति*। *तदधीनेति*। तयोरधीन इत्यर्थः। अनौपाधिकत्वग्रहे व्याप्तिग्रहे च तर्कः स्वतन्त्रो हेतुः, प्रमाणसहकारी वा, नाद्य इत्याह-*तर्कस्येति*। तथा च प्रमाणस्य स्वतन्त्रतया ज्ञानजनकत्वनियमेन तर्कस्य प्रमाणत्वासम्भवाज्जनकत्वाभाव इत्यर्थः। द्वितीयमाशङ्कते-*व्यभिचारादीति*। आदिपदादुपाधिपरिग्रहः। व्याघातात्=तर्काभावातिरिक्तकारणान्तराभावात्। विरहः=अनुत्पादः। व्याप्तिग्रहे अनौपाधिकत्वग्रहे च।

प्रवृत्तिकत्वादित्यर्थः। परैः=मीमांसकादिभिः। **अनुमानत्वानभ्युपगमादिति**। मूले अनुपपत्तेरनुमानत्वाभिधानं यथाश्रुते न संगच्छते मीमांसकप्रभृतिभिरर्थापत्तेरनुमानातिरिक्तप्रमाणत्वस्य स्वीकरणीयत्वादिति हृदयम्। तत्रापि=अनुपपत्तिरूपव्याप्तिज्ञानेऽपि। **अनवस्थेतीति**। तथा च तादृशव्याप्तिज्ञानात्पूर्वं यदि व्यभिचारादिशङ्का स्यात्तदा स्यादेव तर्कान्तरेण तादृशशङ्कानिवृत्तिरित्यनवस्थेत्याशयः। मूले **विपक्षेति**। विपक्षे साध्याभाववति यो बाधः हेतोरभावः व्याप्तिरिति यावत्, तत्प्रयोजकात्तर्कादित्यर्थः। **अनौपाधिकत्वग्रह इति**। अनौपाधिकत्वग्रहः=उपाध्यभावग्रहः। **एवेति**। एवकारात्तर्केण शङ्कानिवृत्तिव्यवच्छेदः। टीकायाम् **उभाभ्यामिति**। तर्कानौपाधिकत्वग्रहाभ्यामित्यर्थः। तयोरधीनः=तर्कव्याप्तिग्रहयोरधीनः। तथा च तर्कं प्रति अनौपाधिकत्वज्ञानं प्रयोजकं, व्याप्तिज्ञाने च तर्कः अनौपाधिकत्वज्ञानञ्च हेतुः। स्वतन्त्रः=प्रमाणान्तराऽसहकारी सन्। **नाद्येति**। तर्कः स्वतन्त्रो हेतुरिति न युक्तमित्याहेत्यर्थः। स्वतन्त्रतया=स्वभिन्नप्रमाणान्तराऽसहकारितया। ज्ञानेति प्रमेत्यर्थकम्। **प्रमाणत्वासंभवादिति**। तर्कस्यानौपाधिकत्वज्ञानसहकृतस्यैव व्याप्तिग्रहजनकताया मूले अभिहितत्वादित्याशयः। **जनकत्वाभावेति**। व्याप्तिग्रह इत्यादिः। द्वितीयं=प्रमाणसहकारी सन् तर्को हेतुरिति पक्षम्। तथा च तर्कस्य प्रमाणाभावेऽपि प्रत्यक्षादिप्रमाणसहकारी स व्यभिचारशङ्कां विघटयन् व्याप्तिग्रहजनकः स्यादित्यपि न युक्तमिति भावः।

उपाधिपरिग्रहः=अयं हेतुरुपाधिमान् न वेति शङ्कानुत्पादोऽपि तर्केणैवेति तात्पर्यम्। **व्याघातादिति**। अयमाशयः—तर्को यदि व्याप्तिग्रहे अनौपाधिकत्वग्रहे च व्यभिचारोपाधिशङ्काविघटनद्वारा जनक इति भवता स्वीक्रियते, तदा यादृशस्थले तर्कस्याऽसत्त्वे-

यत्तु योग्यानामुपाधीनां योग्यानुपलब्ध्याऽभावग्रहः, अयोग्यानां तु साध्याव्यापकत्वसाधनव्यापकत्वसाधनादभावग्रह इत्यनौपाधिकत्वं सुग्रहमिति, तत्तुच्छम्; अनुमानेन तत्साधनेऽनवस्थानात् प्रमाणान्तरस्याभावात् ।

ये चानुकूलतर्कं विनैव सहचारादिदर्शनमात्रेण व्याप्तिग्रहं वदन्ति,

---

(केचित्तु) अनौपाधिकत्वज्ञानं व्याप्तिधीजनकं, तन्मतमाशङ्क्य निराकरोति—**यत्त्विति** । **साधनादिति** । अनुमानादित्यर्थः । **अनौपाधिकत्वं सुग्रहमिति** । तथा च तर्काहेतुकमेवानौपाधिकत्वज्ञानं व्याप्तिधीहेतुरिति भावः । **अनवस्थानादिति** । तदनुमानमूलीभूतज्ञानेऽप्यनौपाधिकत्वनिश्चयस्य हेतुत्वादिति भावः ।

व्याप्तिग्रहे परम्परयापि कुत्रचिन्न तर्कोपयोग इति मीमांसकैकदेशिमतं निराचष्टे—**ये चेति** । व्यभिचारसंशयस्य तत्सामग्र्याश्चाप्रतिबन्धकत्वादिति शेषः । **अनुकूलेति** । व्यभिचारशङ्कानुत्पादानुकूलेत्यर्थः । **सहचा-**

ऽपि तर्काभावातिरिक्तकारणप्रतियोगिकाभावाच्छङ्कानुत्पादेन व्याप्तिग्रहोत्पादस्यावश्यकतया तर्करूपकारणाभावेन कार्यीभूतव्याप्तिग्रहस्य न जननात्तर्कस्य व्यभिचारितया व्याप्तिग्रहादौ प्रमाणसहकारित्वेनापि तस्य जनकत्वं न संभवतीति । विरहपदस्य शङ्काभावार्थकत्वे तस्य नित्यतया कारणप्रयोज्यत्वं न संभवतीत्याह—**अनुत्पाद इति** । कुत्र तर्कस्य व्यभिचारित्वमित्याशङ्कायामाह—**व्याप्तिग्रह इति** ।

मूले **योग्यानुपलब्ध्येति** । अत्र हेतौ यदि उपाधिः स्यात्तर्हि उपलभ्येतेत्याकारकानुपलब्ध्येत्यर्थः । **अयोग्यानामिति** । अतीन्द्रियाणामुपाधीनामित्यर्थः । **साध्याव्यापकेति** । विवादाध्यासितोपाधित्वेनाभिमतोऽयं साध्याव्यापकत्वे सति साधनव्यापकः साध्याव्यापकत्वादिना प्रमीयमानत्वादित्यनुमानेनोपाध्यभावग्रहः । ततोऽयं हेतुरुपाध्यभाववान् साध्याव्यापकसाधनव्यापककालानत्वादित्यादिना हेतावनुपाधित्वग्रहः । एतदेवाह टीकायाम्—**अनुमानेति** । भावमाह—**तथा चेति** । तर्काहेतुकमेव = तर्काजन्यमेव । एवकारादनौपाधिकत्वज्ञानस्यानौपाधिकत्वज्ञानहेतुकत्वव्यवच्छेदः । तथा च निरुक्तानौपाधिकत्वज्ञानस्य व्याप्तिज्ञानजनकत्वे नानवस्थेति भावः । **तदनुमानेति** । तादृशसाध्याव्यापकत्वानुमानार्थकम् । तथा च साध्याव्यापकत्वस्य यद्यनुमानप्रमाणान्निश्चयस्तदा तादृशनिश्चयजनकव्याप्तिज्ञानेऽनौपाधिकत्वज्ञानं जनकं वाच्यमिति तत्र तत्रापीत्यादिनाऽनवस्थातादवस्थ्यमिति भावः ।

अनुकूलतर्कस्य व्याप्तिग्रहे प्रयोजकत्वमपि नास्तीतिमतं मूलकारोक्तं विवृणोति—**व्यभिचारसंशयस्येति** । तथा च व्यभिचारसंशयसत्त्वे तादृशसंशयसामग्रीसत्त्वे वा यदि व्याप्तिग्रहोत्पादः स्यात्तदा तादृशसंशयनिवृत्त्यर्थं तर्कानुसरणं निष्फलमित्याशयः । तर्के व्याप्तिज्ञानानुकूलत्वस्योभयमतासिद्धतया तस्य व्यभिचारशङ्कानुत्पादानुकूलत्वमाह—**व्यभिचारेति** । **सहचारेति** । साध्यसाधनानां सामानाधिकरण्यादिप्रत्यक्षादिमात्रेणेत्यर्थः । मात्रपदाद् व्यभिचारशङ्काद्यनुत्पादप्रयोजकतर्कस्य व्याप्तिग्रहहेतुत्वव्यवच्छेदः ।

तेषां पक्षेतरत्वस्य साध्यव्यापकत्वग्रहेऽनुमानमात्रमुच्छिद्येत। अनुमानमात्रोच्छेदकत्वादेव पक्षेतरो नोपाधिरिति चेत्; भ्रान्तोऽसि, नहि वयमुपाधित्वेन तस्य दोषत्वमाचक्ष्महे, साध्यव्यापकत्वेन तद्व्यतिरेकात्, पक्षे साध्यव्यावर्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य

रादीत्यादिना सम्बन्धिनः साध्यादेः परिग्रहः। व्याप्तिग्रहं=सर्वत्र व्याप्तिनिश्चयम्। साध्यव्यापकत्वग्रहे=साध्यव्यापकत्वनिश्चये। *अनुमानमात्रमिति*। सन्दिग्धसाध्यपक्षकानुमानमात्रमुच्छिद्येतेत्यर्थः। यथाश्रुते निर्णीतसाध्यके व्यभिचारनिश्चयसत्त्वेन पक्षेतरत्वस्य साध्यव्यापकत्वनिश्चयासंभवादनुमानमात्रोच्छेदाभावात्।

अस्माकं तु पक्षे साध्यस्य संशयसत्त्वे साध्ये पक्षेतरत्वव्यभिचारसंशयसत्त्वादनुकूलतर्कं विना न साध्यव्यापकत्वनिश्चयसंभव इति भावः। *अनुमानमात्रेति*। तादृशानुमानमात्रोच्छेदकत्वज्ञानलक्षणप्रतिकूलतर्कादित्यर्थः। नोपाधिः=न स्वव्यभिचारेण साध्यव्यभिचारोन्नायकः। *उपाधित्वेनेति*। व्यभिचारोन्नायकत्वेनेत्यर्थः। साध्यव्यापकत्वेन=तन्निश्चयेन, व्यापकव्यतिरेके=व्यापकव्यतिरेकज्ञाने। व्याप्यव्यतिरेकस्य=व्याप्यव्य-

---

सम्बधिन इति। सहचारेत्यादिः। साध्यव्यापकत्वस्य पक्षेतरत्वादौ सन्देहे उपाधेरपि हेतौ सन्दिग्धतया व्याप्तिग्रहोत्पादे बाधकाभावात्साध्यव्यापकत्वग्रहइत्यत्र ग्रहपदं निश्चयपरतया व्याचष्टे—साध्यव्यापकत्वेति। यत्र पक्षे साध्यनिश्चयो वर्त्तते तत्र पक्षेतरत्वे साध्यव्यापकत्वनिश्चयो न भवति साध्ये पक्षेतरत्वव्यभिचारनिश्चयात्। अतः पक्षेतरत्वस्योपाधित्वं सन्दिग्धसाध्यकपक्षे एव संभवति, तत्रैव पक्षेतरत्वादौ साध्यव्यापकत्वनिश्चयसंभवादिति पक्षेतरत्वस्योपाधित्वे सकलानुमानोच्छेदो न संभवतीत्याशयेनानुमानमात्रमुच्छिद्येतेत्यत्रोच्छेदपदं सन्दिग्धसाध्यपक्षकानुमानामात्रोच्छेदपरतया व्याचष्टे–सन्दिग्धेति। यथाश्रुते=अनुमानमात्रोच्छेदार्थकत्वे। व्यभिचारेति। पक्षेतरत्वाभाववत्पक्षादौ साध्यस्य वृत्तित्वनिश्चयसत्त्वेन निश्चितसाध्यवति पक्षे पक्षेतरत्वाभावसत्त्वेन चेत्यर्थः। अनुमानमात्रेति। निश्चितसाध्यपक्षकसन्दिग्धसाध्यपक्षकानुमानयोरुच्छेदाभाव इत्यर्थः।

अस्माकन्त्विति। अनुकूलतर्कस्य व्याप्तिग्राहकत्ववादिनान्त्वित्यर्थः। यदा तु पक्षे साध्यसंशयो वर्त्तते तदा पक्षेतरत्वाभाववद्वृत्तित्वं साध्ये सन्दिग्धमेव, तादृशसन्देहनिवृत्तिश्चानुकूलतर्कादेव भवति, ततः साध्यव्यापकत्वनिश्चय इत्याह–पक्ष इत्यादि। पक्षेतरत्वं यदि उपाधिः स्यात्तर्हि सन्दिग्धसाध्यपक्षकानुमानमात्रोच्छेदकत्वज्ञानविषयीभूतं स्यादित्याकारकप्रतिकूलतर्कादित्यर्थः। न सव्यभिचारेण=नोपाध्यभाववद्वृत्तित्वेन। साध्यव्यभिचारोन्नायकः=साध्याभाववद्वृत्तित्वानुमापकः। हेताविति शेषः। तथा च यत्र स्वाभाववद्वृत्तित्वसंबन्धेनोपाधिमत्त्वं तत्रैव साध्याभाववद्वृत्तित्वमितिव्याप्तिबलाद्धेतौ साध्यव्यभिचारानुमानं स्यात्तदा तत्रापि पक्षेतरत्वमुपाधिरित्युपाधेर्दूषकत्वं न संभवतीति हृदयम्।

व्यभिचारविति। साध्याभाववद्वृत्तित्वानुमापकत्वेनेत्यर्थः। तन्निश्चयेन=साध्यव्यापकत्वनिश्चयेन। मूले तद्व्यतिरेकादिति। व्यापकस्य पक्षेतरत्वस्य व्यतिरेकादभावज्ञानादित्यर्थः। टीकायां व्याप्येति। व्याप्यस्य साध्यस्य अभावज्ञानस्येत्यर्थः।

वज्रलेपाच्च । अपि च करवह्निसंयोगः शक्त्यतिरिक्तातीन्द्रियधर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वान्न साधकं, तत्र व्याप्तस्य पक्षधर्मत्वे किमप्रयोजकं नाम ? तस्माद् विपक्षबाधकतर्काभावान्न तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे तर्कनिरूपणम् ॥

तिरेकज्ञानस्य ।

ननु तादृशानुमानमात्रोच्छेदकत्वज्ञानमेव तत्र साध्यव्यापकत्वज्ञानविरोधीत्यस्वरसादाह—*अपि चेति* । *शक्त्यतिरिक्तेति* । न चास्मन्मते साध्याप्रसिद्धिः, पररीत्यैव परं प्रत्यभिधानात् । स्वमते तु शक्त्यतिरिक्तत्वबहिर्भावेन साध्यं बोध्यम् । न साधकम्=न लिङ्गम् . व्याप्तस्य=व्याप्तत्वेन निश्चितस्य, पक्षधर्मत्वे=पक्षधर्मत्वनिर्णये । *न तत्रेति* । व्यभिचारसंशयसामग्रीसत्त्वेन न तत्र व्याप्तिनिश्चय इत्यर्थः ।

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्येऽनुमानाख्यद्वितीयखण्डरहस्ये तर्करहस्यं समाप्तम् ।

यथाश्रुते वस्तुसत्त्वस्य सन्दिग्धतया ज्ञानपर्यन्तानुसरणम् । मूले **वज्रलेपादिति** । तथा च व्यभिचारानुमापकतयोपाधेर्न दूषकत्वमपि तु साध्यव्यापकस्योपाध्यभावज्ञानेन पक्षे व्याप्यस्य साध्यस्याभावज्ञाननिबन्धनमेव तस्य दूषकत्वं, तदानीं पक्षे साध्यज्ञानासंभवादित्याशयः । टीकायां **तादृशेति** । सन्दिग्धसाध्यपक्षकानुमानमात्रोच्छेदकत्वज्ञानमेवेत्यर्थः । एवकारात्तर्कस्य विरोधित्वव्यवच्छेदः । तत्र = पक्षेतरत्वे । **साध्येति** । संशयनिश्चयसाधारणसाध्यव्यापकत्वज्ञानं प्रति प्रतिबन्धकमित्यर्थः । मूले **करवह्नीति** । हस्तवह्निसंयोग इत्यर्थः । **शक्त्येति** । शक्तिभिन्नातीन्द्रियधर्मसमवायीत्यर्थः । जनकत्वादित्यनेनादृष्टस्य दृष्टान्तत्वं सूचितम् । न साधकं=नानुमापकम् । पक्षधर्मत्वे=पक्षवृत्तित्वे ।

उपसंहरति—**तस्मादिति** । तथा च भवन्मते सहचारग्रहस्य सत्त्वात्तत्र व्याप्तिग्रहोदयेन हेतोरनुमापकत्वं स्यादतस्तर्काभावादेव तत्र न व्याप्तिग्रह इत्येवं वक्तव्यमिति भावः । ननु नैयायिकमते शक्तेरप्रसिद्धतया साध्याप्रसिद्धिः स्यादित्याशङ्क्य समाधत्ते टीकायां—**पररीत्यैवेति** । शक्तिस्वीकर्तॄणां मतमवलम्ब्यैवेत्यर्थः । परं प्रति=तादृशशक्तिवादिनं प्रति । स्वमते तु=नैयायिकमते तु । **शक्त्येति** । तथा च तन्मते अतीन्द्रियधर्मसमवायित्वमात्रं साध्यं पर्यवसितमिति भावः । **न लिङ्गमिति** । भवितुमर्हतीति शेषः । अनिश्चितस्यानुमित्युत्पादाऽप्रयोजकत्वादाह—**निश्चितस्येति** । एवमग्रेऽपि निर्णयपदोपादानं बोध्यम् । हेतुपूरणेन व्याप्तिनिश्चयाभावं समर्थयति—**व्यभिचारेति** । न तत्र=न तादृश हेतावित्यास्तां विस्तरः ।

इति-श्री वामाचरणभट्टाचार्यकृततर्कमाथुरीकृतविवृतिः समाप्ता ।

कुमारसम्भव-महाकाव्यम्

[illegible] 'सुमनकली' टीकया सहितम् ।

[illegible] नियमों में निर्धारित है, इस काव्य की सुमनकली टीका [illegible] संस्कृत कालेज बनारस के साहित्यशास्त्राध्यापक पण्डित [illegible] की है। आज तक इतनी विस्तृत सरल व्याख्या [illegible] इस टीका में विशेषता यह है कि प्रत्येक श्लोक का १ अवतरण [illegible] दण्डान्वय प्रदर्शन, २ परीक्षोपयोगिनी व्याख्या, ३ विग्रह, व्याकरण, कोश, अलङ्कार, छन्द, प्रमाणप्रदर्शन, मल्लिनाथादि प्रदर्शित दोषोद्धार व्युत्पत्ति, ४ संस्कृत में भावार्थ ५ भाषा के संक्षिप्त पदों के द्वारा श्लोकाभिप्राय प्रदर्शन ६ हिन्दी में सरल भावार्थ ७ प्रत्येक सर्ग की कथा का संक्षेप में संग्रह ८ विस्तृत भूमिका इत्यादि लोकोत्तरता देखने ही से ज्ञात हो सकती है। २)

अभिज्ञानशकुन्तलनाटकम्

'रुचिर' 'किशोरकेलि' संस्कृत हिन्दीटीका द्वयोपेतम् ।

उपर्युक्त दोनों टीकायें संसारभरमें सर्वोत्तम सिद्ध हो चुकी हैं ३)

मुद्राराक्षसनाटकम्

'भावबोधिनी--आशुबोधिनी' संस्कृत हिन्दीटीका द्वयोपेतं, परिष्कृत द्वितीयसंस्करणम् ।

इस अभिनव द्वितीय संस्करण में ग्रन्थ की सारी कठिनता दूर करदी गई है। देखते ही आप प्रसन्न हो जांयगे ३)

वेणीसंहारनाटकम्

'प्रबोधिनी'—'प्रकाश' संस्कृत हिन्दीटीकाद्वयोपेतम् ।

इस ग्रन्थके टीकाकारों ने सभी नवीन व प्राचीन प्रकाशित टीकाओंका गुण दोष विवेचन करके नाटकीय व्याख्या के ढङ्ग पर श्लोकान्वय, विग्रह, पर्याय, सुन्दर अर्थ, भावार्थ अलङ्कार तथा कोषादि प्रमाण में शब्दान्तर देकर समन्वय करते हुए प्रबोधिनी और प्रकाश (संस्कृत-हिन्दी) टीकाओं से, श्लोक, प्राकृत तथा गद्य को इस तरह समझाया है कि, सुकोमल मति विद्यार्थी स्वयं भी इस से ज्ञान प्राप्त कर सक्ते हैं। १।।।)

स्वप्नवासवदत्त नाटकम्

अन्य संस्करणों से इस संस्करण की विशेषतायें-

इस संस्करण के "प्रबोधिनी" नामक संस्कृत व्याख्या में अन्वय, विग्रह, पर्याय, सुन्दर अर्थ, भावार्थ, कोश, अलङ्कार, छन्द नाट्य-लक्षण आदि विषय और साथ ही साथ "प्रकाश" नामक प्राञ्जल भाषा टीका भी रख दी गयी है। संस्कृत तथा हिन्दी दोनों ही में कथासार भी लिख दिया गया है, १।।।)

प्राप्तिस्थानम्—चौखम्बा-संस्कृत-पुस्तकालय, बनारस सिटी ।

२........

हरिदाससंस्कृतग्रन्थमालासमाख्या ।
काशीसंस्कृतसीरिजपुस्तकमालायाः

७०

न्यायविभागे (९) नवमं पुष्पम् ।

श्रीजगदीशतर्कालङ्कारकृतं

व्याप्तिपञ्चकम् ।

सिंहव्याघ्रलक्षणं च

प्रकाशकः—

जयकृष्णदास–हरिदासगुप्तः—

चौखम्बा संस्कृत सीरिज आफिस, विद्याविलास प्रेस,

गोपालमंदिर के उत्तरफाटक, बनारस सिटी ।

१९८६

राजशासनानुसारेण सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

हरिदास-संस्कृत-सीरिज़्।

१ पाणिनीयशिक्षादिसंग्रहः। अर्थात् पाणिनीयशिक्षा भाष्यसहिता, अष्टाध्यायीसूत्रपाठः, गणपाठः, वार्त्तिकपाठः, धातुपाठः, परिभाषापाठः, लिङ्गानुशासन, उणादिसूत्रपाठः, फिट्सूत्रपाठः, नवाह्निकभाष्यवार्त्तिकपाठश्चेतद्दशपाठसंग्रहात्मकोऽयं ग्रन्थः मूल्यम्-०-८

२ लघुसिद्धान्तकौमुदी। विषमस्थल टिप्पणी सहिता (शिक्षा-सूत्रपाठ-धातुपाठ-गणपाठ-वार्त्तिकपाठ-परिभाषापाठ सहिता) ग्लेज़ कागज मूल्यम् ०-१२-

" मोटा रफ कागज " ०-१०-

" पतला रफ कागज " ०-८-

३ शब्दरूपावलिः। (शतशब्दा) अर्थात् १०० संख्यशब्दानां-रूपाणि। " ०-२-

४ सारस्वतम्। सटीप्पण पूर्वार्द्धम्। " ०-८-

५ पूर्वपक्षावली। सपरिष्कृता। " ०-१-

६ वेदान्तपरिभाषा। धर्मराजाध्वरीन्द्रकृता। शिवदत्तपण्डितकृतार्थदीपिकाटीका सहिता। वेदान्ताचार्य भट्ट त्र्यम्बकरामशास्त्रिकृत विषमस्थलावबोधिन्या बृहट्टीपण्या समेता। मूल्यम् १-४-

७ श्रुतबोधः। महाकवि श्रीकालिदासविरचितः। पं० श्री कनकलाल शर्म्मणा (मैथिलेन) विरचितया परीक्षोपयोगिन्या विमलाख्यया संस्कृत टीकया भाषाटीकया च समलंकृतः। मूल्यम् ०-३-

८ पुष्टिमार्गीयस्तोत्ररत्नाकरः। पुरुषोत्तमनामसहस्र-षोडसग्रन्थसर्वोत्तमस्तोत्रप्रभृति (८५) स्तोत्रग्रन्थ-समूहात्मकः। मूल्यम् ०-१२-

९ कर्पूरस्तवः। श्रीमहाकालप्रणीतः। पण्डितराजरङ्गनाथ विद्वद्विरचित दीपिकाख्यटीकया, तथा साहित्याचार्य पण्डित नारायणशास्त्रि खिस्ते-कृत-परिमल नामकया टीकया च समन्वितः। मूल्यम् ०-

प्रकाशक—

जयकृष्णदास-हरिदासगुप्तः—

चौखम्बा संस्कृत सीरिज़-आफिस, विद्याविलास

गोपालमन्दिर के उत्तर फाटक बनारस सिटी।

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरिजपुस्तकमालायाः

७०

न्यायविभागे (९) नवमं पुष्पम्

श्रीजगदीशतर्कालङ्कारकृतं

व्याप्तिपञ्चकम्।

सिंहव्याघ्रलक्षणं च

श्रीकाशीस्थराजकीयपाठशालीयन्यायदर्शनप्रधानाध्यापक-महामहोपाध्याय
श्रीमद्गुरुचरण प० वामाचरणभट्टाचार्यानुगृहीतेन काशीस्थराज-
कीयपाठशालायां न्यायशास्त्राध्यापकेन न्यायाचार्य पं०
श्रीशिवदत्तमिश्रगौडेन विरचितया [illegible]निर्झरिणी
व्याख्यया संवलितम्

तत्कृतटिप्पण्यादिभिर्विभूषितं च।

काशीस्थ डी. ए. वी. नि. वेदविद्यालयप्रधानाध्यापकेन
पं० श्रीढुण्ढिराजशास्त्रिणा संशोधितम्।

प्रकाशकः—

जयकृष्णदास—हरिदासगुप्तः—

चौखम्बा संस्कृत सीरिज आफिस, विद्याविलास प्रेस
गोपालमंदिर के उत्तरफाटक, बनारस सिटी।

१९८६

राजशासनानुसारेण सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः

हमारे यहां हर तरहकी छपाई व जिल्दसाजीका कार्य भी होता है।

हर तरह के संस्कृत ग्रन्थ तथा भाषा पुस्तकों के मिलने का पता—

जयकृष्णदास-हरिदास गुप्तः,

चौखम्बासंस्कृतसीरिज आफिस,

विद्याविलास प्रेस, गोपालमन्दिर लेन,

बनारस सिटी।

अथ व्याप्तिपञ्चकस्य चिन्तामणिः ।

व्याप्तिग्रहोपायश्च वक्ष्यते ।

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ।

श्रीरघुनाथशिरोमणिकृता व्याप्तिपञ्चकदीधितिः ।

सर्वमिदं सति व्याप्तिनिश्चये स्यात्, स एव न सम्भवति उपायाभावादित्यत आह **व्याप्तीति** । समारब्धानुमानप्रामाण्यपरीक्षाकारणीभू

श्रीजगदीशतर्कालङ्कारकृतं व्याप्तिपञ्चकव्याख्यानम् ।

ननु व्याप्तिग्रहोपायश्च इत्युक्तं प्राक्, निरूप्यते च व्याप्तिरित्यर्थान्तरमत आह समारब्धेति । **समारब्धा या अनुमानप्रामाण्यपरीक्षा परमतनिराकरणपूर्वकं स्वमतेनाऽनुमानप्रामाण्यसाधनं, तत्कारणीभूतो यो**

न्यायाचार्यशिवदत्तमिश्रकृता सुबोधाख्या जागदीशीटीका ।

यत्कारुण्यकणस्पर्शान्मूको वाचस्पतिर्भवेत् ।
ब्रह्मोपेन्द्रशिवैर्वन्द्या नौमि तां वागधीश्वरीम् ॥ १ ॥
जननीजनकौ नत्वा ध्यायं ध्यायं गुरोः पदम् ।
क्रियते शिवदत्तेन सुबोधा पञ्चलक्षणी ॥ २ ॥

ननु अनुमानप्रामाण्यव्यवस्थानिर्वाहको व्याप्तिग्रहोपाय एव कथनार्हो न तु व्याप्तिस्वरूपं कथनार्हं प्रयोजनाभावादिति नन्वित्यादिना व्याप्तिस्वरूपनिरूपणारम्भणं व्यर्थम् । न चाऽनुमितिलक्षणघटकतया व्याप्तिस्वरूपं कथनार्हमेवेति वाच्यम् । 'यां काञ्चिदि'त्याद्यनुमितिलक्षणस्यैव निष्कृष्टतया व्याप्तिस्वरूपस्य तदघटकत्वात्, अत एव प्रकृतानुमितिलक्षणघटकत्वस्वरूपोपोद्घातसंगत्याऽनुमितिनिरूपणानन्तरं व्याप्तिनिरूपणमारभते 'नन्वित्यादिने'त्यवतारणमपि निरस्तम् इति चेत्तत्राह **समारब्धेति** । समीचीनभूतकालिकाऽऽरम्भविषया वर्त्तमानकालवृत्तिध्वंसप्रतियोगिनी या(१) आद्यकृतिस्तद्विषयेति यावत् । इदं च परीक्षाविशेषणम् ।

---

(१) आङ्पूर्वकरभधातोराद्यकृतिरर्थः आद्यकृतिश्चोक्ता वेदितव्या । अतीतत्वं विषयत्वं च क्तप्रत्ययार्थः । अतीतत्वं च वर्त्तमानकालवृत्तिध्वंसप्रतियोगित्वम्, वर्त्तमानकालश्च नन्वित्यादिशब्दप्रयोगाधिकरणकालः । कृतौ अतीतत्वं च वर्त्तमानकालवृत्तिध्वंसविशिष्टत्वम् । वैशिष्ट्यं स्वोत्पत्त्यधिकरणकालवृत्तिकृतिजन्यक्रियाजन्यफलानुकूलव्यापाराऽनुकूलत्वस्वप्रतियोगित्वोभयसम्बन्धेन । न च क्तप्रत्ययार्थीभूतविषयत्वे क्तप्रत्ययार्थीभूताऽतीतत्वाऽन्वितरभधात्वर्थान्वयो न घटते, सङ्ख्यान्यप्रत्ययार्थस्य प्रकृत्यर्थविशेष्यत्वनियमेन प्रत्ययानां केवलप्रकृत्यर्थान्वितस्वार्थस्यैव बोधकत्वेन स्वार्थान्वितप्रकृत्यर्थान्वितस्वार्थबोधकत्वाऽसम्भवादिति वाच्यम् । अप्रयोजकत्वात् । प्रत्ययानां स्वार्थाऽन्वितप्रकृत्यर्थान्वितस्वार्थान्तरबोधकत्वस्यापि स्वीकारात् ।

न्व्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते **नन्वि-त्यादिना ।**

व्याप्तिग्रहः तदुपायप्रतिपादनतन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः । व्याप्तिज्ञानं विना 'अयं व्याप्तिग्रहोपाय' इति ज्ञातुमशक्यत्वाद् व्याप्तेस्तत्र विशेषणत्वादिति भावः । तथाच व्याप्तिग्रहोपायाभिधानोपयुक्तत्वेन तन्नि-रूपणमिति हृदयम ।

परीक्षापदार्थमाह **परमतेति** । परमत परमतिविषयः, परमतसिद्धार्थोऽनुमानाऽप्रामाण्यं तद्विषयकज्ञाने मध्यस्थस्याऽप्रामाण्यज्ञानसंपादनम्, यद्वा परमतं परमतिः सा च नाऽनुमानं प्रमाणमित्याकारिका तन्निराकरणं तत्राऽप्रामाण्यज्ञापनं तत्पूर्वकं, तदुत्तरकालिकं यत् स्वमतेन अनुमानप्रामाण्यसाधनं अप्रामाण्यज्ञानानास्कन्दिततद्गोचरज्ञानानुकूलो व्यापारः (शब्दप्रयो-गरूपः) अनुमानाऽप्रामाण्यज्ञानधर्मिकाऽप्रामाण्यज्ञानविरहेऽनुमानधर्मिकप्रामाण्यग्रहानुत्पत्त्या व्यापारस्य न ज्ञानजनकत्वसम्भव इति भवति तस्य परमतनिराकरणपूर्वकत्वम् । परीक्षाया आरब्धत्वकथनेन प्रामाण्यपरीक्षाया वृत्तत्वनिरासात्तदुपयोगिव्याप्तिग्रहोपायप्रतिपादनादेवैकल्य-शङ्का निरस्ता ।

एवं च समारब्धा या अनुमानप्रामाण्यपरीक्षा तत्करणीभूतो यो व्याप्तिग्रहः, वस्तुतस्तु तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनमित्यन्वयः । न च व्याप्तिग्रहोपायप्रतिपादनस्य श-ब्दरूपपरीक्षां प्रति कथं कारणत्वमिति वाच्यम् । परीक्षापदार्थघटकीभूतस्वमतव्यवस्थितिरू-पानुमितौ व्याप्तिग्रहोपायप्रतिपादनस्य हेतुत्वेन तद्विशिष्टे कारणत्वोक्तेः । कथं तत्र तस्य हे-तुत्वमिति चेत् । इत्थम्—अप्रामाण्यरूपसाध्यानुमापकचार्वाकोक्तहेतुमत्ताज्ञानं यन्मध्यस्थस्य जातं तादृशहेतुमत्ताज्ञाने अप्रामाण्यज्ञानसंपादनार्थं प्रथमतः प्रामाण्यसाधकहेतुमत्ताज्ञानं संपा-दनीयम्, तच्च न सम्भवति, इन्द्रियत्वादावेव प्रमितिजनकतावच्छेदकतायाः प्रसिद्धतया तादृशेन्द्रियत्वाभावज्ञानस्यैव स्वरूपासिद्धिज्ञानरूपस्य विद्यमानत्वात् । एवं च तादृशासिद्धिनि-वारणपूर्वकहेतुमत्ताज्ञानसंपादनार्थं व्याप्तिग्रहोपायप्रतिपादनमिति रीत्या कारणत्वं बोध्यम् । एवं यत्राऽनवस्थादिदोषकवलिततर्कानिवर्त्यव्यभिचारशङ्काऽवरुद्धोत्पत्तिकव्याप्तिग्रहाऽसत्त्वनिब-न्धनाऽनुमितिरूपफलानुत्पत्त्या चार्वाकादयोऽप्रामाण्यमनुमानस्य स्वीकुर्वन्ति तत्र व्याप्तिग्र-होपायमनभिधायाऽनुमानस्य प्रामाण्यं व्यवस्थापयितुमशक्यमिति व्याप्तिग्रहोपायप्रतिपाद-नस्य परीक्षाकारणत्वम् ।

तन्निदानं व्याप्तिस्वरूपनिरूपणमिति । तन्निदान—प्रामाण्यव्यवस्थापकत्वविशि-ष्टव्याप्तिग्रहोपायप्रतिपादननिदानम्, व्याप्तिग्रहोपायश्च व्यभिचारग्रहाभावः सहचारग्रहश्च, व्याप्तिश्च हेतुव्यापकसाध्यसमानाधिकरणहेतुतावच्छेदकरूपा, एवं चोपायनिरूपणे सिद्धान्तसि-द्धव्याप्तिस्वरूपनिरूपणस्य स्वतन्त्राऽन्वयव्यतिरेकसत्त्वादज्ञातव्याप्तिस्वरूपं शिष्य प्रति उपा-यनिरूपणस्य दुष्करत्वादिति भावः ।

न तावदव्यभिचरितत्वम् । तद्धि न साध्याभाववदवृत्तित्वम् १ साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम् २ साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम् ३ सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् ४ साध्यवदन्याऽवृत्तित्वं वा ५ केवलान्वयिन्यभावात् ।

लोकेऽव्यभिचरितत्वशब्दार्थे व्याप्तिव्यवहारात्तस्य व्याप्तिस्वरूपत्वं निराकरोति **न ता वदिति** । अव्यभिचरितत्वं-अव्यभिचरितत्वशब्दार्थः । व्याप्तिरित्यनुषज्यते । तथा चाऽनुमितेनाऽव्यभिचरितत्वे व्याप्तिभेदः साधनीयः, तथा हि-अव्यभिचरितत्वं अनुमितिजनकतावच्छेदकव्याप्तिस्वरूपभिन्नं स्वविशेषसाध्याभाववदवृत्तित्वादियावद्वृत्त्यनुमितिजनकतावच्छेदकतावच्छेदकव्याप्तिस्वरूपभेदकत्वात्, यत्स्वविशेषतावद्वृत्तिभेदकं तत्तद्भिन्नं, यथा पटः स्वविशेषयावद्वृत्तिपटादिभेदकः पटादिभिन्नश्च । सामान्यविशेषभावानुपपत्तिरेवाऽत्राऽनुकूलस्तर्कस्तेन नाऽप्रयोजकत्वम् । स्वरूपाऽसिद्धिं निराकरोति **तद्धीति** । हि यस्मात् **तत्** अव्यभिचरितत्वविशेषरूपं साध्याभाववदवृत्तित्वादिकं नाऽनुमितिजनकतावच्छेदकव्याप्तिस्वरूपम् । हेतुमाह **केवलान्वयीति** । केवलान्वयिसाध्यकानुमितिजनकज्ञाने विषयतयाऽभावादित्यर्थः । अन्यूनाऽनतिरिक्तवृत्तेरेवाऽवच्छेदकत्वेनाऽवच्छेद्यावच्छेदकभावानुपपत्तिरेवाऽत्रानुकूलस्तर्क इति भावः ।

केचित्तु **न तावदिति** । अव्यभिचरितत्वं नाऽनुमितिजनकतावच्छेदकव्याप्तिस्वरूपं दुर्वचत्वादित्यर्थः । ननु साध्याभाववदवृत्तित्वादिरूपतया सुवचत्वेन न दुर्वचत्वमत आह **तद्धीति** । अव्यभिचरितत्वं हीत्यर्थः । तत्र हेतुमाह **केवलान्वयीति** । न चाऽव्यभिचरितत्वे साध्याभाववदवृत्तित्वादिभेदे साध्ये केवलान्वयिनीत्यादिहेतोरनुकूलतर्कविरहेणाऽप्रयोजकत्वमिति वाच्यम् । निरुपधिसहचारस्यैवाऽत्रानुकूलतर्कत्वादित्याहुः ।

अन्ये तु **न तावदिति** । अनुमितिजनकतावच्छेदकव्याप्तिस्वरूपम् अव्यभिचरितत्वसामान्यभिन्नमित्यर्थः । सामान्यभेदे विशेषभेदकूटं हेतुमाह **केवलान्वयीति** । शेषं पूर्ववदित्याहुः । विस्तरस्त्वन्यतोऽवसेयः ।

ननु केवलान्वयिन्यभावादिति मूलोक्तं न सङ्गच्छते, तथाहि—स्वावच्छिन्नाभाववद्वृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकाभाववत्त्वमेव व्याप्तिरस्तु, केवलान्वयिनि च तादृशसम्बन्धस्य साध्यतावच्छेदकव्यधिकरणतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकाभावस्य केवलान्वयितया हेतौ सत्त्वादिति चेन्न । वृत्त्यनियामकसम्बन्धस्याऽभावप्रतियोगितानवच्छेदकत्वे वृत्तिनियामकसम्बन्धघटिताऽव्याप्यत्वस्य वृत्तिनियामकत्वेऽपि वृत्त्यनियामकसम्बन्धघटितस्य तस्य वृत्त्यनियामकतया धनी चैत्रत्वादित्यत्र चैत्रो धनादित्यत्र चाऽव्याप्तिः, तादृशसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकाऽभावस्याऽप्रसिद्धेः । न च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसम्बन्धित्वाभाववती हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नसम्बन्धिता तद्धर्मवत्त्वमित्युक्तौ न दोषः अभावश्च स्वाभाववद्वृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकः । अत्र स्वाभावश्च स्वरूपसम्बन्धावच्छिन्नप्रति-

साध्याभाववदवृत्तित्वस्याऽव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह **साध्यवद्भिन्नेति २।** साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृत्तित्वमर्थः।

अव्याप्यवृत्तीति। **कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः। इदं च येन** योगिताकः, वृत्तित्वं च स्वरूपेणैवेति वाच्यम्। सम्बन्धितायाः नानात्वे साध्यसम्बन्धित्वाभाववतो या पर्वतीयवह्निसम्बन्धिता तन्निरूपकतावच्छेदकत्वस्य वह्नित्वे सत्त्वाद् धूमवान् वह्नेरित्यादावतिव्याप्तिः। न च यद्धर्मावच्छिन्नसम्बन्धितात्वावच्छेदेन निरुक्तसम्बन्धित्वाभावो निवेश्यते इति न सकलवह्निसम्बन्धितायां तथात्वमतो नोक्तदोष इति वाच्यम्। यद्धर्मावच्छिन्नसम्बन्धितात्वावच्छेदेनेत्यस्य व्यापकतारूपतया सिद्धान्तलक्षणापेक्षया लघुत्वाभावात् ईदृशपरम्परायाः संसर्गत्वे मानाभावाच्च।

केचित्तु स्वनिष्ठप्रतियोगिताकाभाववद्वृत्तित्वस्य संसर्गत्वेऽसम्भवापत्त्याऽवच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वस्य ससर्गत्वं वाच्यम्, एवं च गुरुधर्मस्य प्रतियोगिताऽनवच्छेदकत्वे तद्रूपवान् रसादित्यत्रातिव्याप्तिः, तद्रूपत्वावच्छिन्नसम्बन्धित्वाभावप्रतियोगितावच्छेदकत्वस्य लाघवेन तद्व्यक्तित्वे एव कल्पनीयतया उक्तावच्छिन्नाभाववद्वृत्तित्वस्य तद्रूपावच्छिन्नसम्बन्धित्वव्यधिकरणतया तदभावस्य हेतुतावच्छेदकावच्छिदकावच्छिन्नसम्बन्धित्वे सत्त्वात्, उक्तसम्बन्धिताव्यक्त्यभावनिवेशे च वह्निमान् धूमादित्यत्राव्याप्तिः। यदि च गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमङ्गीक्रियते तदैतस्य लक्षणान्तरत्वमवसेयमिति प्राहुः।

ननु साध्याभाववदवृत्तित्वमित्यत्र साध्याभाववति वर्त्ततेऽसौ साध्याभाववद्वृत्तिः, न साध्याभाववद्वृत्तिरिति साध्याभाववदवृत्तिः तस्य भावस्तत्वमित्येवं न सप्तमीतत्पुरुषगर्भो नञ्समासः असाध्याभाववद्वृत्तित्वमित्यापत्तेः। नापि न विद्यते वृत्तिर्यस्याः असाववृत्तिः, अवृत्तिक इति यावत्, तस्याभावस्तत्त्वम्, साध्याभाववति अवृत्तित्वमिति साध्याभाववदवृत्तित्वमित्येवं बहुव्रीहिगर्भसप्तमीतत्पुरुषः, साध्याभाववदन्वितसप्तम्यर्थस्य हेतुसम्बन्धिवृत्तित्वसामान्याभावेऽन्वयेन साध्याभाववन्निष्ठो हेतुसम्बन्धिवृत्तित्वसामान्याभाव इत्यर्थपर्यवसाने व्यभिचारिसाधारण्यात्। न च साध्याभाववन्निष्ठो निरूपकतासम्बन्धावच्छिन्नप्रतियोगिताको हेतुसम्बन्धिवृत्तित्वसामान्याभावस्तत्पर्यवसितोर्थः, तस्य च व्यभिचारनिरूपकाधिकरणेऽसत्त्वेन न व्यभिचारिसाधारण्यमिति वाच्यम्। तस्यापि ह्रदादियत्किञ्चिद्व्यक्तिनिष्ठत्वेन व्यभिचारिसाधारण्यस्य दुरुद्धरत्वात्। न च साध्याभाववति यावत्त्वविशेषणान्नैष दोष इति वाच्यम्। सकलसाध्याभाववन्निष्ठत्वेनेन पौनरुक्त्यापत्तेः इति चेत्।

अत्राहुः। साध्याभाववदन्वितसप्तम्यर्थस्याऽवृत्तित्वैकदेशवृत्तित्वेऽन्वयेन साध्याभाववद्वृत्तित्वाभाववत्त्वरूपार्थपर्यवसानेन बहुव्रीहिगर्भसप्तमीतत्पुरुषाङ्गीकारे दोषाभावात्। न च वृत्तस्य विशेषणयोगो नास्तीति वाच्यम्। चैत्रस्य गुरुकुलमित्याद्यनुरोधेन ससम्बन्धिकपदस्थले तदङ्गीकारादिति।

वस्तुतस्तु साध्याभाववतो न वृत्तिर्यत्रेति त्रिपदव्यधिकरणबहुव्रीह्युत्तरं त्वप्रत्ययः, साध्याभाववत इत्यत्र निरूपितत्वं षष्ठ्यर्थः, अन्वयश्चास्य वृत्तावित्यन्यत्र विस्तरः।

इदं चेति। साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताक-

सम्बन्धेन येन रूपेण च साध्यत्वं तदवच्छिन्नस्य साध्याभावस्य प्रवेशमाहु-त्य, अन्यथा तु व्याप्यवृत्तिसाध्यकेऽपि विशिष्टाभावादिकमादाय दो-षो बोध्यः ।

साध्याभावस्य प्रवेशमाहुरित्यन्वयः । अन्यथा, प्रतियोगितावच्छेदकनिवेशे व्याप्यवृत्ति **साध्यकेऽपि**-वह्निमान् धूमादित्यादावपि, विशिष्टाभावं द्रव्यत्वरूप-महानसीयवह्न्यभाव-मादाय समवायेन वह्न्यभावं चादाय, दोषो बोध्यः-अव्याप्तिरूपदोषो बोध्य इत्यर्थः । **इदमुपलक्षणम्** । साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारता-शालिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतप्रकारतावच्छेदकसम्बन्धेन साध्याभाववत्त्वं विवक्षणीयम्, अन्यथा कालिकसम्बन्धेन वन्ह्यभावाधिकरणपर्वतादौ हेतोः सत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिः स्यात् । न च स्वरूपसम्बन्धेन साध्याभावाधि-करणत्वं वाच्यमिति वाच्यम् । घटत्वाभाववान् घटत्वादित्यादौ साध्याभावस्य घटत्वस्य तेन सम्बन्धेनाऽधिकरणाप्रसिद्ध्याऽव्याप्तेः । न च स्वरूपसमवायान्यतरसम्बन्धेन साध्या-भावाधिकरणत्वोक्तौ न दोष इति वाच्यम् । वन्ह्यभाववान् वन्ह्यवयवत्वादित्यादौ वन्हिरूप-साध्याभावस्य समवायेनाऽधिकरणे वन्ह्यवयवे हेतोः सत्त्वादव्याप्त्यापत्तेरिति ।

न च तथापि घटभिन्नः घटत्वत्वादित्यादावव्याप्तिः, घटभेदवत्ताबुद्धिं प्रति समवायेन यथा घटत्ववानिति निश्चयो विरोधी तथा तादात्म्येन घटवानिति निश्चयो विरोधी तादृशप्र-तिबन्धकतावच्छेदकप्रकारतावच्छेदकतादात्म्यसम्बन्धेन घटत्वस्वरूपसाध्याभावाधिकरणे घटत्वे हेतोर्वृत्तेरिति वाच्यम् । साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्न-प्रकारतानिरूपितकिञ्चिद्धर्मावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिब-न्धकतावच्छेदकीभूतप्रकारताविशिष्टसाध्याभावत्वावच्छिन्ननिरूपकताकाधिकरणतावद्वृत्तित्वाभा-वस्य विवक्षितत्वात् । वै० स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वावच्छेदकधर्मावच्छिन्नत्वो-भयसम्बन्धेनेति, तथा च समवायसम्बन्धावच्छिन्नघटत्वनिष्ठप्रकारतावैशिष्ट्यस्य तादात्म्यस-म्बन्धावच्छिन्नघटत्वनिरूपकतायामसत्त्वादिति ।

न च तादृशप्रकारतावैशिष्ट्यं सामान्यतो निरूपकतायां निवेश्यमलं साध्याभावत्वाव-च्छिन्नत्वस्य तत्र निवेशेनेति वाच्यम् । वन्हिमान् धूमादित्यादावव्याप्तिः, वन्हिमत्ताबुद्धिं प्रति वह्न्यभावव्याप्यधूमवानिति निश्चयस्यापि प्रतिबन्धकतया तदवच्छेदकीभूतप्रकारतावैशिष्ट्यस्य धूमत्वावच्छिन्ननिरूपकतायामनपायात् । न च सम्बन्धघटकस्वावच्छेदकावच्छिन्नेत्यनेन स्वाव-च्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवत्त्वं विवक्षणीयम्, रूप-वृत्तित्वं च निरूपकतायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन, तथाच वन्ह्यभावव्याप्यधूमत्वगतसमुदायत्वे तादृशसम्बन्धेन निरूपकताया अ-सत्त्वात्तादृशनिरूपकतया धारणाऽसम्भव इति वाच्यम् । विषयतात्ववान् प्रकारतात्वादित्या-दावव्याप्तेः, प्रकारताविशेष्यकविषयतात्वप्रकारकसाध्यवत्ताबुद्धिं प्रति स्वरूपसम्बन्धावच्छि-न्नाधेयतासम्बन्धेन प्रकारतात्ववान् विषयतात्वाभाव इति विपरीतनिश्चयप्रतिबन्धकतावच्छेद-कीभूततादृशाधेयत्वसम्बन्धावच्छिन्नप्रकारतात्वावच्छिन्नप्रकारताविशिष्टनिरुक्तसम्बन्धावच्छिन्न-

अव्याप्यवृत्तिसाध्यकेऽपि आकाशादिहेतावव्याप्त्यभावादाह सद्धेता-विति। **वृत्तिमद्धेताविति तदर्थः। अव्याप्यवृत्ति साध्यं यत्र तत्र सन् वर्त्तमानो यो हेतुस्तत्रेत्यर्थः। तेन संयोगाभाववान् गुणत्वादित्यादावव्याप्त्यभावेऽपि न क्षतिरिति वदन्ति।**

निरूपकता तन्निरूपकाधिकरणे प्रकारतात्वे हेतोः सत्त्वादिति तत्त्वम्।

न च संयोगेन वन्हिमत्ताबुद्धिं प्रति कालिकेन वन्ह्यभाववान् स्वरूपेण वन्ह्यभाववान् कालिकेन वन्ह्यभाववान् पर्वत इति ज्ञानस्यापि निश्चयावीशेष्टनिश्चयत्वेन प्रतिबन्धकतया तत्प्रतिबन्धकतावच्छेदकीभूतप्रकारतावच्छेदककालिकसम्बन्धेन धूमस्य वन्ह्यभाववद्वृत्तित्वाद्वन्हिमान् धूमादित्यादावव्याप्तिरिति वाच्यम्। ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताया एव वक्तव्यत्वात्। प्रागुक्तक्रमेण साध्याभावत्वावच्छिन्ननिरूपकतानिवेशाच्च विशिष्टसत्ताभाववान् गुणत्वादित्यादौ च नाव्याप्तिः। यथाश्रुते साध्याभावस्य विशिष्टसत्तास्वरूपस्य सत्तानतिरिक्ततया तदधिकरणे गुणादौ हेतोर्वृत्तेरित्यन्यत्र विस्तरः।

'असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयो भवती'ति नियमात् अव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेनाऽव्याप्तिर्ग्रन्थकतुरभिमता, सा च न सम्भवति अव्याप्यवृत्तिसाध्यं यस्य स अव्याप्यवृत्तिसाध्यकः तादृशश्चासौ हेतुश्चेति व्युत्पत्त्या कपिसंयोगी गगनादित्यत्राऽव्याप्तेरभावादित्यत उक्तम् **वृत्तिमद्धेताविति तदर्थ इति**। तथाच गगनहेतोर्वृत्तिमत्त्वविरहादुद्देश्यतावच्छेदकानाक्रान्तया तत्राऽव्याप्तिविरहेऽपि न क्षतिः।

अव्याप्यवृत्ति साध्यं यत्रेति। तथा च साध्यनिष्ठाऽव्याप्यवृत्तितानिरूपकाधिकरणवृत्तिहेतुतावच्छेदकावच्छेदेनाऽव्याप्तिरिति निष्कर्षे न दोषः। फलमाह **तेनेति**। यत्र हेत्वधिकरणे साध्यमव्याप्यवृत्ति तत्रेत्यर्थकरणेनेत्यर्थः। न क्षतिः—न व्यभिचारः। गुणत्वादेः साध्यनिष्ठाऽव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वविरहात्।

वदन्तीति। अथात्र सत्पदं व्यर्थम्, अव्याप्यवृत्ति साध्य यत्रेति अव्याप्यवृत्तिसाध्यकः अव्याप्यवृत्तिसाध्यके हेतुरिति अव्याप्यवृत्तिसाध्यकहेतुरिति समासेनैवोक्तदोषविरहात्। न चैतादृशव्युत्पत्तिलाभार्थमेव सत्पदमिति वाच्यम्। तथापि संयोगाभावसाध्यकद्रव्यत्वेहेतौ निरुक्तोद्देश्यतावच्छेदकाक्रान्ततया तत्र द्वितीयलक्षणेनाऽपि साध्यवद्भेदाऽप्रसिध्याऽव्याप्तेरवारणात् इति चेन्न। अव्याप्यवृत्तिसाध्यकेत्यत्र न व्याप्यवृतिरव्याप्यवृत्तिरिति व्युत्पत्त्या निरवच्छिन्नवृत्तिकान्यसाध्यकहेतावित्यर्थः। एवं च संयोगाभावस्य गुणादौ निरवच्छिन्नवृत्तिकत्वेन तदन्यत्वविरहान्न तत्साध्यकहेतोरुद्देश्यतावच्छेदकाक्रान्तत्वमिति।

वस्तुतः केवलान्वयिनि पृथग्दोषस्य दर्शनीयतया अव्याप्यवृत्तिसाध्यकेत्यस्य केवलान्वयिभिन्नसाध्यकेत्यर्थः। केवलान्वयिभिन्नत्वमन्योन्याभावप्रतियोगितावच्छेदकत्वमिति न दोषः।

केचित्तु वादिवाक्यार्थविकल्पस्थले यथाकाममेव विकल्पितार्थोपन्यासः, न च पौर्वापर्योपन्यासे नियोगपर्यनुयोगोऽस्ति, किन्तु दीधितिकृता अवतरणव्याजेन प्रथमलक्षणे एवाऽव्यवृत्तिसाध्यकाऽव्याप्तिर्न द्वितीयादिलक्षणे इति सूचितम्, नातो मणिकृन्न्यूनतापीति प्राहुः।

अव्याप्तिः-व्याप्त्यसत्त्वम्, असद्धेतौ तस्याऽदोषत्वात्सद्धेतावित्युक्तमेवमग्रेपीत्यपि कश्चित्।

ननु साध्यवद्भिन्नो यः साध्याभाववानित्यर्थे साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नाऽवृत्तित्वमित्यस्यैव सम्यक्त्वात् । न चाऽवृत्तित्वेन समं साध्यवद्भिन्नस्याऽन्वयाविवक्षणात्साध्याभाववता सममेव तादात्म्येनाऽन्वयविवक्षणान्न वैयर्थ्यमिति वाच्यम् । तथापि साध्यवद्भिन्नात्मको यो मतुबर्थः सम्बन्धी तदवृत्तित्वस्यैव सम्यक्त्वे साध्याभावपदवैयर्थ्यं स्यादतः

न च साध्याभावे प्रतियोगिवैयधिकरण्यानिवेशेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र नाव्याप्तिरिति वाच्यम् । प्रतियोगिमद्भिन्नत्वघटितप्रतियोगिवैयधिकरण्यस्य प्रकृते साध्यवद्भिन्न[illegible]मानेन तद्घटितस्यैव द्वितीयलक्षणत्वात् ।

ननु तथापि अवतरणमसङ्गतं, तथा हि अत्र सम्बन्धसामान्येन साध्याभाववत्त्वविवक्षणे कालो घटवान् कालपरिमाणादित्यत्र कालिकसम्बन्धेन साध्यतायां कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्याऽऽत्मादौ प्रसिद्धस्य कालिकसम्बन्धेन कालेऽपि सत्त्वादव्याप्तिः, अभावीयविशेषणतया तद्विरहे धूमाभाववान् वह्न्यभावादित्यादौ साध्याभावस्य [illegible]नयाऽव्याप्तिः, भावाऽभावसाधारणाऽभावीयविशेषणताया असम्भवात् । अतः साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताग्रहविरोधित्वनियामकसम्बन्धेन तद्वत्त्वं वाच्यम् कालिकसम्बन्धेन घटसाध्यकस्थले अभावीयविशेषणताविशेषस्य धूमाभावसाध्यकस्थले च संयोगस्य तथात्वान्नाव्याप्तिः । न चैवं कपिसंयोगाभाववान् ज्ञेयत्वादित्यादौ तादृशसम्बन्धाऽप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् । केवलान्वयिनीत्यादिना मूले एव तद्दोषाभिधानात् । एवं च कपिसंयोगादिसाध्यके केवलविशेषणताविशेषस्य न साध्यवत्ताग्रहविरोधितानियामकत्वं स्वरूपेण तेन सम्बन्धेन साध्याभाववत्ताग्रहेऽपि साध्यवत्ताज्ञानोदयात्, किन्तु निरवच्छिन्नविशेषणताविशेषस्यैव तेन सम्बन्धेन च साध्याभावस्य गुणादावेव सत्त्वादव्याप्तिविरहादिति चेन्न ।

अव्याप्यवृत्तित्वज्ञानशून्यकालीनसाध्याभाववत्ताज्ञानदशायां साध्यवत्ताज्ञानानुदयेन तत्काले च तस्य बाधप्रतिबन्धकतायामुत्तेजकत्वेन साध्यवत्ताज्ञानोत्पत्तौ बाधकाभावेन केवलाऽभावीयविशेषणताविशेषस्यैव तथात्वेनाऽव्याप्तिसम्भवादवतरणसङ्गतेः, अन्यथाऽप्रामाण्यज्ञानादिकालीनसाध्याभाववत्ताज्ञानकाले साध्यवत्ताज्ञानोदयेन निरवच्छिन्नविशेषणताया अपि तथात्वाऽसम्भवात् ।

केचित्तु साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य यत्सम्बन्धावच्छिन्नप्रतियोगिताकाऽभावः साध्यं तेन सम्बन्धेन साध्याभाववत्त्वं विवक्षणीयं न तूक्तसम्बन्धेनेति नावतरणाऽसङ्गतिर्नाप्युक्तदोषा इति प्राहुः ।

अभावाऽभावस्याऽतिरिक्तत्वे स्वरूपेणैव साध्याभाववत्त्वनिवेशान्न तदसङ्गतिरित्यपि कश्चित् ।

वस्तुत उक्ताशयेनैव दीधितिकृताऽव्याप्तिमाशंक्याहेत्युक्तम् , अन्यथाऽव्याप्तेराहेत्येव ब्रूयात्, तथाचाऽऽपाततो यथाश्रुतेऽव्याप्तिशङ्कया लक्षणान्तरप्रणयनं न तु वस्तुगत्याऽव्याप्तिरपि उक्तरीत्या तदभावात् ।

न वैयर्थ्यमितीति । कर्मधारयपक्षेपीति शेषः । **सम्बन्धीति** । मतुप्पदस्थाने

सप्तमीसमासं समर्थ्य व्याचष्टे साध्यवद्भिन्ने इति । **तथा च साध्यवद्भिन्नस्य वृत्तावनन्वयाद् यथासन्निवेशे न वैयर्थ्यम् । साध्याभावे साध्यवद्भिन्नवृत्तित्वविशेषणन्तु अव्याप्यवृत्तिसाध्यकसंग्रहार्थमेवेत्याशयः ।**

साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति पर्वतादौ धूमादेः सत्त्वादव्याप्तिरसंभवो वा स्यादतः साध्याभावेति । न च कपिसंयोगी एतत्त्वादित्यादेः संग्रहार्थमधिकरणभेदेनाऽभावभेदमादृत्यैव लक्षणमिदं कार्यं, तथाच साध्यवद्भिन्ने योऽभावस्तद्वद्वृत्तित्वस्यैव सम्यक्त्वे साध्यपदवैयर्थ्यमिति वाच्यम् । प्रतियोगितासंसर्गेण साध्यीयत्वेनैव साध्याभावस्य प्रवेशो न त्वभावत्वेनाऽपीति तद्वैयर्थ्यशङ्काऽनवकाशात् ।

सम्बन्धिपदं योज्यम् , तेन प्रकृत्यसमभिव्याहारे मतुप्प्रत्ययस्याऽनुशासनाऽसिद्धत्वेऽपि न क्षतिः । **सप्तमीसमासमिति** । नन्वत्र साध्यवद्भिन्ने इति अधिकरणसप्तम्यनुपपन्ना, कारके इत्यधिकारीयेण सप्तम्यधिकरणे चेति सूत्रेण कारकाधिकरणवाचिन एव शब्दात्सप्तम्यनुशासनात् । न च क्रियाऽध्याहरणीयेति वाच्यम् । तथासति सापेक्षतयाऽसामर्थ्येन समासानुपपत्तेरिति चेत् । अत्राहुः–सप्तम्यधिकरणे चेति सूत्रस्थाऽनुक्तसमुच्चायकचकारेण कारकाधिकरणाऽवाचिनोऽपि शब्दात्सप्तम्यनुशासनेन सप्तम्यनुपपत्तेरभावादिति ।

अव्याप्तिरसम्भवो वेति । अवृत्तिगगनादिहेतोर्लक्ष्यत्वमते अव्याप्तिरित्युक्त तस्याऽलक्ष्यत्वे तु असम्भवो वेति । **आदृत्यैवेति** । अन्यथाऽव्याप्यवृत्तिसाध्यकाऽव्याप्तितादवस्थ्येन साध्यवद्भिन्नवृत्तित्ववैयर्थ्यात् । **तथाचेति** । अधिकरणभेदस्याऽभावभेदप्रयोजकत्वे इत्यर्थः । **साध्यपदवैयर्थ्यमितीति** । अधिकरणभेदेनाऽभावभेदाऽस्वीकारे तु साध्यवद्भिन्नवृत्तिघटाद्यभावस्य हेतुमति सत्त्वेनाऽव्याप्त्या न साध्यपदवैयर्थ्यमिति । साध्याभावेत्यत्र तत्पुरुषत्वात्पूर्वपदे लक्षणाया आवश्यकत्वे तेनैव निर्वाहेऽभावपदार्थविवक्षाया नोपयोग इत्याह **प्रतियोगितासंसर्गेणेति** । विलक्षणप्रतियोगितासम्बन्धेनेत्यर्थः । तादृशविलक्षणप्रतियोगितासम्बन्धेनान्यत्र साध्यीयत्वाभावादेव नाऽप्रसङ्गः । एतेन केवलप्रतियोगितासम्बन्धेन साध्यीयपरत्वे द्रव्यं पृथिवीत्वादित्यादौ साध्यवद्भिन्नगुणवृत्तिर्यः प्रतियोगितासम्बन्धेन साध्यीयः समवायस्तद्वद्वृत्तित्वस्य पृथिवीत्वे सत्त्वादव्याप्तिरिति निरस्तम् । अथाऽभावपदात्कथं तादृशविलक्षणप्रतियोगितालाभ इति चेद् । अभावपदसमभिव्याहृतपदान्तरस्य विलक्षणप्रतियोगितया स्वार्थविशिष्टबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् , अन्यथा संयोगो घटाभाव इति व्यवहारापत्तेः । न च भाववाचकपदसमभिव्याहृताऽभावपदस्य भावभिन्नार्थकत्वान्नायमतिप्रसङ्ग इति वाच्यम् । तथापि विषयिता घटत्वाभावाभाव इति व्यवहारापत्तेर्दुर्वारत्वात् । **साध्यीयत्वेनैवेति** । साध्यविशिष्टत्वेनैवेत्यर्थः । अभावे साध्यीयत्वं न येन केनचित्सम्बन्धेन अतिप्रसङ्गात् , किन्तु प्रतियोगितासम्बन्धेन, तथाचाऽभावत्वनिवेशो व्यर्थ इत्याशयवानाह **न त्वभावत्वेनापीति** । प्रयोजनाभावादिति शेषः । **तद्वैयर्थ्यशङ्कानवकाशादिति** । तथा च साध्यपदाऽनुक्तौ साध्यवद्भिन्ने वर्तते यस्तद्वद्वृत्तित्वमित्येवार्थः स्यादेवं च वह्निमद्भिन्नहृदादिवृत्तिप्रमेयत्वादिमति पर्वतादौ हेतोर्वृत्तेरसम्भवः स्यादतस्तन्निवेश इति भावः ।

वस्तुतः स्वप्रतियोगितावच्छेदकसम्बन्धेन साध्यवद्भिन्ने वर्त्तते यः साध्यतावच्छेदकसम्बन्धेन साध्यीयोऽभावस्तद्वद्वृत्तित्वमर्थः, तथाऽत्र साध्यतावच्छेदकसम्बन्धेन साध्यीयत्वार्थकस्य साध्यपदस्याऽनुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसम्बन्धेन वह्न्यादिमतोऽन्यस्मिन्पर्वतादौ यः समवायादिसम्बन्धावच्छिन्नवह्न्यभावस्तद्वति धूमादेः सत्त्वादव्याप्तिः स्यादतस्तदुपात्तमिति नव्याः ।

केचित्तु व्याप्यवृत्तित्वाऽव्याप्यवृत्तित्वरूपविरुद्धधर्माध्यासात्संयोगाद्यभावस्यैव द्रव्यगुणाद्यधिकरणभेदेन भेदो न तु गगनाद्यभावस्य मानाभावात्, तथाच साध्यवद्भिन्नवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेः सत्त्वादव्याप्तिरतः साध्यपदमित्याहुः । तन्मन्दम् । गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्यं न तु द्रव्ये गगनाद्यभावे तथात्वमित्यादिप्रतीत्या

ननु आधेयतासम्बन्धेन पर्वतजलान्यतरविशिष्टवह्निमान् धूमादित्यादौ साध्यवद्भिन्ने जलादौ वर्त्तमानस्य साध्याभावनिष्ठप्रतियोगिताकस्य पर्वतजलान्यतरत्वावच्छेदकत्वस्याऽधिकरणे पर्वते धूमस्य सत्त्वादव्याप्तिवारणायैवाऽभावपदसार्थक्यसम्भवे प्रतियोगितासम्बन्धेन साध्यीयत्वार्थकत्वमनुचितमिति चेन्न । अभावपदोपादानेऽपि तादृशावच्छेदकतायाः अभावस्वरूपतामतेऽभावत्वाऽक्षततया साध्यप्रतियोगिकत्वेन तद्दोषतादवस्थ्यात् । अभावपदस्य विलक्षणानुयोगितापरत्वे तु विलक्षणप्रतियोगितासम्बन्धेन साध्यीयत्वस्यैव सम्यक्त्वादिति ।

साध्यतावच्छेदकसम्बन्धेन साध्यीयत्वार्थकस्येति । ननु सद्भिन्नं पटत्वादित्यादौ साध्यवद्भिन्ने वर्त्तमानस्य स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य द्रव्यत्वस्वरूपद्रव्यभेदाभावस्याऽधिकरणे हेतोर्वृत्तित्वादव्याप्तिरतस्तद्वारणाय पृथक्तया स्वातन्त्र्येण साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्याऽवश्यकतया साध्यपदस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितामात्रलाभार्थकत्वकथनमनुचितमिति चेन्न । जगदीशमतेऽभावाऽभावोऽभाव इति प्रत्ययानुरोधेनाऽभावाभावमात्रस्यैवाऽतिरिक्ततया तस्याऽप्यधिकरणभेदेन भिन्नतया साध्यवद्भिन्ने घटादौ वर्त्तमानस्य द्रव्यभेदाभावस्याऽधिकरणता घटे एवेति अव्याप्त्यप्रयोगादिति ।

नन्वभावपदोपादानमेतत्कल्पेऽपि व्यर्थमिति चेन्न । आधेयतासम्बन्धेन जलपर्वतान्यतरवद्वह्निमान् धूमादित्यादौ साध्यवद्भिन्ने जलादौ वर्त्तमानस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकस्याऽनुगतस्याऽवच्छेदकत्वस्याऽधिकरणे पर्वते हेतोर्वृत्तित्वादव्याप्तिप्रसङ्गात् । किञ्च समवायस्यैकत्वेन द्रव्यं पृथिवीत्वादित्यादौ साध्यवद्भिन्ने गुणादौ वर्त्तमानस्य साध्यीयस्याऽधिकरणे द्रव्ये हेतोः सत्त्वादव्याप्तिः स्यादिति ।

मानाभावादिति । व्याप्यवृत्तित्वादिविरुद्धधर्माध्यासस्य भेदकत्वं च 'एतानि न भेदकानी'त्यनेनाग्रे स्वयं दीधितिकृन्निराकरिष्यति ।

अत्रेदं तत्त्वम् । संयोगाभावनिष्ठयोर्व्याप्यवृत्तित्वाऽव्याप्यवृत्तित्वयोः प्रतियोगिसामानाधिकरण्यतद्वैयधिकरण्ययोश्च न विरोधः, तथाहि—संयोगाभावस्याऽव्याप्यवृत्तित्वं संयोगाभाव-

कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह **साध्यवदिति ३।**

गगनाद्यभावस्यापि गुणत्वादिसामानाधिकरण्यतदभावयोर्विरुद्धधर्मयोः सम्भवादिति दिक्।

न च घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान् गगनत्वादित्यत्राव्याप्तिः साध्यवद्भिन्ने घटे वर्तमानस्य गगनघटसंयोगात्मकस्य साध्याभावस्याधिकरणे गगनत्वहेतोः सत्त्वादिति वाच्यम्। अभावाभावस्यातिरिक्ततामते एतल्लक्षणकरणादिति भावः। भिन्नत्वे **इति। द्रव्यानिष्ठसंयोगाभावतो भिन्नत्वे इत्यर्थः।** मानाभावादिति। **तथाचाऽत्राऽव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति भावः।**

धिकरणीभूतद्रव्यनिष्ठाऽन्यन्ताभावप्रतियोगित्व, गुणे तस्य व्याप्यवृत्तित्वं च संयोगाभावाधिकरणीभूतगुणनिष्ठाऽन्यन्ताभावाऽप्रतियोगित्वम्, अनयो श्च न विरोधः, गुणत्वादौ तदुभयसत्त्वात्। एव संयोगाऽभावस्य द्रव्ये प्रतियोगिसामानाधिकरण्यं संयोगाधिकरणीभूतद्रव्यवृत्तित्वं, तस्य गुणे प्रतियोगिवैयधिकरण्यं च संयोगाऽनधिकरणीभूतगुणवृत्तित्वम्, एतदुभयमपि न विरुद्धं, प्रमेयत्वादौ तयोः सत्त्वात्, तथाच संयोगाभावादेर्भेदकधर्माभावाद् भेदस्याऽसिद्ध्या कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिर्दुर्वारैव, संयोगवद्भिन्ने गुणादौ वर्त्तते यः कपिसंयोगाभावस्तस्यैतद्वृक्षेऽपि सत्त्वादिति।

इदमत्रावधेयम्। न हि वयं संयोगाभावादेर्विरुद्धधर्माध्यासबलाद् भेदं साधयामो येनोपदर्शितरीत्या विरुद्धधर्माध्यासाभावेन तस्य भेदो न स्यादपि तु लाघवेन, लाघवं च द्रव्यवृत्तिसंयोगाभावो न गुणादौ स्वीक्रियते अपि तु क्लृप्ततद्वृत्तिसंयोगादिमत्त्वप्रकारकप्रमाविशेष्यत्वाभावे एव संयोगाभावत्वं कल्प्यते अनन्तकर्माद्यधिकरणे संयोगाभावकल्पनामपेक्ष्य तथाविधैकाभावे संयोगाभावत्वकल्पने लाघवात्। न च संयोगादिमत्त्वप्रकारकप्रमाविशेष्यत्वाभावे द्रव्यभेदे संयोगिभेदादौ वा संयोगाभावत्व कल्प्यते इत्यत्र विनिगमकाभाव इति वाच्यम्। तादृशाभावानां समनियततयाऽभेदात्। एवं च द्रव्यवृत्तिसंयोगाभावगुणादिवृत्तिसंयोगाभावयोर्भेदः प्रामाणिक एवेति ध्येयम्।

कर्मादौ संयोगाद्यभावस्येति शिरोमणिः। अत्र च गुणादावित्यनुक्त्वा कर्मादाविति कथने किं बीजमिति चेद्। कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इति मूलानुरोध एव।

गुणादावित्युक्तौ गुणस्याऽदिरिति व्युत्पत्त्या द्रव्यलाभेऽनन्वयः स्यात्, कर्मादावित्यत्र तथा व्युत्पत्त्या गुणलाभेपि न दोष इत्याशयेन तथोक्तमिति तु मान्याः।

अपरे तु कस्यचिन्मते द्रव्यकर्मगुणसामान्येत्यादिरीत्या पदार्थगणनात्तन्मताभिप्रायेणेदम्। कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इत्यग्रेतनमूलमप्येतदभिप्रायकमेव, अत एवाऽग्रेपि साध्यसम्बन्धितावच्छेदकरूपव्याप्तिलक्षणव्याख्यायां स्वाधिकरणाऽवृत्तिसाध्यासमानाधिकरणत्वमिति निष्कर्षे सत्ताधिकरणकर्मादिवृत्तित्वस्य साध्याऽसमानाधिकरणकर्मत्वादौ सत्त्वादिति दीधितिकारो वदिष्यतीत्याहुः।

हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाऽव्याप्तिगत सकलेति ८ ।

साकल्यं साध्याभाववति साध्ये च बोध्यम् ।

हेतोरिति । न च साध्यवत्प्रतियोगिकाऽन्योन्याभावस्य केवलान्वयित्वा-दसम्भव एव वक्तुमुचितो नाऽव्याप्तिरिति वाच्यम् । वह्निमान् गगनादि-त्यत्राऽवृत्तिगगनादौ लक्षणसम्भवेन तस्यापि सद्धेतुतायाः स्वय वक्ष्यमा-णत्वादिति भावः ।

साध्यपदस्य सिद्धिकर्मतत्तद्व्यक्तिपरतया तत्तद्व्यक्त्यवच्छिन्नान्योन्या-भावासामानाधिकरण्यरूपस्य द्रव्यं पृथिवीत्वादित्यादावेव सम्भवाद् ग-न्धवती पृथिवीत्वादित्यादावव्याप्तिकथनमित्यपि वदन्ति ।

ननु सकलस्य साध्यप्रतियोगिकाभावस्याऽधिकरणाऽप्रसिद्ध्या व्यभि-चारिणि अतिव्याप्तिवारणार्थं यदि साध्याभावस्य विशेषणं साकल्यं तदा

वस्तुतस्तु अव्याप्यवृत्तिसाध्यकत्वादिना कपिसंयोगादि [illegible] -दिप्रमात्वाद्यव्याप्यवृत्तिसाध्यकेऽप्यव्याप्तिरुक्ता भवति, प्रकृते [illegible] प्रमात्वादिकमपि गृहीतम्, एवं च गुणादावित्युक्तौ गुणस्य प्रमात्व [illegible] न्वयः स्यादतः कर्मादावित्युक्तमिति ध्येयम् ।

लक्षणसम्भवेनेति । इदमुपलक्षणम् । भेदे प्रतियोगिवृत्तित्व निवेशे [illegible] द्रसादित्यादावपि लक्षणसमन्वयो बोध्यः । **सिद्धिकर्मेति** । साध्यपदं सिद्धिकर्मणि [illegible] गिकं, व्यापके तु सिद्धियोग्यतापुरस्कारेण लाक्षणिकम्, प्रकृते च व्यापकपरत्वे तात्पर्यग्रा-हकाभावाल्लक्षणा न युक्तेति मुख्यार्थपरिग्रहः । एतेन कर्मादावित्यनेनोक्तया कपिसंयोगादि-साध्यकाऽव्याप्त्या साध्यवत्प्रतियोगिकेति लक्षणावतरणमयुक्तं कपिसंयोगवद्वृक्षान्तरप्र-तियोगिकभेदस्यैतद्वृक्षे सत्त्वेनाऽत्रापि अव्याप्तितादवस्थ्यादिति निरस्तम् । सिद्धिकर्मत्वेन साध्यत्वे वृक्षान्तरस्य साध्यवत्त्वाभावात् ।

अन्ये तु साध्यवत्प्रतियोगिकेतिलक्षणे स्वावच्छिन्नप्रतियोगितावच्छेदकताकत्वसम्बन्धेन साध्यतावच्छेदकविशिष्टभेदस्यैव लक्षणे निवेशेन कपिसंयोगादिसाध्यकाव्याप्तेरभावेन नावत-रणाऽसङ्गतिः । न चैव साध्यवदन्येत्यादिलक्षणेन पौनरुक्त्यमिति वाच्यम् । तत्र साध्यताव-च्छेदकनिष्ठावच्छेदकताकसाध्यनिष्ठावच्छेदकताकप्रतियोगिताया अभावविशेषणतया निवेशेन साध्यवत्प्रतियोगिकेत्यत्र च सम्बन्धविधया तन्निवेशेन पौनरुक्त्याभावात् । न च तस्य सम्ब-न्धत्वे मानाभावः एतदस्वरसेनैव सकलेत्यादिलक्षणान्तरावतारादिति वदन्ति ।

तन्न समञ्जसम् । 'हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेने'ति दीधितिग्रन्थविरोधात् ।

अतिव्याप्तिवारणार्थमिति । न च धूमवान् वह्नेरित्यादौ साध्यप्रतियोगिकस्य तत्तद्धूमाभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकस्य तत्तद्विपक्षाऽवृत्ति-त्वावच्छिन्नाभावस्य च गुणादौ प्रसिद्धतया तत्र हेतोरभावसत्त्वात् क्वाऽतिव्याप्तिवारणम् ? नापि वह्निमान् धूमादित्यादावव्याप्तिः, साध्यभावत्वावच्छिन्नानुयोगिताककूटत्वावच्छिन्नवत्त्वस्य

वह्निमान् धूमादित्यादिसद्धेतावव्याप्तिः, तत्रापि तत्तद्विपक्षाऽवृत्तित्वावच्छिन्नाभावरूपस्य तत्तत्सपक्षाऽवृत्तित्वावच्छिन्नाभावरूपस्य च साध्यप्रतियोगिकाभावस्तोमस्याऽधिकरणाऽप्रसिद्धेरत आह—साकल्यं साध्याभावतीति । तथाच साकल्यं न साध्याभावविशेषणमतो नाऽप्रसिद्धिरिति भावः ।

केचित्तु ननु धूमवान् वह्नेरित्यादौ व्यभिचारिणि अतिव्याप्तिः, साध्याभावधर्यत्किंचिन्निष्ठाभावप्रतियोगित्वादित्यत आह साकल्यं साध्याभावतीति आहुः ।

नन्वेवमपि साध्याभाववन्निखिलान्तर्गते महानसादौ वर्त्तमानस्याऽभावस्य प्रतियोगित्वं धूमादौ नास्तीति अव्याप्तितादवस्थ्यमत उक्तं साध्ये चेति । तथाच सपक्षो महानसादिर्न सकलसाध्याभाववानित्यदोषः ।

प्राञ्चस्तु व्यभिचारिणि अतिव्याप्तिवारणार्थं साध्याभाववति यावत्त्वविशेषणे दत्ते एव साध्ये यावत्त्वमव्याप्तिवारकतया सार्थकं भवति, अतः साध्याभाववत्येव साकल्यं प्राग्योजयति "साकल्यमित्यादिना" इत्येवमवतारयन्ति । तन्मन्दम् । साध्याभाववति साकल्यानुक्तावातिव्याप्तिवारकतयैव साकल्यविशेषणस्य सार्थक्यसम्भवात्, अन्यथा गगनाऽवृत्तिधर्मवान् द्रव्यत्वादित्यादौ पटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभाववद्गुणादिनिष्ठाभावप्रतियोगिनि द्रव्यत्वादावतिप्रसङ्गादिति ध्येयम् ।

गुणादौ प्रसिद्धेरिति वाच्यम् । धूमाधिकरणतावान् वह्नेरित्यत्रैवाऽतिव्याप्तिवारणे ग्रन्थतात्पर्यात् । किञ्च साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमेतत्कल्पे प्रयोजनविरहेण नास्त्येवेति यथाश्रुतमेव सम्यक् ।

तत्तद्विपक्षाऽवृत्तित्वावच्छिन्नाभावस्येति । न च विपक्षाऽवृत्तित्वावच्छिन्नाभावमादायाऽव्याप्तिसम्भवे सपक्षाऽवृत्तित्वावच्छिन्नाभावपर्यन्त विफलमिति वाच्यम् । तादृशाभावे हेतुसामानाधिकरण्यविशेषणप्रक्षेपेणापि वारणसम्भवे तत्पर्यन्तानुधावनम् । अत एव तद्रूपवान् तद्रसादित्यत्राऽव्याप्तिविरहादसम्भवो नोक्त इति ।

ननूभयाभावविपक्षाऽवृत्तित्वावच्छिन्नाभावादिकमादाय सर्वत्राऽसम्भवसम्भवेऽव्याप्तिदानमसङ्गतमिति चेन्न । गगनाभिन्नं घटत्वादित्यादौ साध्याभावकूटाधिकरणगगनस्यैव प्रसिद्धेः । न च घटवृत्तित्वविशिष्टगगनभेदाभावस्य गगनत्वप्रतियोगिकस्वरूपेण यो घटाऽवृत्तिस्तदभावस्य च साध्यप्रतियोगिकतया तद्घटितकूटाधिकरणाऽप्रसिद्ध्या तत्राप्यव्याप्तिरिति वाच्यम् । साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेन साध्याभावकूटवत्वस्य वक्तव्यतया गगनाभावस्य यः कालिकेनाऽभावस्तस्य स्वरूपेण साध्यतायां आत्मत्वादिहेतौ कालिकेन तादृशकूटाधिकरणमहाकाले हेतोरसत्त्वाल्लक्षणसङ्गतिरिति ध्येयम् ।

ध्येयमिति । साध्याभाववति साकल्यविशेषणदानेनैव गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादौ यत्किंचित्साध्याभाववति गुणादौ हेत्वभावसत्त्वेपि तस्य सकलसाध्याभाववन्निष्ठत्वा-

इत्थं च प्रथमतः साध्ये साकल्यविशेषणोपादाने गुणत्वादेरपि सङ्ग्रहात्तदभाववांश्च गुणादिः किन्तु गगनमात्रं तत्र हेतोर्वृत्तित्वान्नातिव्याप्तिः।

ननु साध्यवत्यपि द्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्र-

---

भावत्वान्नातिव्याप्तिः । तथा च साध्ये साकल्यविशेषणस्य नैव प्रयोजनं सम्भवतीति । सकलत्वं चाऽवश्योपादेयविशेषणान्तराऽवगतार्थप्रयोजनकत्वम् ।

ननु साध्याभाववति साकल्यप्रवेशं विनापि साध्ये साकल्यप्रवेश आवश्यकः, तथा हि साध्ये साकल्याऽप्रवेशे तद्वह्निगगनोभयवान् तद्धूमादित्यादावतिव्याप्तिः तत्र गगनाभावस्योभयाभावस्य वा विवक्षणीयप्रतियोगिव्यधिकरणत्वाभावेन लक्षणाऽघटकतया तद्वह्न्यभावस्यैव प्रतियोगिव्यधिकरणतया तद्वह्निनिष्ठाभावप्रतियोगित्वस्य हेतौ तद्धूमे सत्त्वात्, साध्ये साकल्यप्रवेशे च सकलसाध्यान्तर्गतगगनाभावस्य प्रतियोगिव्यधिकरणत्वाभावेन प्रतियोगिव्यधिकरणसकलसाध्याभावाऽप्रसिद्ध्या नातिव्याप्तिः । न च तथापि तद्वह्निगगनाऽन्यतराभावमादायाऽतिव्याप्तिर्दुर्वारैव, यदि च कालिकसम्बन्धेन प्रतियोगिव्यधिकरणत्वं वह्नित्वविशिष्टाभाववति महानसादौ धूमाभावाऽसत्त्वेनाऽसम्भवात्तस्य साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकत्वेनाऽभावविशेषणात्तमादायाऽव्याप्तिः, एवमन्यतरत्वस्य प्रत्येकवृत्तिधर्मत्वेन तदवच्छिन्नाभावस्य सकलसाध्यनिष्ठप्रतियोगिताकत्वाभावात् तस्यैतद्वह्न्यभावसमनियततया लाघवेन तद्वह्नित्वस्यैव प्रतियोगितावच्छेदकत्वोपगमादित्युच्यते, तदा तद्वह्न्यभावस्याप्यतथात्वान्नोक्तरीत्या साध्ये साकल्यप्रवेशस्याऽऽवश्यकत्वमिति वाच्यम् । तद्वह्निधूमोभयाभावस्यैव प्रतियोगिव्यधिकरणतया निरुक्तविशेषणवत्तया तमादायैवोक्तरीत्या तदावश्यकत्वादिति चेन्न । साध्याभाववति साकल्याऽप्रवेशे साध्याभावे प्रतियोगिव्यधिकरणत्वस्याऽव्यावर्त्तकतयाऽनुपादेयत्वेनोक्तरीत्या साध्ये साकल्यविशेषणव्यावृत्त्यसम्भवात् ।

यत्तु वह्निधूमोभयादिसाध्यकसद्धेतौ वह्निधूमघटत्रितयाद्यभावमादायाऽव्याप्तिवारणाय साध्यतानवच्छेदकीभूतव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाऽभावस्य विशेषणीयतया साध्ये साकल्याऽप्रवेशेऽपि नोक्तस्थले तद्वह्निधूमोभयाभावमादायाऽतिव्याप्तिः, तस्याऽतथात्वेन तद्वह्निगगनोभयाभावस्यैव तथात्वेन लक्षणघटकता तस्य च प्रतियोगिव्यधिकरणत्वाभावादिति । तच्चिन्त्यम् । समवायेन प्रमेयवत्साध्यके साध्यतानवच्छेदकाऽप्रसिद्ध्या साध्यतावच्छेदकेत्यादेरभावविशेषणत्वासम्भवात् उभयादिसाध्यके त्रित्वावच्छिन्नाभावस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविशेषणेनैव वारणेन तस्याऽव्यावर्त्तकत्वाच्च ।

केचित्तु साध्ये साकल्यस्याऽनावश्यकत्वेनाऽऽदौ न तदुपात्तं, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविवक्षणे तस्याऽनिवेशात्, अत एव साध्ये च बोध्यमित्युक्तम्, वस्तुगत्या निवेशो नास्तीति चार्थ इत्याहुः ।

साध्ये साकल्यविशेषणदानेऽपि अव्याप्तितादवस्थ्यमित्याशङ्कते **नन्विति** । अथात्र साध्ये साकल्यविशेषणस्य कोऽर्थः ? यदि व्यापकत्वमर्थस्तथा च साध्यताव्यापकत्वं प्रतियोगितायां पर्यवसन्नं, तदा इतरबाधसहकृतस्थले महानसीयवह्निनिष्ठविधेयताव्यापकप्रतियोगिताकस्य महानसीयवह्न्यभावस्य पर्वतादौ सत्त्वाद् वह्निमान् धूमादित्यादावव्याप्तिः। यदि च साध्यताव-

तियोगिकाऽभावस्य सत्त्वादसम्भवः, किञ्च सकलपदोत्तरनाम्ना सकलसाध्यप्रतियोगिताकाऽभाववतोऽनुपस्थापनात्तेन सम सकलपदस्य कर्म-

ञ्छेदकव्यापकप्रतियोगिताकाभावो निवेश्यते तदा 'एकव्यक्तिसाध्यकस्थले साध्यांशे साकल्यविशेषणदानेऽपि अव्याप्तिरग्रे स्थास्यति इत्याशयेन नानेत्युक्तम्' इति जगदीशग्रन्थाऽसङ्गतिरिति चेन्न। साध्यसकलत्वावच्छिन्नाभावे एव तात्पर्यात्। तथाच साध्यतावच्छेदकावच्छिन्नानुयोगिताकपर्याप्तिककूटत्वावच्छिन्नाभावस्य पर्यवसिततया एकव्यक्तिसाध्यके तादृशकूटाऽप्रसिद्ध्याऽव्याप्तिकथनं, द्वित्वावच्छिन्नाभावमादाय नानाव्यक्तिसाध्यकेऽव्याप्त्यभिधानं च (वह्निनिष्ठयावत्त्वावच्छिन्नाभावे तात्पर्यमिति) न काप्यनुपपत्तिरिति ध्येयम्।

अथ वह्निवृत्तियावत्त्वनिष्ठसमवायसम्बन्धावच्छिन्नाऽवच्छेदकताकस्यैवाभावस्य प्रतियोगिवैयधिकरण्याक्रान्ततया हेतुमत्यसत्त्वात्कथमव्याप्तिरिति चेन्न। साध्यतावच्छेदकावच्छिन्नानुयोगिताकपर्याप्तिककूटत्वावच्छिन्नवत्त्वमभावे निवेश्यम्, कूटत्वावच्छिन्नवत्ता च स्वप्रतियोगिकत्वसम्बन्धेनेति। एवञ्च साध्यतावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिककूटत्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकसाध्यतावच्छेदकनिष्ठावच्छेदकताकप्रतियोगिताकाभावस्यैव विवक्षणीयत्वात् एकव्यक्तिसाध्यके एतादृशसाध्यतावच्छदकनिष्ठाऽवच्छेदकत्वाऽप्रसिद्ध्याऽव्याप्तिः। नानाव्यक्तिसाध्यके चोभयाभावादिरेव तादृश इति यथाश्रुतग्रन्थानुरोधिनः।

असम्भव इति। अत्र(१)साध्यतावच्छेदकातिरिक्तवैशिष्ट्यव्यासज्यवृत्तिधर्मानव-

(१) वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिवारणायाऽतिरिक्तान्तं धर्मविशेषणम्। अथात्र साध्यतावच्छेदकाऽतिरिक्तो यो धर्मस्तदनवच्छिन्नप्रतियोगितानिवेशनैवोपपत्तौ व्यासज्यवृत्तित्वनिवेशो व्यर्थ इति चेन्न। व्यासज्यवृत्तित्वाऽनिवेशे साध्यतावच्छेदकाऽतिरिक्तत्वेन बहूनां धर्माणां निवेशे गौरवापत्तिरतो धर्मसङ्कोचार्थं तन्निवेशः। यदि च साध्यतावच्छेदकातिरिक्तधर्मनिष्ठावच्छेदकत्वनिरूपकत्वसामान्याभावनिवेशेनाऽनन्तधर्माऽप्रवेशात्तद्वैयर्थ्यमित्युच्यते, तदाऽखण्डाभावसम्पादकतया न व्यासज्यवृत्तित्ववैयर्थ्यम्। यत्तु व्यासज्यवृत्तित्वं विहाय निरुक्तसामान्याभावनिवेशे प्रमेयवह्निमान् धूमादित्यादावव्याप्तिः, गुरुधर्मस्य प्रतियोगिताऽनवच्छेदकत्वेन प्रमेयवह्नित्वस्य गुरुतयाऽनवच्छेदकत्वेन लक्षणाऽघटकत्वाद्, अतो वह्नित्वावच्छिन्नाऽभावसङ्ग्रहाय तदुपादानमावश्यकम्, अन्यथा तदीयप्रतियोगितायाः साध्यतावच्छेदकाऽतिरिक्तवह्नित्वावच्छिन्नत्वेन वह्न्यभावस्याप्यसङ्ग्रहः स्यात्। संयोगादिना प्रमेयवत्साध्यकस्थलानुरोधेन स्वानवच्छिन्नप्रकारतावच्छेदकस्वरूपं साध्यतावच्छेदकान्यत्वं विवक्षणीयम्। नन्वेवं प्रमेयवह्निधूमोभयवान् धूमादित्यादावगतिरेव वह्निधूमोभयत्वावच्छिन्नाभावस्य लक्षणाघटकत्वादिति चेन्न। तत्र केवलवह्नित्वावच्छिन्नाभावस्यैव लक्षणघटकत्वात्। न च कालिकेन वह्नित्वविशिष्टस्य साध्यत्वे शैवालादिरूपहेतौ समवायेन वह्नित्वविशिष्टाभावमादायाऽव्याप्तिवारणाय साध्ये साकल्यमावश्यकमिति कथमुक्ताभावो लक्षणघटक इति वाच्यम्। यत्र वह्निधूमोभयत्वं शुद्धस्वरूपेण साध्यतावच्छेदकं तत्र पर्याप्तिसम्बन्धेन वह्निधूमोभयत्वावच्छिन्नाभाववारणाय प्रतियोगितायाः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकत्वस्यावश्यकतया तत एव समवायेन वह्नित्वविशिष्टाभाववारणसम्भवात् साध्ये साकल्यस्य व्यर्थत्वादिति। तदसत्। गुरुधर्मावच्छिन्नसाध्यकहेतौ केवलान्वयिसाध्यकत्वेन तत्राव्याप्तेरिष्टत्वात्। गुरुधर्मस्याऽभावप्रतियोगिताऽनवच्छेदकत्वे तदवच्छिन्नसाध्यकानुमानमेव नास्तीत्यभिप्रायस्य वक्तुं शक्यत्वाच्च। अत एव लाघवेन साध्यतावच्छेदकावच्छिन्नाभावनिवेशौचित्यवर्णनं सङ्गच्छते। अन्यथा तथानिवेशे गुरुधर्मावच्छिन्नसाध्यकाऽव्याप्तेरपरिहारात् साध्यतावच्छेदकावच्छिन्नेत्यनेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वस्यैव विवक्षणीयतया लाघवाऽनवकाशादिति दिक्।

साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः । न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः ।

अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाऽव्याप्यवृत्तावतिव्याप्तेर्वारणायाऽभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यम् ।

धारयोऽप्यनुपपन्न इत्यत आह साध्याभाव इति । तथाच साध्याभाववत्येव साकल्यं देयं न तु साध्येऽपीति भावः । साध्याभाववति साकल्यदानस्य प्रयोजनमाह तेनेति । विपक्षैकदेशः—कश्चिद्विपक्षः, साध्यनिष्ठसाकल्यस्य साध्यसामान्याभावस्य वा निवेशस्य फलमाह नवेति । एकव्यक्तिसाध्यके सकलसाध्योक्तौ अपि अव्याप्तिरग्रे स्थास्यतीत्याशयेन नानेत्युक्तम् ।

अव्याप्यवृत्तीति । कपिसंयोगी एतत्त्वादित्यादावित्यर्थः । यद्यप्यत्र हेत्वभावस्यापि प्रतियोगिवैयधिकरण्यावच्छिन्नस्यैव निवेशः करणीय इत्यन्यथा

न्छिन्नत्वं प्रतियोगितायां निवेशयाऽसम्भवस्य वारणीयत्वे स्यादाह **किञ्चेति** ।

दीधितौ **व्यभिचारिणि नातिव्याप्तिरिति** । अतिव्याप्तिः—लक्षणगमनं, सद्धेतौ तस्याऽदोषत्वाद् व्यभिचारिणीत्युक्तमेवमग्रेऽपि अन्यथाऽतिव्याप्त्युक्त्यैव व्यभिचारित्वलाभेन तद्वैयर्थ्यात् ।

वह्निमान् गगनादित्यत्राऽतिव्याप्तिः साध्याभाववति साकल्योपादानेऽपि न वार्या इति व्यभिचारिणीत्युक्तमित्यपि कश्चित् ।

'न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिरिति' शिरोमणिः । ननु नाना अनेका व्यक्तिराश्रयो यस्येति व्युत्पत्त्या नानाधिकरणत्वलाभे द्रव्यत्वसाध्यके सद्धेतावव्याप्त्यभावात् नाना व्यक्तिः साध्यं यस्येति व्युत्पत्त्या साध्ये नानात्वदाने शब्दवान् गगनत्वादित्यादौ लक्षणसम्भवान्नानाव्यक्तिसाध्यकसद्धेतुत्वावच्छेदेनाऽव्याप्तिदानाऽसङ्गतिः । न चोभयाभावादिकमादाय तत्राऽव्याप्तिसम्भव इति वाच्यम् । साध्याभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकतया तत्र तादृशाभावप्रतियोगितावच्छेदकद्वित्वावच्छिन्नाधिकरणाऽप्रसिद्धेः, साधनसमानाधिकरणवृत्ति यद् द्वित्वं तदवच्छिन्नाभावस्य च गगनेऽसत्त्वादिति चेन्न । नानाव्यक्तिसाध्यकत्वं स्ववृत्तित्वस्वाऽसमानाधिकरणस्वेतरवृत्तित्वोभयसम्बन्धेन वस्तुविशिष्टसाध्यतावच्छेदककत्वम् व्यधिकरणोभयवृत्तिसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वमिति नानुपपत्तिः ।

दीधितौ **अव्याप्तेरिति** । अस्य वारणायेत्यनेनाऽन्वयः । व्याप्यवृत्तिसद्धेतावित्यत्र सद्धेतौ व्याप्यवृत्तित्वोत्कीर्त्तनप्रयोजनमाह—**यद्यपीति** । **अव्याप्यवृत्तिहेताविति** । कपिसंयोगी कपिविभागादित्यादावित्यर्थः । **अव्याप्तिः सम्भवतीति** । कपिसंयोगाभाववति वृक्षादौ प्रतियोगिव्यधिकरणकपिविभागाभावविरहात्, तथाच व्याप्यवृत्तित्वोत्कीर्त्तनं

प्यवृत्तिहेतावपि अव्याप्तिः सम्भवति, तथापि यथाश्रुतमूलस्य न तत्राऽव्याप्तिरित्यावेदयितुं व्याप्यवृत्तिहेतूक्तिः । व्यभिचारिणीति । **एतद्वृक्षत्ववान् कपिसंयोगादित्यादावित्यर्थः ।** अभावद्वये इति । **साध्याभावे हेत्वभावे चेत्यर्थः ।**

व्यर्थमेवेति भावः । **यथाश्रुतमूलस्येति** । प्रतियोगिवैयधिकरण्याघटितस्येत्यर्थः । व्याप्यवृत्तिहेतूक्तिः, तथाच हेत्वभावे तद्विशेषणाननुसन्धाने व्याप्यवृत्तिहेतुकस्थलेऽव्याप्तिर्भवतीत्यभिप्रायेण तदुक्तमिति भावः ।

अथ तदुक्तावपि कपिसंयोगाभाववान् गुणत्वादित्यादौ अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतुत्वावच्छेदेनाऽव्याप्तिविरह इति चेन्न । अव्याप्यवृत्तिसाध्यकत्वं हेत्वधिकरणवृत्तिसाध्याभावकसद्धेतुत्व तस्य प्रकृते विरहान्नानुपपत्तिः । न चोक्तस्थले प्रतियोगिवैयधिकरण्यनिवेशे प्रतियोग्यनधिकरणाऽप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् । हेत्वधिकरणीभूतं यत्प्रतियोग्यधिकरणं तदन्यवृत्तिसाध्याभावस्य विवक्षितत्वात्, उक्तस्थले तथाविधस्वगुणादिभेदस्य प्रसिद्धेरिति ध्येयम् ।

न च प्रतियोगिवैयधिकरण्योपादानेऽपि कपिसंयोगी एतत्त्वादित्यत्राऽव्याप्तिस्तदवस्थैव, गुणे कपिसंयोगाभावस्य प्रतियोगिवैयधिकरण्यात्तदाश्रयस्य तस्य द्रव्ये सत्त्वादिति वाच्यम् । प्रतियोगिवैयधिकरण्यविशिष्टसाध्याभावस्य प्रकृते विवक्षणात् तादृशविशिष्टसाध्याभावाधिकरणत्वं न द्रव्ये विशिष्टाऽधिकरणत्वस्याऽतिरिक्तत्वात् ।

नन्वत्र प्रतियोगिवैयधिकरण्यं यदि प्रतियोग्यधिकरणाऽवृत्तित्व तदा कपिसंयोगी एतत्त्वादित्यत्राऽव्याप्तितादवस्थ्यम्, संयोगाधिकरणाऽवृत्तित्वाविशिष्टस्य संयोगाऽभावस्याऽप्रसिद्धेः । न च प्रतियोग्यनधिकरणवृत्तित्वं तदिति वाच्यम् । द्रव्यत्वाभाववान् गुणत्वादित्यत्र द्रव्यत्वरूपसाध्याभावस्य प्रतियोगिनो नित्यत्वादिविशिष्टद्रव्यत्वाभावस्याऽधिकरणे वर्त्तमानतया तथाविधाऽभावाऽप्रसिद्ध्याऽव्याप्तेः । न च यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वमेव विवक्षणीयम्, उपदर्शितस्थले च द्रव्यत्वरूपसाध्याभावस्य द्रव्यत्वाभावत्वरूपयत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणे वृत्तित्वान्नाऽव्याप्तिरिति वाच्यम् । कपिसंयोगाभाववान् आत्मत्वादित्यादावव्याप्तेः कपिसयोगाभावाभावस्य यत्किञ्चित्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वं तदवच्छिन्नस्याऽनधिकरणे आत्मनि आत्मत्वाभावविरहात्, इति चेत् । मैवम् । यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणं साध्यनिष्ठतादृशप्रतियोगिताकाभावाधिकरणमित्यस्य तथाविधसाध्याभावाऽधिकरणान्तेन विवक्षणादिति ।

(वस्तुतस्तु अधिकरणभेदेनाऽभावभेदमादृत्यैव लक्षणमिद कार्यमन्यथा कपिसंयोगी एतद्वृक्षत्वादित्यत्राऽव्याप्तितादवस्थ्यम् प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणताव्यापकप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेत्वभावत्वावच्छिन्नाधिकरणताकत्वमित्येव वा सम्यक् । कुत्रचिद्जागदीश्यामेव पाठोयं दृश्यते)

ननु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावव्यापकत्वेनैवोपपत्तौ अधिकरणताप्रवेशो व्यर्थ इति चेन्न । तादृशाऽधिकरणताव्यापकत्वं तादृशाऽधिकरणताश्रयवृत्तिभेदप्रतियोगिताऽनवच्छेदकत्वं, न तु तादृशाधिकरणतात्वावच्छिन्ननिरूपकताकाधिकरणतावद्वृत्तिभेदप्रतियो-

अत्र च साध्याभावे प्रतियोगिवैयधिकरण्यं साध्यतावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं तदवृत्तित्वम्, तेन धूमाद्यभाववतोऽपि अयःपिण्डादेः कालिकसम्बन्धेन धूमादिमत्त्वेऽपि नातिव्याप्तिः ।

गिताऽनवच्छेदकत्वम् , नन्न यदि साध्याभावे प्रतियोगिव्यधिकरणत्वनिवेशस्तदा प्राक्कल्पे अधिकरणभेदेनाऽभावभेदाभावेन प्रतियोगिव्यधिकरणत्वविशिष्टस्य अपि तस्य केवलसाध्याभावाऽनतिरिक्ततया कपिसंयोगी एतद्वृक्षत्वादित्यत्राऽव्याप्तितादवस्थ्यमतः प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावत्वावच्छिन्ननिरूपकताकाधिकरणतापर्यन्तं आवश्यक इति तल्लाभायैवाऽधिकरणतापदमिति भावः ।

ननु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेत्वभाव इत्यस्यैव सम्यक्त्वेऽधिकरणतापर्यन्तं विफलमिति चेन्न । अधिकरणभेदेनाऽभावभेदाऽस्वीकारेण एतद्वृक्षत्ववान् कपिसंयोगादित्यत्र एतद्वृक्षत्वाभाववति वृक्षान्तरे विशिष्टस्याऽनतिरिक्ततया प्रतियोगिव्यधिकरणत्वविशिष्टस्य वृत्तित्वादतिव्याप्तिः स्यादिति ।

किञ्च प्रमेयत्वादिना सर्वेषां व्यापकत्वाद् व्यभिचारिमात्रेऽतिव्याप्तिरतो हेत्वभावत्वे व्यापकतावच्छेदकत्वं वाच्यमित्येतल्लाभार्थमेवाधिकरणतापदमिति ध्येयम् ।

ननु साध्यतावच्छेदकावच्छिन्नानधिकरणत्वव्यापकहेतुतावच्छेदकावच्छिन्नानधिकरणत्वमित्यस्यैव सम्यक्त्वे साध्याभावहेत्वभावयोरप्रवेशोऽपि क्षत्यभाव इति चेन्न । यथाश्रुतनिवेशे वैयर्थ्याभावात् ।

एतेन साध्यतावच्छेदकावच्छिन्नानधिकरणत्वव्यापकप्रतियोगिव्यधिकरणहेत्वभावत्वावच्छिन्नाऽधिकरणताकत्वमित्यस्यैव सम्यक्त्वे साध्याभावनिवेशो व्यर्थ इति निरस्तम् । यथाश्रुतमूलात्प्रतियोगिताविशिष्टान्या या साध्याभावाधिकरणता इत्येवार्थः प्रतीयते । वै० स्वनिरूपकाभावीयत्व—स्वावच्छेदकावच्छिन्नसामाधिकरण्योभयसम्बन्धेन । एवं च घटाभावादिवारणाय साध्याभावनिवेशो आवश्यक इति ।

नातिव्याप्तिरिति । एवं च धूमाभावाधिकरणाऽयपिण्डादेः साध्यतावच्छेदकसंयोगसम्बन्धेन धूमादिमत्त्वविरहान्नातिप्रसङ्ग इत्यर्थः । नन्वत्र महाकालभिन्नं घटत्वादित्यत्र महाकालभेदस्य कालिकेनाधिकरणत्वस्य अन्येषामपि स्वरूपेणाऽधिकरणत्वसत्त्वात्प्रतियोगिव्यधिकरणाऽप्रसिद्धयाऽव्याप्तिसम्भवे तत्परित्यागोऽनुचितः अनुपपत्तिसम्भवे आपत्तेरन्याय्यत्वादिति चेन्न । यत्किञ्चित्सम्बन्धेनाधिकरणत्वोक्तावव्याप्तिविरहादिति । सम्बन्धांशे यत्किञ्चित्त्वनिवेशस्तु सम्बन्धविशिष्टत्वं हेतौ व्याप्तिः । वै० स्वावच्छिन्नप्रतियोगिनिष्ठानिरूपकताकाधिकरणतावद्भिन्नवृत्तिसाध्याभावव्यापकाभावप्रतियोगित्वसम्बन्धेन । प्रकारमुद्रया निवेशश्च सम्बन्धत्वसमानाधिकरणभेदयावृत्तिधर्मावच्छिन्नससर्गताकप्रतियोग्यधिकरणतावद्भिन्नवृत्तिसाध्याभावव्यापकाभावप्रतियोगित्वं हेतौ व्याप्तिः । सम्बन्धसामान्यनिवेशस्तु सम्बन्धविशिष्टान्यत्वम् । वै०प्रागुक्तसम्बन्धेन । प्रकारमुद्रया निवेशश्च तादृशप्रतियोगिताकूटवत्त्वमिति ।

न च तथापि धूमाभाववतः अयःपिण्डीयपरमाणोरपि सकलसाध्याभाववदन्तर्गततया तस्य च कालिकसम्बन्धेनापि धूमानधिकरणतया तन्निष्ठाभावप्रतियोगित्वस्य हेतौ विरहान्ना-

हेत्वभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः ।

हेत्वभावे प्रतियोगिवैयधिकरण्यन्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वघटितं वाच्यम् , तेन अयमात्मा ज्ञानादित्यादौ साध्याभाववतो घटत्वादेर्विषयतया हेत्वभावप्रतियोगिमत्त्वेपि नाव्याप्तिः ।

हेत्वभावोऽपीति । **अपिना साध्याभावसमुच्चयः, तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः । यद्यपि साध्याभावोऽपीत्येव क्रमानुरोधाद्वक्तुमुचितम्, अपिशब्दादेव हेत्वभावस्य लाभसम्भवात् । तथापि तत्प्रतियोगित्वं चेत्यग्रेतनतत्पदेनाऽनिर्दिष्टहेत्वभावपरामर्शाऽसम्भवाद्, हेत्वभावप्रतियोगित्वं चेत्यभिधाने च ग्रन्थगौरवं स्यादितीत्थमभिधानम् ।** प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति **प्रतियोगिपदं प्रतियोगितावच्छेदकताघट-**

तिव्याप्तिरिति वाच्यम् । शिरोमणिमते द्व्यणुके परमाणौ च मानाभावात् त्रसरेणावेव विश्रान्तेरिति तत्स्वीकारे तु समवायेन वह्निसाध्यकधूमहेतौ व्यभिचारिणि अतिव्याप्त्यापत्तेरिति ध्येयम् ।

प्रतियोग्यनधिकरणत्वघटितमिति । एवं च यादृशप्रतियोगितावच्छेदकाऽनधिकरणवृत्तित्वमर्थः । अन्यथोक्तरीत्या गुणाभाववान् द्रव्यत्वाभावादित्यत्राऽव्याप्तेः । प्रतियोगितावच्छेदके यत्किञ्चित्त्वनिवेशे च घटः कपिसयोगादित्यादावतिव्याप्तिः स्यात् । तथा च यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणसाध्यनिष्ठतादृशप्रतियोगिताकाभावाधिकरणं यद् यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेतुतावच्छेदकावच्छिन्नतादृशप्रतियोगित्वं व्याप्तिरिति समुदितार्थः ।

प्रतियोगितावच्छेदकसम्बन्धेन प्रतिवैयधिकरण्यनिवेशस्य फलमाह **तेनेति** । **नाव्याप्तिरिति ।** एवं च प्रतियोगितावच्छेदकीभूतसमवायसम्बन्धेन ज्ञानस्वरूपप्रतियोग्यनधिकरणे घटादौ ज्ञानाभावसत्त्वादव्याप्तिर्नास्तीति ।

नन्वत्र वह्निमान् धूमादित्यत्र साध्याभाववतो घटादेर्धूमावयवादेश्च कालिकेन समवायेन च हेत्वधिकरणे प्रतियोगिनः सत्त्वेन प्रसिद्धस्थलेऽव्याप्तिसंभवे तत्परित्यागोऽनुचित इति चेन्न । साध्याभाववति साकल्यविशेषणसत्त्वेऽसत्त्वे चोभयथैवाऽयमात्मा ज्ञानादित्यत्राऽव्याप्तिः, प्रलयान्तर्भावेण धूमाभावसत्त्वाद् वह्निमान् धूमादित्यत्र साकल्याऽनुक्तावव्याप्तिविरहादिति । अत एव यत्समानाधिकरणा इति ग्रन्थे स्वविशिष्टपदसत्त्वेऽसत्त्वे चोभयथा नाव्याप्तिरिति वक्ष्यति ।

साध्याभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यविवक्षायाः फलमाह **तेनेति । नातिव्याप्तिरिति ।** गुणादौ विशिष्टसत्ताभावस्य सत्तारूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणसाध्याभावस्य सामान्यादावेव सत्त्वात्तत्र हेत्वभावसत्त्वेऽपि नातिव्याप्तिरित्यर्थः । नन्वत्र घटवृत्तित्वविशिष्टवाच्यत्ववान् घटत्वादित्यादौ साध्याभावप्रतियोगिशुद्धवाच्यत्वाऽनधिकरणाऽप्रसिद्ध्याऽव्याप्तिसम्भवेऽतिव्याप्तिदानमनुचितमिति चेन्न । प्रतियो-

तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यम् , तेन द्रव्यत्वादौ साध्ये

कसम्बन्धेनाऽवच्छेदकस्य वैशिष्ट्यलाभाय, तेन ह्रदादौ कालिकादिसम्बन्धेन धूमत्वावच्छिन्नस्य काष्ठादेः संयोगसम्बन्धेन सत्त्वेऽपि नाव्याप्तिः।

तत्प्रतियोगित्वं—हेत्वभावप्रतियोगित्वम् । हेतुतावच्छेदकरूपेणेति । हेतुतावच्छेदकसम्बन्धेनेत्यपि बोध्यम्, तेन आत्माभिन्नं द्रव्यत्वादित्यादौ साध्याभाववति आत्मनि वर्त्तमानस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणस्य कालिकादिसम्बन्धावच्छिन्नद्रव्यत्वत्वावच्छिन्नाभावस्य प्रतियोगित्वेऽपि द्रव्यत्वस्य नातिव्याप्तिः ।

न च हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्योक्त्यैवाऽतिव्याप्तिवारणसंभवात् हेतुतावच्छेदकसम्बन्धेन प्रतियोगित्वविवक्षा व्यर्थेति वाच्यम् । तथासति निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ निर्वह्नित्वभेदमादाय लक्षणसम्भवे निर्धूमत्वव्याप्येत्याद्युत्तरग्रन्थे वक्ष्यमाणाऽव्याप्त्यलग्नकतापत्तेरिति ध्येयम् ।

हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यविवक्षायाः फलमाह तेन द्रव्यत्वादाविति । अन्यथा साध्याभाववति गुणादौ विशिष्टसत्ताभावस्य सत्तारूपप्रतियोगिसमानाधिकरणत्वादव्याप्तिरेव स्यादिति भावः । अत्र द्रव्यत्वस्य साध्यतायां सकलसाध्याऽप्रसिद्ध्याऽव्याप्तेरुक्तविवक्षयाऽप्यप्रतीकारादादिपदम् , तेन गुणवत्त्वादिसाध्यस्योपसंग्रहः ।

व्यधिकरणत्वहेत्वधिकरणत्वोभयाभाववदधिकरणवृत्तित्वस्य साध्याभावे वक्तव्यतयाऽव्याप्तिवारणात् । न चाऽव्याप्तिवारणायोक्तप्रयासाऽपेक्षया प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेश एव न्याय्य इति वाच्यम् । सम्पूर्णलक्षणे कपिसयोगाभाववान् गुणत्वादित्यत्राऽव्याप्तिवारणाय तथानिवेशस्याऽऽवश्यकत्वादिति ध्येयम् ।

नाव्याप्तिरिति । एवं च ह्रदादौ प्रतियोगितावच्छेदकताघटकसमवायसम्बन्धेन धूमत्वावच्छिन्नस्य धूमादेः संयोगेनाऽसत्त्वान्नाव्याप्तिः । न च कालिकसम्बन्धेन धूमत्वावच्छिन्नकाष्ठादौ प्रतियोगितावच्छेदकावच्छिन्नत्वसत्त्वेऽपि प्रतियोगित्वविरहात्प्रतियोगिपदस्य यथाश्रुतार्थकत्व एवाऽव्याप्तिवारणात् प्रतियोगितावच्छेदकताघटकसम्बन्धपरत्वं व्यर्थमेवेति वाच्यम् । द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्राऽव्याप्तेः, अत्र गुणकर्मान्यत्ववैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन, द्रव्यत्वाभाववति गुणादौ स्वरूपसम्बन्धेन गुणकर्मान्यत्वविशिष्टसत्तादेः समवायेन सत्त्वादिति ध्येयम् ।

एवं स्वरूपसम्बन्धेन गुणकर्मान्यत्वविशिष्टसत्तायाः समवायेन साध्यत्वे जातेर्हेतुत्वे सद्धेतौ सामानाधिकरण्यसम्बन्धेन गुणकर्मान्यत्वविशिष्टसत्तायाः समवायेनाभाववति गुणादौ हेतोः सत्त्वादव्याप्तिवारणाय साध्याभावघटकप्रतियोगिवैयधिकरण्येऽपि प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकवैशिष्ट्यं बोध्यम् ।

विशिष्टसत्ताभावस्य–गुणकर्मान्यत्वविशिष्टसत्ताभावस्य । **अव्याप्तिरेव स्यादिति** ।

विशिष्टसत्तादौ नाऽव्याप्तिः, न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्त्वादावतिप्रसङ्गः।

यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वव्याप्ये तत्त्वेन साध्ये

द्रव्येतराऽसमवेतमात्र वा प्रकृते द्रव्यत्वमिति ध्येयम्।

हेतुतावच्छेदकरूपेण हेत्वभावप्रतियोगित्वविवक्षायाः फलमाह नवेति। सत्त्वादाविति। **द्रव्यत्वादौ साध्ये इत्यनुवर्त्तते।**

यत्रैकव्यक्तिकमिति। **तथाच द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः सकलसाध्याऽप्रसिद्धेरित्यर्थः।**

ननु इतोऽप्यस्वरसात्साध्यसामान्याभावस्यैव निवेशितत्वात्साध्ये

द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्राऽव्याप्तिः स्यादित्यर्थः। **दीधितौ** विशिष्टसत्तात्वादिना–गुणकर्मान्यत्वविशिष्टसत्तात्वादिना, तृतीयार्थश्च अवच्छिन्नप्रतियोगिताकत्वं तस्य चाभावेऽन्वयः। अथवा तृतीयार्थोऽवच्छिन्नत्वं तस्य प्रतियोगिपदार्थैकदेशप्रतियोगितायामन्वयः। **अतिप्रसङ्ग इति।** प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वानिवेशे द्रव्यं सत्त्वादित्यत्राऽतिप्रसङ्ग इत्यर्थः।

नन्वत्र धूमवान् वह्नेरित्यत्र तादृशवह्निघटोभयाभावप्रतियोगित्वस्य वन्हौ सत्त्वादतिव्याप्तिसम्भवे तत्परित्यागे किं बीजमिति चेन्न। समानाधिकरणयोर्द्वयोः प्रतियोगिनोः सत्त्वात्, व्यधिकरणयोश्चाऽधिकरणाऽप्रसिद्धेरित्ययोगोलकीयवह्नौ तत्प्रतियोगित्वाभावादिति न तत्रातिव्याप्तिः। किञ्च हेत्वभावपदेन हेतुताविशिष्टान्यप्रतियोगिताकाभावस्य विवक्षितत्वात्, हेतुतावैशिष्ट्यं च प्रतियोगितायां स्वाश्रयवृत्तित्व–स्वानाश्रयवृत्तित्वोभयसम्बन्धेन, एवं चोभयाभावस्याऽतथात्वादेकव्यक्तिहेतुकस्थले विशिष्टाभावस्य तथात्वेन तदभिधानादिति ध्येयम्।

ननु हेत्वभावे हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशेनाऽपि द्रव्यं विशिष्टसत्त्वादित्यत्राऽव्याप्तिवारणसम्भवे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशनमफलम्। न च विनिगमकाभावादेव तन्निवेशितमिति वाच्यम्। द्रव्यं सत्त्वादित्यत्र विशिष्टसत्ताभावस्य हेतुतावच्छेदकसत्तात्वावच्छिन्नवैयधिकरण्याभावेनैवातिप्रसङ्गवारणसम्भवे प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वानिवेशेन लाघवात् इति चेत्। अत्र केचित्–हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्नाऽनधिकरणवृत्तित्वविशिष्टहेत्वभावानिरूपिताऽधिकरणता तन्निरूपकहेत्वभावप्रतियोगित्वं लक्षणवाक्यार्थः पर्यवसन्नः। प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठा हेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नाऽनधिकरणता तादृशप्रतियोगितावत्त्वरूपो लघुभूतो लक्षणवाक्यार्थः पर्यवस्यतीति तन्निवेशः। न च ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मावच्छिन्नाऽनधिकरणत्वं तद्धर्मवत्त्वमर्थः, स चातिलघुरेवेति वाच्यम्। एतादृशार्थकरणे मूलोक्तं प्रतियोगितायाः व्याप्तित्वं व्याहन्येत इति दीधितिकृता गुर्वर्थानुसरणात्, अस्याऽपि लक्षणान्तरत्वादिति।

निर्वन्हित्वादौ चाऽव्याप्तिः, तत्र हेत्वभावस्य वन्ह्यादेः प्रत्येकं यावद्विपक्षाऽवृत्तित्वादत आह **साध्यवदिति** ७।

साकल्यं न देयमेवेत्यत आह विपक्षे वेति। **एकव्यक्तिक इत्यनुषज्यते। तथाच यत्रैकव्यक्तिरेव साध्याभाववती तत्र गगनाऽवृत्तिधर्मवान् गगनाऽन्यत्वादित्यादावव्याप्तिः, साध्याभाववतः साकल्याऽप्रसिद्धेरित्यर्थः।**

ननु साध्यादिभेदेन व्याप्तेर्भेदाद्यत्रैक एव विपक्षस्तत्रत्यलक्षणे साध्याभाववति साकल्यविशेषणं न देयम्, अशेषत्वरूपं वा साकल्यं निवेश्यमतो दोषान्तरमाह निर्धूमत्वव्याप्ये इति। **निर्धूमत्वस्य साध्यत्वे यत्रैकव्यक्तिकमित्यनेनैव गतार्थता स्यादतो व्याप्यपर्यन्तम्। निर्धूमत्वव्याप्यस्यापि स्नेहत्वादिना साध्यत्वे वन्ह्यभावस्य व्यभिचारित्वादसङ्ग्रहो न दोषायेत्यत उक्तम्** तत्त्वेन साध्ये इति। **निर्धूमत्वव्याप्यत्वेन साध्ये इत्यर्थः।** प्रत्येकमिति। **तथा च हेत्वभावस्य महानसीयवन्हेः साध्याभाववत्सकलान्तर्गतपर्वताद्यवृत्तित्वादव्याप्तिरिति भावः।**

इत्यनुषज्यते इति। लिङ्गव्यत्यासेनेति शेषः। विपक्षः–निश्चितसाध्याभाववान्। **अशेषत्वरूपमिति।** व्यापकत्वरूपमित्यर्थः, तथाच गगनाऽवृत्तिधर्माभावव्यापकत्वस्य गगनाऽन्यत्वाभावे 'गगनत्वे' सत्त्वान्नोक्ताऽव्याप्तिरिति भावः। **गतार्थता स्यादिति।** तथाच धूमत्वावच्छिन्नाभावरूपस्य निर्धूमत्वस्य साध्यत्वे तस्यैकत्वेन यत्रैकव्यक्तिकमित्यादिनाऽव्याप्तेरभिहितत्वात्पौनरुक्त्यापत्तिरतस्तदपहाय व्याप्य इत्युक्तमिति भावः। इदं तु बोध्यम्। पूर्वं साध्ये साकल्यविशेषणाऽव्याप्तिरुक्ता, इदानीं तु विपक्षो वेत्यस्याऽवतरणोक्तरीत्या साध्ये साकल्यविशेषणाऽप्रवेशाभिप्रायेणाऽव्याप्तिरुच्यते इति प्रक्रमभेदान्न पौनरुक्त्यं किन्तु संयोगेन द्रव्यस्याऽव्याप्यवृत्तिवादिनवीनमते धूमाभावस्याऽव्याप्यवृत्तित्वात्केवलान्वयित्वेन तद्विहाय व्याप्ये इत्युक्तमिति। **तत्त्वेन साध्ये इति।** तथाच धूमत्वावच्छिन्नाभावव्याप्यवान् वह्नित्वावच्छिन्नाभावादित्यत्राऽव्याप्तिरित्यर्थः। दीधितौ आदिना आत्मत्वाभावव्याप्यवान् महत्त्वाभावादित्यत्राऽव्याप्तिः संगृहीता, तत्र हेत्वभावस्य महत्त्वस्य यावदात्मऽवृत्तित्वादिति ध्येयम्।

अथ निर्धूमत्वव्याप्याभाववति सकलान्तर्गतपर्वतचत्वरादौ वन्ह्यभावात्यन्ताभावस्य कस्याऽपि वन्हेरसत्त्वेऽपि वन्ह्यभावभेदस्य सत्त्वात्तमादायैव लक्षणसमन्वयः लक्षणे प्रयोजनविरहेण हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वस्याऽनिवेशात्, हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशेनैवोक्ताऽतिव्याप्तिवारणसम्भवात्। न च लक्षणेऽत्यन्ताभावत्वरूपेण हेत्वभावाऽनिवेशे धूमवान् वन्हेरित्यादौ साध्याभाववति अयोगोलके वन्हिभेदसत्त्वादतिव्याप्तिरिति वाच्यम्। धूमाभाववति वह्न्यादौ वन्हिभेदाऽसत्त्वेनातिव्याप्तिविरहादिति। न च तथापि धूमाभावव्याप्यवान् वन्हिमद्भेदादित्यत्राऽव्याप्तौ ग्रन्थकृतां तात्पर्यम्, अत्र भेदभेदस्याऽनवस्थाभयादधिकरणरूपत्वमेव, तथाच तस्य प्रत्येकं विश्रान्ततया

यावद्विपक्षवृत्तित्वाऽसंभवात्तत्र हेतुभेदमादायापि लक्षणगमनाऽसंभवादिति वाच्यम् । आकाशाऽभावाधिकरणकभेदभेदस्याकाशाभावात्मकाऽधिकरणस्वरूपतया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणसमन्वयात् । नचैवं सति गुणवान् घटभेदादित्यत्र हेतुभेदात्मकाऽऽकाशाभावमादायाऽतिव्याप्तिवारणाय हेत्वभावस्य सकलसाध्याभाववन्निष्ठत्वं हेत्वभावत्वेनैव विवक्षणीयम्, एव चाऽनवस्थाभयाद् घटभेदभेदस्याऽऽकाशाभावरूपत्वेऽपि घटभेदभेदत्वेन गगनाभावः आकाशाभावे एव वर्त्तते न तु गगनाभावाधिकरणे 'हेत्वधिकरणे' घटभेदभेदत्वेनाऽपि गगनाभावस्य केवलान्वयित्वे घटभेदो न घटभेद इति प्रयोगापत्तेः इति नातिव्याप्तिः, एवं चाकाशाभावमादाय नोक्ताव्याप्तिवारणमिति वाच्यम् । उक्तस्थले आकाशाभावस्य हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यविरहेणाऽतिव्याप्त्यनवकाशात् उक्तविवक्षाया अकिञ्चित्करत्वात्, वन्हिमद्भेदहेतुकस्थले साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरणत्वेन हेतुभेदरूपगगनाभावस्य प्रतियोगिव्यधिकरणत्वेनाऽव्याप्तिविरहादिति चेत् । सत्यम् । वन्ह्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यवान् वन्ह्यभावान्यत्वविशिष्टनिर्वन्हित्वादित्यादावव्याप्तिः, तत्र वन्ह्यभावभेदमादाय लक्षणगमनं न संभवति वन्ह्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्याभावयावदन्तःपातिनि वन्ह्यभावे वन्ह्यभावभेदाऽसत्त्वात् वन्ह्यभावात्यन्ताभावमादायापि लक्षणगमनं न संभवति तथाविधयावदन्तःपातिनि पर्वतचत्वरादौ कस्यापि वन्हेर्वन्ह्यभावात्यन्ताभावरूपस्याऽसत्त्वात् ।

न च वन्ह्यभावान्यत्वविशिष्टवन्ह्यभावाभावो न वन्हिस्वरूपः किन्त्वतिरिक्त एव अन्यथा वन्ह्यभावे तादृशविशिष्टाभावबुद्ध्यनुदयप्रसंगात्, तथाचाऽखण्डस्य विशिष्टहेत्वभावस्य यावद्विपक्षवृत्तित्वान्नाव्याप्तिरिति वाच्यम् । विशिष्टाभावस्य विशेष्याभावविशेषणाभावानतिरिक्तत्वाङ्गीकर्तृप्राचीनमतावलम्बनेनैतदव्याप्तेरभिधानात्, एवं च प्रतियोगितासंयोगाऽन्यतरसम्बन्धेन वन्हिनैवोपपत्तौ अतिरिक्ताऽभावाऽनभ्युपगमादिति फलितम् तादृशविशिष्टाभावस्य वह्न्यभावत्ववन्ह्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वाऽसभवात् । यदि च हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशेऽपि सकलसाध्याभाववत्पर्वतादौ वह्न्यभावानधिकरणदेशावच्छेदन वह्न्यभावनिष्ठकालिकसम्बन्धावच्छिन्नप्रतियोगिताकतादृशवह्न्यभावाभावमादाय नाव्याप्तिरित्युच्यते, तदाऽग्रिमलक्षणाऽपेक्षया गौरवमेवैतल्लक्षणेऽस्वरसो बोध्यः ।

अपरे तु निर्वह्नित्वस्य व्याप्यवृत्तितया तद्धेतुके प्रतियोगिवैयधिकरण्यानुपादानेन प्रतियोगितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वस्यैव निवेशनीयतया न भेदमादायाऽव्याप्तिवारणाऽसभवः । न चैवं विशिष्टसत्ताहेतुके प्रतियोगितावच्छेदकावच्छिन्नेत्यस्य व्यावृत्तिदानं दीधितिकृतोऽसङ्गतं स्यादिति वाच्यम् । एकोक्त्यभिप्रायेण तदभिधानात् । घटः पटान्यत्वविशिष्टघटपटसंयोगादित्यादावेव पटान्यत्वविशिष्टघटपटसंयोगाभावस्य पटे प्रतियोगिवैयधिकरण्याभावेनाऽव्याप्तिवारणायैव तदुपादानादित्याहुः ।

अन्ये तु हेत्वभावस्य साध्याभाववन्निष्ठत्वं न सम्बन्धसामान्येन, सर्वसाधारणाऽनुगतसम्बन्धत्वाभावाद् गौरवाच्च, नाप्यभावीयविशेषणतया, घटत्वाभाववान् पृथिवीभेदादित्यादौ साध्याभाववति घटे हेत्वभावस्य पृथिवीत्वस्य समवायेनैव सत्त्वादव्याप्तेः, भावाऽभावसाधा-

अत्र निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकं निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वं व्याप्तिरित्युक्तौ तु न दोष इति ध्येयम् ।

रणदैशिकविशेषणतायां मानाभावात्, किन्तु हेतुमत्ताग्रहविरोधितानियामकसम्बन्धेन तद्वाच्यम्, युज्यते चैतत्, तथासत्येतद्व्याप्तिज्ञानस्य व्यभिचारग्रहविरोधित्वं सम्भवति हेतुतावच्छेदके हेतुमत्ताग्रहविरोधितानियामकसम्बन्धेन साध्याभाववन्निष्ठत्वनिरूपितावच्छेदकत्वग्रहे तुल्यवित्तिवेद्यतया हेतुतावच्छेदकावच्छिन्नाभावस्य तादृशसम्बन्धेन साध्याभाववन्निष्ठत्वग्रहात् साध्याभाववति तादृशसम्बन्धेन हेत्वभावग्रहस्यैव साध्याभाववति हेतुतावच्छेदकसम्बन्धेन हेतुग्रहरूपव्यभिचारग्रहविरोधित्वात्, तथा च वह्न्यभावभेदस्य [illegible]लिकसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाभावस्य च तादृशसम्बन्धेन संयोगादिना सा[illegible]भाववन्निष्ठत्वाऽभावात् तमादाय लक्षणगमनाऽसंभव इत्यस्मद्गुरवस्त्वित्याहुः ।

वस्तुतस्तु प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिवैयधिकरण्यं निविष्टं प्रतियोगितायां च 'साध्यतावच्छेदक' हेतुतावच्छेदकसम्बन्धावच्छिन्नत्व निविष्टं, तत्तत्सम्बन्धावच्छिन्नप्रतियोगित्वाऽनिवेशेन लाघवादित्याशयेनोक्ताऽव्याप्त्यभिधानम्, वह्न्यभावभेदादीनां हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वाभावेन तमादाय लक्षणगमनाऽसंभवात् । नन्वेवं सति वृत्त्यनियामकसम्बन्धेन हेतुतायामव्याप्तिः तेन सम्बन्धेन हेत्वभावस्याऽप्रसिद्धेः, तेन सम्बन्धेन प्रतियोगिवैयधिकरण्यन्तु हेत्वभावस्य प्रसिद्धमेवेति चेन्न । प्राचीनमते वृत्त्यनियामकसम्बन्धस्याऽप्यभावप्रतियोगितावच्छेदकत्वात्, वृत्त्यनियामकसम्बन्धस्याऽभावप्रतियोगिताऽनवच्छेदकत्वे च तेन सम्बन्धेन व्याप्यत्वस्याप्यनभ्युपगमात् एतल्लक्षणानां च प्राचीनमतानुसारित्वात्, अन्यथाऽभावाऽभावस्याऽतिरिक्तत्वेनैतदव्याप्त्युद्भावनस्यैवाऽसंगतेः ।

केचित्तु धूमवह्न्योः सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकाऽभाव एव विवक्षितः, पर्वतादिवृत्तितादृशवह्न्यभावस्य हेतोस्तादृशसम्बन्धेन धूमवत्त्वेन साध्याभाववत्तया तादृशसकलान्तर्गते तत्र हेतुभेदस्याप्यसत्त्वान्नाव्याप्त्यसङ्गतिरित्याहुः ।

निरुक्तेति । प्रतियोगितावच्छेदकावच्छिन्नेत्यर्थः । तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः । **प्रतियोगिवैयधिकरण्येति** । तेन कपिसंयोगी एतत्त्वादित्यादौ नाव्याप्तिः । **साध्याभावव्यापकतावच्छेदकमिति** । साध्याभावव्यापकतावच्छेदकत्वन्तु साध्याभाववन्निष्ठाऽत्यन्ताभावप्रतियोगिताऽनवच्छेदकत्वम्, तेन धूमवान् वन्हेरित्यादौ प्रमेयत्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वेऽपि न क्षतिः, न वा निर्धूमत्वव्याप्यवान् निर्वन्हित्वादित्यादौ निर्वन्हित्वाभावस्य कस्यापि वन्हेः साध्याभावव्यापकत्वविरहेऽप्यव्याप्तिः, वह्न्यभावाभावत्वस्य व्यापकतावच्छेदकत्वात् ।

अथ व्यापकताघटकाभावे साध्याभावसामानाधिकरण्यं यदि यथाकथञ्चित्सम्बन्धेनोच्यते, तदा वह्निमान् धूमादित्यादौ वह्न्यभाववति कालिकसम्बन्धेन धूमादिस्वरूपाभावस्य सत्त्वेन धूमाभावादेर्व्यापकत्वविरहादव्याप्तिः स्यात् । न च साध्याभाववन्निष्ठत्व हेतुतावच्छेदकसम्बन्धेन विवक्षणीयमिति वाच्यम् । सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदक-

अत्र अन्योऽन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं, न हि भवति नीलो घटो घटान्य इति ।

ननु साध्यवत्प्रतियोगिकान्यत्वस्य धूमादिमति सत्त्वादव्याप्तिरत आह अत्रेति । **तथाच साध्यवत्पदेन निरूढलक्षणयोपस्थापितस्य साध्यतावच्छेदकविशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकस्याऽन्यपदार्थैकदेशेऽन्यत्वे तादात्म्येनाऽन्वयात् साध्यवति च विशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाऽसत्त्वान्नाव्याप्तिः, गुरुधर्मस्याऽवच्छेदकत्वोपगमाच्च द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्ववत्त्वविशिष्टद्रव्यत्वावच्छिन्नभेदाऽप्रसिद्ध्या नाऽव्याप्तिरिति भावः ।**

सम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तेरिति चेद्, दत्तोत्तरत्वात् ।

साध्यवत्त्वव्यक्तिभेदमादाय वन्हिमान् धूमादित्यत्राऽव्याप्तिमाशङ्कते **नन्विति** । दीधितौ **अत्रेति** । साध्यवदन्याऽवृत्तित्वमितिवाक्ये इत्यर्थः । घटकत्वं सप्तम्यर्थः । स चान्योन्याभावाऽन्वयी । यद्वा विषयत्वं सप्तम्यर्थः, तच्च व्यापारानुबन्धित्वम् , अन्वयश्चास्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वे । अन्योन्याभावस्य–अन्यपदार्थैकदेशाऽन्योन्याभावस्य । अयमाशयः । सप्रतियोगिकाऽन्योन्याभावातिरिक्तस्य सावधिकपृथक्त्वस्य सत्त्वेपि अन्यपदस्याऽन्योन्याभाववदर्थकत्वमेव, न त्वाचार्यादिसम्मतं पृथक्पदपर्यायत्वं युक्तम्, तथासति घटादन्य इत्यादिवाक्यात् घटाऽन्योन्याभावसंशयनिवृत्तेरनुपपत्तेः । न च घटात्पृथगित्यादौ पञ्चम्युपपत्तये 'अन्यारादितरर्त्ते' इत्यादिसूत्रेणाऽन्यार्थकपदयोगे पञ्चमीविधानेनाऽन्यशब्दस्य पृथक्पदपर्यायत्वमावश्यकमिति वाच्यम् । सूत्रेऽन्यपदस्य पृथगादिपदोपलक्षकत्वेनैव तदुपपत्तेः।

केचित्तु यदि अन्यादिपदस्याऽन्योन्याभाववदर्थकत्वं न स्यात्, न स्याद्वा तद्योगे पञ्चमी पृथक्त्वगुणविशिष्टबोधकाऽन्यादिपदयोगे पञ्चम्या 'ध्रुवमपायेऽपादानमि'ति सूत्रेणैव सिद्धत्वादित्याहुः ।

अपरे तु गुणादौ पृथक्त्वगुणाऽसम्भवेन द्रव्यादन्यो गुण इत्यादि प्रयोगानुपपत्त्याऽन्योन्याभावस्यैवाऽन्यपदार्थतावच्छेदकत्वमित्याहुः ।

वस्तुतस्तु **गुणदीधितौ** अन्योन्याभावातिरिक्तपृथक्त्वस्य निरासेन अन्यपदस्य पृथक्पदपर्यायत्वेऽपि अन्योन्याऽभाववदर्थकत्वमेव ।

व्युत्पत्तिः आकाङ्क्षा–अन्यादिपदसमभिव्याहारः । तदेवं बलं–प्रयोजकं–तल्लभ्यं–तत्प्रयोज्यशाब्दबोधविषय इत्यर्थः। नञ्पदसमभिव्याहारज्ञानस्येवाऽन्यादिपदसमभिव्याहारज्ञानस्यापि अन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दत्वावच्छिन्नं प्रति हेतुत्वादिति भावः ।

जागदीश्यां **निरूढलक्षणयेति** । न च साध्यवत्त्वावच्छिन्नप्रतियोगिताकस्य लक्षणया पदलभ्यत्वे पदार्थतया पदार्थे व्युत्पत्तिबललभ्यत्वोक्तिरसङ्गतेति वाच्यम् । विग्रहसमासयोस्तुल्यार्थकत्वनियमेन विग्रहात्तथा बोधस्य व्युत्पन्नत्वे समासादपि तथात्वेन विग्रहीयव्युत्पत्तेस्तल्लक्षणायां प्रयोजकतया तल्लभ्यत्वोक्तेः । अत एवोपष्टम्भके घटान्य इति समस्तमुपेक्ष्य घटादन्य इति विग्रहवाक्यमेवोक्तम् ।

किञ्च प्रकृते निरूढलक्षणायाः समभिव्याहारविशेषमपेक्ष्यैव निरूढत्वात् तत्र तदनु-क्तिः, नहि साध्यवदादिपदमात्रे साध्यवत्त्वावच्छिन्नप्रतियोगिताके निरूढलक्षणा किन्तु अन्या-दिपदसमभिव्याहृते तत्रेत्याशयः । उपष्टम्भके समस्तं चेह चाऽसमस्तेऽपि समस्तविग्रहवा-क्येऽप्यन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य व्युत्पत्तिबललभ्यत्वे विग्रहसमासवा-क्ययोः समानार्थकत्वनियमभङ्गो नेति सूचनाय ।

केचित्तु साध्यवदन्येत्यादिसमस्तस्थलेऽपि न लक्षणा किन्तु विग्रहवाक्यस्थविभक्ति-स्मरणेन तथाऽन्वयः । यद्वा समासस्थले व्युत्पत्तिवैचित्र्यात् नामार्थयोर्भेदान्वयेऽप्युपगमेन साध्यवदादेरन्यपदार्थे भेदे निरुक्तप्रतियोगिताकत्वसम्बन्धेनाऽन्वयः, एवं च तस्याऽपदार्थ-त्वेन व्युत्पत्तिबललभ्यत्वोक्तिरपि समञ्जसैवेत्याहुः ।

ननु तथापि अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वाऽलाभः, तथाहि यथा नञ्-समभिव्याहारज्ञानकार्यतावच्छेदककोटिप्रविष्टान्वयितावच्छेदकत्वं नञर्थाऽभावविशेष्यतानि-रूपितप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकतापर्याप्त्यधिकरणत्वं, तथाऽन्यादिपदसम-भिव्याहारज्ञानकार्यतावच्छेदककोटिप्रविष्टमन्यपदार्थैकदेशाऽन्योन्याभावविशेष्यतानिरूपित-प्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकतापर्याप्त्यधिकरणत्वमेव वाच्यम्, तस्य च साध्यवतो इत्याद्यसमस्तस्थले विभक्त्यर्थप्रतियोगित्वस्य प्रकारतया संसर्गतया वा भानाभ्यु-पगमसंभवेपि समस्तस्थले प्रतियोगित्वस्याऽसंसर्गतया न सम्भव इति चेत् । नैवम् । साक्षात्प-रम्परया वा तादृशान्योन्याभावान्वितप्रतियोगिताया प्रकारतावच्छेदकत्वमेवोभयसाधारणं प्रकृतेऽन्वयितावच्छेदकत्वम् । असमस्तस्थले साक्षादन्योन्याभावान्वितविभक्त्यर्थप्रति-योगितायां साध्यवत्त्वाद्यवच्छिन्नत्वसम्बन्धेन साध्यवदादेः प्रकारतया साध्यवदादेस्तदवच्छे-दकत्वम् । समस्तस्थले तु साध्यवदादिपदस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताके लाक्षणिकतया परम्परयाऽन्योन्याभावान्वितप्रतियोगितायामवच्छिन्नत्वस्य प्रकारतया साध्यवत्त्वादेस्तदव-च्छेदकत्वम् ।

केचित्तु असमस्तस्थले तादृशभेदनिष्ठविशेष्यतानिरूपितप्रकारतानिरूपितप्रकारता-वच्छेदकत्वं तत्, एव च तद्धर्मावच्छिन्नप्रतियोगिप्रकारतानिरूपितप्रतियोगित्वप्रकारता-निरूपितभेदविशेष्यताकशाब्दं प्रति तद्धर्मावच्छिन्नबोधकपदसमभिव्याहृतपञ्चम्यादि-समभिव्याहृतान्यपदज्ञानत्वेन हेतुत्वमेकं, तद्धर्मावच्छिन्नत्वप्रकारतानिरूपितप्रतियोगि-त्वप्रकारतानिरूपिताश्रयत्वप्रकारतानिरूपितभेदविशेष्यताकशाब्दं प्रति तद्धर्मावच्छिन्न-बोधकपदसमभिव्याहृताऽन्यपदज्ञानत्वेन चाऽपरमित्याहुः । **तदसत्** । उक्तरीत्यैव सामं-जस्ये धर्मभेदेन समस्ताऽसमस्ते हेतुत्वद्वयकल्पने गौरवात् । न च भवन्मतेऽपि कथमे-कहेतुत्वम् ? असमस्तस्थले प्रतियोगित्वस्य समस्तस्थले चाऽश्रयस्य प्रकारत्वात्, प्रमेया-दिपदजन्यप्रमेयत्वादिप्रकारकवस्तुसत्तादृशभेदबोधे व्यभिचारेण जन्यतायां प्रकारतावि-शेषनिवेशस्याऽवश्यकत्वादिति वाच्यम् । तादृशभेदविशेष्यतानिरूपितसाक्षात्परंपरासाधार-णोक्तप्रतियोगित्वप्रकारताया एव जन्यतावच्छेदकत्वात् ।

अपरे तु प्रतियोगित्वविशेष्यतानिरूपितस्वावच्छेदकावच्छिन्नत्वसम्बन्धावच्छिन्नप्रकार-तावच्छेदकत्वमेवोभयसाधारणं प्रकृतेऽन्वयितावच्छेदकत्वम्, तद्धर्मावच्छिन्नत्वसम्बन्धाव-

तद्धर्मविशिष्टबोधकपदसमभिव्याहृतेनाऽन्यादिपदेनोऽपस्थापितेऽन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्येनाऽन्वयो न तु·

च्छिन्नप्रतियोगिप्रकारतानिरूपितप्रतियोगित्वप्रकारतैव जन्यतावच्छेदिका असमस्तस्थले विभक्त्यर्थप्रतियोगितायां साध्यवत्त्वावच्छिन्नत्वसम्बन्धेन साध्यवदादेरन्वयः। समस्तस्थले तु साध्यवदादिपदस्य लक्षणया साध्यवत्त्वाद्यवच्छिन्नप्रतियोगिताको नार्थः, किन्तु प्रतियोगिताकमात्रं तत्र शक्यार्थसाध्यवदादेः साध्यवत्वाद्यवच्छिन्नत्वसम्बन्धेन प्रतियोगितायामन्वयः एकनामार्थेऽपरनामार्थस्य भेदेनाऽन्वयस्याऽव्युत्पन्नत्वेपि एकनामार्थयोः परस्परं भेदेनाऽन्वये कृतिवर्त्तमानत्वयोरिव बाधकाभावात् दित्याहुः।

वस्तुतस्तु तादृशभेदनिरूपितोक्तप्रतियोगिविषयतैव जन्यतावच्छेदिका सा चाऽसमस्तस्थले प्रकारता संसर्गता च, समस्तस्थले ससर्गतैव आश्रयस्याऽभेदसम्बन्धेन प्रकारतयाऽभेदस्य प्रतियोगितावच्छेदकात्मकभेदाऽभावरूपतया नीलो घट इत्यादौ नीलत्वादाविव प्रकृते तूक्तप्रतियोगित्व एव पर्यवसानात्।

साध्यतावच्छेदकविशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकस्येति। साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मनिष्ठाऽवच्छेदतानिरूपकीभूतसाध्यवत्त्वपर्याप्तावच्छेदकताकप्रतियोगिताकस्येत्यर्थः। तेन तत्तद्वह्निमान्न वह्निघटोभयवान्न वह्निमत्पर्वतो नेत्यादिभेदानां महानसादौ सत्त्वेऽपि न क्षतिः।

महानसयिवह्न्याद्यवच्छिन्नप्रतियोगिताकभेदमादायाऽव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्याऽवश्य विवक्षणीयतया प्रसक्तां द्रव्यं पृथिवीत्वादित्यत्राऽव्याप्तिं निराकुरुते **गुरुधर्मस्याऽवच्छेदकत्वोपगमाच्चेति। नाव्याप्तिरिति**। इदमुपलक्षणम् कंबुग्रीवादिमत्ववान् घटत्वादित्यादिगुरुधर्मसाध्यके साध्यावच्छिन्नप्रतियोगित्वस्याऽप्यप्रसिद्धिर्द्रष्टव्या।

केचित्तु ननु साध्यवदन्य इत्यत्र मतुबन्तप्रतिपाद्यतावच्छेदकसाध्यसम्बन्धरूपसाध्यवत्त्वस्याऽन्वयितावच्छेदकत्वेऽपि साध्योपेक्षया गुरुतयाऽभावप्रतियोगिताऽनवच्छेदकत्वेन तदवच्छिन्नप्रतियोगित्वाऽप्रसिद्धिः। न च पटः कम्बुग्रीवादिमदन्य इत्यादिवाक्यप्रामाण्यानुरोधेनाऽन्वयितावच्छेदकनिरूपितं पारिभाषिकमवच्छिन्नत्वं प्रतियोगितायां भासते इति, गुरुधर्मोऽपि प्रतियोगिताऽवच्छेदक इति वोपेयमिति न दोष इति वाच्यम्। कम्बुग्रीवादिमान्नास्तीत्यादौ भ्रमात्यकशाब्दबोध इत्युत्तरविरोधादिति चेन्न। साध्यवत्त्वं हि अत्र साध्यमेव विवक्षित मतुबन्तप्रतिपाद्यतावच्छेदकत्वस्य मतुबन्तजन्यबोधे संप्रदायमते मतुबर्थसम्बन्धस्येव तद्वारा मत्युष्प्रकृत्यर्थस्याऽपि प्रकारत्वामित्याशयात्। न च कम्बुग्रीवादिमत्त्ववान् घटत्वादित्यत्राऽव्याप्तिरिति वाच्यम्। तत्र भ्रमात्मकव्याप्तिज्ञानादेवाऽनुमित्यङ्गीकारादिति प्राहुः।

वस्तुतस्तु अन्योन्याभावप्रतियोगिताऽनवच्छेदकत्वे सति वृत्तिमत्त्वरूपकेवलान्वयित्वस्य गुरुधर्मसाधारण्येन तत्साध्यकाऽव्याप्तेर्मूलोक्तदोषे एवाऽन्तर्भाव इति ध्येयम्।

साध्यवत्पदार्थस्य "साध्यावच्छिन्नप्रतियोगिताकस्य" नान्यपदार्थेऽन्वयः, बाधात्, नापि तदेकदेशे पदार्थः पदार्थेनान्वेतीत्यादिव्युत्पत्तिविरोधादत आह **अन्यत्वादाविति।**

तद्धर्माश्रयप्रतियोगिताकत्वेनेत्यत्र व्युत्पत्तौ प्रमाणमाह नहीति । तादृशव्युत्पत्त्यस्वीकारे नीलघटे पीतघटप्रतियोगिकभेदसत्त्वान्नीलो घटो घटान्य इत्यपि व्यवहारः स्यादिति भावः ।

अत्र च द्रव्यं घटान्यदित्याद्यप्रयोगात् यन्निष्ठप्रतियोगिताकत्वेनाऽन्यादिपदेन भेदो बोध्यते तदवृत्तिधर्मस्यैवाऽनुयोगितावच्छेदकत्वात् तत एव घटो घटान्य इत्यस्य वारणसम्भवात् नीलघटत्वस्याऽनुयोगितावच्छेदकत्वपर्यन्ताऽनुधावनमिति मन्तव्यम् ।

तादात्म्येनाऽन्वय इति । व्युत्पत्तिवैचित्र्यादिति शेषः । उत्तरपदस्यैव विशिष्टं लक्षणं, इतरं तात्पर्यग्राहकं, एवं च न कश्चिद्विरोध इत्यपि कश्चित् ।

तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैवेति । एवकारव्यवच्छेद्यमाह **नत्विति** । एतेन पर्याप्तिनिवेशनमपि सूचितम् ।

नन्वेवमभेदसम्बन्धेन साध्यावच्छिन्नप्रतियोगिताकविशिष्टभेदवदवृत्तित्वमेव लक्षणं पर्यवसन्नं, लक्षणवाक्याद् यादृशविशिष्टार्थः प्रतीयते तस्यैव लक्षणत्वात्, एवं च अनुमितिहेतुतावच्छेदकव्याप्तिजिज्ञासया एतन्निरूपणेऽर्थान्तरं, लाघवादुक्तप्रतियोगितासंसर्गकसाध्यवद्विशेषणकभेदघटितव्याप्तेरेवाऽनुमितिहेतुतावच्छेदकत्वादिति चेन्न । लक्षणवाक्यतात्पर्यप्रयुक्तबोधविषयविशिष्टार्थस्यैव लक्षणत्वेन यादृशव्याप्तिज्ञानमनुमितिहेतुस्तस्यामेवाऽस्य तात्पर्येण तादृशव्याप्तिज्ञानतात्पर्यप्रयुक्तप्रकृतलक्षणवाक्यादपि तादृशमानसबोधसम्भवेन तादृशव्याप्तेरेव लक्षणार्थत्वात् ।

वस्तुतस्तु लक्षणवाक्यार्थस्यैव लक्षणत्वेऽपि नार्थान्तरं, शरीरगौरवेऽपि तदर्थव्याप्तेरेव लाघवान्तरेणाऽनुमितिहेतुतावच्छेदकत्वात्, लाघवान्तरं च अवच्छिन्नत्वं न साध्यीयं, प्रतियोगिता नावच्छिन्ना, भेदो नोक्तप्रतियोगिताक इत्यादि बहुविधोपनीतभानादौ अनुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेन । अत एव सिद्धान्ते व्यापकसामानाधिकरण्यरूपव्याप्तेरप्यनुमितिहेतुतावच्छेदकत्वं वक्ष्यमाणमुपपद्यते, अन्यथा तत्रापि शरीरलाघवेन स्वावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यसम्बन्धेन हेतुतावच्छेदकवत्त्वस्यैव व्याप्तित्वौचित्यादिति तत्त्वम् ।

अत्र चेति । तत एवेति । अन्यादिपदसमभिव्याहारज्ञानस्याऽनुयोगितावच्छेदकावच्छेदेन अन्योन्याभावादिशाब्दं प्रति हेतुत्वम्, तथा अनुयोगितावच्छेदकश्च प्रतियोग्यवृत्तिधर्म इति व्युत्पत्त्यनुरोधादेवेत्यर्थः ।

वस्तुतस्तु द्रव्यं घटान्यदित्यादिप्रयोगवारणाय अन्यादिपदसमभिव्याहारज्ञानं अनुयोगितावच्छेदकाऽधिकरणाऽवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दं प्रति कारणमेतादृशरीत्यैव कार्यकारणभावः कल्प्यते तावतापि द्रव्यं घटान्यदित्यादिप्रयोगवारणसम्भवात्, न तूक्तरीत्या कार्यकारणभावः कल्प्यते, एवं च द्रव्यं घटान्यदित्यादिप्रयोगस्य यथा वारणं तथैव घटो घटान्य इत्यादि प्रयोगस्यापि वारणसम्भवोऽत उक्तं नीलो घटो घटान्य इति । एतेनाऽन्यादिपदसमभिव्याहारज्ञानस्याऽनुयोगितावच्छेदकावच्छेदेनाऽन्योन्याभावबोधकत्वेऽपि घटप्रतियोगिकस्य घटपटोभयान्योन्याभावस्य घटत्वावच्छेदेन सम्भवात्तादृशाभावमादाय घटे

नीलो घटो घटान्य इत्येव सम्यक् पाठः, तथैव प्रकृतोपयोगित्वस ङ्गतेः। घटादन्य इति पाठस्तु साध्यवदन्येत्यत्र पञ्चमीसमासे लुप्तविभक्तिस्मारितप्रतियोगित्वे प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वस्य संसर्गमर्यादया भानमादृत्य कथञ्चित्सङ्गमनीयः।

घटः पटो नेत्यादौ तु पटपदं मुख्यार्थपरमेव न तु प्रकृत इव पटत्वावच्छिन्नप्रतियोगिताकपरम्, निपाताऽतिरिक्तस्थले एव नामार्थयोर्भेदान्वयस्याऽव्युत्पन्नतया नञोपस्थापिते भेदे पटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव पटस्याऽन्वयसम्भवात्। पटत्वावच्छिन्नप्रतियोगिताकत्वन्तु पटत्वमवच्छिन्नत्वं प्रतियोगित्वं चेति त्रितयमेव विशेष्यविशेषणभावापन्नं संसर्गः, न तु वस्तुगत्या पटत्वाऽवच्छिन्नं यत्प्रतियोगित्वं तन्मात्रम्, पटो नेत्यत्र पटत्वावच्छिन्नत्वस्याप्यनुभवसिद्धत्वात्, अन्यथा प्रतियोगिव्यक्तिभिरेव तत्तद्विशिष्टबुद्ध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वमेव न स्यात्, मानाभावात्, अत एव केवलान्वयिग्रन्थे वन्हिर्नास्तीत्यत्र वन्हित्वं

घटान्य इति प्रयोगवारणाऽसम्भवेन नीलघटोपादानं व्यर्थमिति परास्तम्।

ननु नीलघटत्वस्य कथं प्रतियोग्यवृत्तित्वमिति चेत्। विशिष्टसत्तावान् गुणान्य इति प्रयोगाऽनुरोधेन यद्धर्मावच्छिन्नवत्त्व प्रतियोग्यवृत्ति यद्धर्मो वा प्रतियोगिवृत्तिताऽनवच्छेदकः तद्धर्मावच्छिन्नमेव भेदानुयोगितावच्छेदकमिति न कोपि दोषः। नीलघटत्वावच्छिन्नवत्त्वं च घटाऽवृत्तीति।

प्रकृतोपयोगित्वसङ्गतेरिति। अत्रापि साध्यवत्त्वावच्छिन्नप्रतियोगिताक इव घटत्वावच्छिन्नप्रतियोगिताके लक्षणा। तथाच दृष्टान्तदार्ष्टान्तयोः साम्यमिति भावः।

घटादन्य इतीति। अत्र प्राचीनमते पञ्चम्याः प्रतियोगित्वमर्थः। तत्र घटत्वावच्छिन्नस्याऽधेयतासम्बन्धेनाऽन्वयः। धर्मिपारतन्त्र्येण घटत्वादेरपि अवच्छिन्नत्वसम्बन्धेन तत्राऽन्वयात्, एकत्र विशेषणत्वेनोपस्थितस्यान्यत्र धर्मिपारतन्त्र्येणान्वयस्य सर्वमतासिद्धत्वात्, प्रतियोगित्वस्य व्युत्पत्तिवैचित्र्येणाऽन्यपदार्थैकदेशे भेदे निरूपकतासम्बन्धेनाऽन्वयः।

न घटादित्यादौ यदि पञ्चम्याः प्रतियोगित्वमर्थस्तदा घटनिष्ठप्रतियोगिताया निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाऽभावो बोधविषयो वाच्यः, एवं च निरूपकत्वस्य वृत्त्यनियामकतया तादृशाऽभावाऽप्रसिद्ध्या न सम्भवतीति नवीनैरनुयोगित्वमेव पञ्चम्यर्थः स्वीक्रियते, तत्र प्रकृत्यर्थस्य घटादेः स्ववृत्तिघटत्वावच्छिन्नप्रतियोगितानिरूपकताकत्वसम्बन्धेनाऽन्वयः। अनुयोगितायाश्चाऽऽश्रयतासम्बन्धेनाऽन्वयः। समासस्थले च उभयमते घटपदस्य घटत्वावच्छिन्नप्रतियोगिताविशिष्टे अनुयोगिताविशिष्टे वा लक्षणा, तत्पुरुषे पूर्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्टे लाक्षणिकत्वात्।

यत्किञ्चित्पटादिव्यक्तौ पटो नेत्याद्यप्रयोगेण नञ्स्थलेप्यन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्व व्युत्पत्तिबललभ्यं तत्प्रसङ्गादुपपादयति **घटः पटो नेत्यादौ त्विति**। मुख्यार्थपरमेव—पटत्वावच्छिन्नपरमेव। **अव्युत्पन्नतयेति**। राजा पुरुषः भूतलं घट इत्यादौ क्रमेण स्वत्त्वाऽधेयतासम्बन्धेन राजभूतलादेः पुरुषघटादावन्वयाऽबोधाद्विशेष्यतासम्बन्धेन तादात्म्यसम्बन्धानवच्छिन्ननामार्थनिष्ठप्रकारताशालिबोधं प्रति नामोत्तरविभक्त्युपस्थाप्यत्वस्य

अवच्छिन्नत्वं प्रतियोगित्वं च संसर्गमर्यादया भासते इति स्वयमप्युक्तम् ।

इत्थं च प्रमेयं नास्ति कम्बुग्रीवादिमान्नास्तीत्यादिशाब्दबोधानां संसर्गकोटावेव प्रतियोगितायां प्रमेयत्वावच्छिन्नत्वावगाहितया भ्रमत्वम्, संसर्गप्रकारसाधारणविशेषणविशेष्यभावस्यैव भ्रमत्वघटकत्वात्, अन्यथा स्वरूपसम्बन्धेन प्रमेयत्वाद्यवच्छिन्नप्रतियोगित्वस्याऽलीकतयाऽखण्डतत्सम्बन्धेन प्रमेयस्य अभावे धर्मिणि अन्वयाऽसम्भवेन भ्रमत्वाऽनुपपत्तेः, तदुपरागेणाऽप्यसतः संसर्गमर्यादया भानस्य मणिकृताऽनङ्गीकारात् ।

कलशेन पटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन चाऽभावे प्रमेयस्य सत्त्वेन तादृशसम्बन्धेन भ्रमत्वस्य वक्तुमशक्यत्वात् । पटत्वादेरन्वयिता-

---

निपातोपस्थाप्यत्वस्य च प्रयोजकतयेति भावः । **संसर्गेणैवेति** । तथाच पटत्वावच्छिन्नप्रतियोगिताकत्वं सम्बन्धविधया भासते न तु लक्ष्यतावच्छेदकतयेति भावः । निपाताऽतिरिक्तनामार्थयोरेव भेदाऽन्वयस्याऽव्युत्पन्नतया नञर्थे घटादेरुक्तसम्बन्धेनाऽन्वयासम्भवादिति ।

इत्थं चेति । विशेषणविशेष्यभावापन्नस्य संसर्गत्वे चेत्यर्थः । इदन्तु तत्त्वम् । यत्राऽन्वयितावच्छेदकावच्छिन्नस्य प्रतियोगित्वं प्रसिद्धं तत्राऽन्वयितावच्छेदकावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नतादृशप्रकारताया एव तादृशसमभिव्याहारज्ञानकार्यतावच्छेदकत्वं, कम्बुग्रीवादिमान्नास्तीत्यादौ तु नञ्पदसमभिव्याहारज्ञानकार्यतावच्छेदकं न कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नतथाविधप्रकारताशालित्वं गुरुधर्मे अभावप्रतियोगितावच्छेदकताविरहेण कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन तथा वक्तुमशक्यत्वात्, किन्तु तत्र कम्बुग्रीवादिमत्त्वनिष्ठसांसर्गिकविषयतानिरूपितअवच्छेदकत्वनिष्ठसांसर्गिकविषयतानिरूपितनिरूपितत्वनिष्ठसांसर्गिकविषयतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयताया एव तत्त्वं, तथा च तादृशवाक्यजन्यबोधेऽवच्छेदकत्वांशे कम्बुग्रीवादिमत्त्वस्य भ्रमत्वस्वीकारान्नानुपपत्तिरिति ।

ननु भ्रमत्वं हि तदभाववति तत्प्रकारकत्वम्, तथाच सांसर्गिकविषयतायां प्रकारतात्वविशेष्यतात्वाभावेन सम्बन्धांशे भ्रमत्वं दुरुपपन्नम्, न च तदभाववन्निष्ठविषयतानिरूपिततन्निष्ठविषयताशालित्वमेव भ्रमत्वमिति वाच्यम्, तथासति इदं रजतमिति ज्ञाने इदमंशेपि भ्रमत्वापत्तेरिति चेन्न । सांसर्गिकविषयतायां प्रकारतात्वव्यापकविशेषणतात्वाङ्गीकारात् । तदेवाह-**संसर्गप्रकारसाधारणेति** । नचैवं सति अवच्छेदकत्वे कम्बुग्रीवादिमत्त्वाभावनिर्णयदशायां कम्बुग्रीवादिमान्नास्तीति प्रतीत्यनुपपत्तिः, भवन्मते तस्याः तादृशबाधप्रतिबध्यतावच्छेदकाक्रान्तत्वादिति वाच्यम् । इष्टापत्तेः । बाधप्रतिबध्यतावच्छेदककोटौ प्रकारतायां सांसर्गिकविषयताभिन्नत्वस्य वा निवेशात् ।

ननु कम्बुग्रीवादिमान्नास्तीत्यादौ अभावांशे घटत्वावच्छिन्नप्रतियोगितासम्बन्धेन कम्बुग्रीवादिमत्त्वावच्छिन्नस्य भानमुपेयते, तथाचेयं प्रतीतिर्भ्रमात्मिका घटत्वावच्छिन्नप्रतियोगितायाः कम्बुग्रीवादिमत्त्वविशिष्टस्य सम्बन्धत्वाभावेन तत्सम्बन्धेन तदभाववति अभावे तत्प्रकारत्वादित्यत आह **कलशेनेति** । प्रमेयस्य-पटात्मकप्रमेयस्य ।

तादृशप्रयोगापलापापत्तेरिति । तथाचाऽन्वयितावच्छेदकतापर्याप्त्यधिकरणध-

ऽनवच्छेदकतया तदवच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वादिविशिष्टस्याऽन्वये निराकाङ्क्षत्वाच्च, अन्यथा घटवत्यपि घटो नास्तीत्यादेः प्रमाणत्वापत्तेः, तत्तद्घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन घटविशिष्टस्य घटविशेषाभावस्य तत्र सत्त्वात् ।

एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टसत्तात्वावच्छिन्नस्य समवायेनाऽसत्त्ववत् घटत्वावच्छिन्नवतोऽपि घटाद्यभावस्य न तादृशसम्बन्धेन प्रमेयत्वावच्छिन्नवत्त्वम्, अतः प्रमेयं नास्तीत्यादौ घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वावच्छिन्नस्यैवाऽभावांशे भ्रमत्वमित्यपि प्रत्युक्तम् । घटत्वादेरन्वयिताऽनवच्छेदकतया तदवच्छिन्नप्रतियोगितासम्बन्धेन प्रमेयत्वविशिष्टस्याऽन्वये निराकाङ्क्षतया तथाशाब्दस्याऽसम्भवादिति ध्येयम् ।

नीलो घटो नास्तीत्यादौ तु नीलघटत्वस्याऽन्वयितावच्छेदकत्वे तादृशधर्मावच्छिन्नप्रतियोगित्वमेव संसर्गः, न तु नीलत्वघटत्वादिप्रत्येकधर्मावच्छिन्नप्रतियोगित्वम्, नीलपटस्य पीतघटस्य वाऽधिकरणे तादृशप्रयोगाऽपलापत्तेः । नीलोपलक्षितस्य घटत्वमात्रस्याऽन्वयितावच्छेदकत्वे तु घटत्वावच्छिन्नप्रतियोगित्वमेव तथा ।

संयोगेन घटो नास्तीत्यादौ तु तृतीयाविभक्तेर्नावच्छिन्नत्वमर्थः, संसर्गीभूतप्रतियोगितायां तदन्वयाऽसम्भवात्, किन्त्ववच्छिन्नप्रतियोगिताकत्वं, प्रतियोगित्वमात्रं वा, अवच्छिन्नत्वसंसर्गेण संयोगादेस्तत्राऽन्वयादेव विशिष्टलाभसम्भवात् । न चैवं संयोगेन घटाभावस्यैव समवायेन घटविशिष्टद्रव्यत्वाभावतया समवायेन कपाले घटो नास्तीति व्यवहारापत्तिः, तृतीयान्तसमभिव्याहारस्थले तदुपस्थाप्यप्रतियोगित्वस्यैव संसर्गतया व्युत्पन्नत्वात्, समवायावच्छिन्नघटप्रतियोगिताकाभावस्य च कपाले विरहात् ।

अस्तु वा घटत्वावच्छिन्नत्वस्येव संयोगसम्बन्धावच्छिन्नत्वस्यापि प्रतियोगित्वांशे संसर्गमर्यादयैव भानम्, तृतीयान्तसमभिव्याहारस्य नियामकत्वाच्च नातिप्रसङ्गः ।

र्मावच्छिन्नप्रतियोगितासम्बन्धेनाऽभावांशे प्रतियोगिनो भानमित्यर्थः । ननु नीलो घटो नास्तीत्यादौ नीलघटत्वावच्छिन्नप्रतियोगितासम्बन्धेन नीलघटं विषयीकृत्य शाब्दबोधस्तु न सम्भवति अत्राऽन्वयितावच्छेदकीभूतं यदभेदसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन नीलविशिष्ट घटत्वं तस्य समवायघटितसामानाधिकरण्यसम्बन्धेन नीलरूपविशिष्टं यद् घटत्व तदपेक्षया गुरुतयाऽभावप्रतियोगिताऽनवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन तेन सम्बन्धेन तत्र नीलघटभानस्याऽसम्भवादिति चेत् । न, कम्बुग्रीवादिमान्नास्तीत्यादाविवोपदर्शितरीत्याऽत्रापि बोधसम्भवेवाऽनुपपत्त्यभावात् । घटपदस्य नीलरूपविशिष्टघटत्वावच्छिन्ने लक्षणा, अन्यथाऽप्रामाण्यस्येष्टत्वादित्यपि केचित् ।

ननु कम्बुग्रीवादिमान्नास्ति नीलघटो नास्ति इत्यादौ कम्बुग्रीवादिमत्त्वव्यापकघटत्वाव-

घटाऽनधिकरणं भूतलमित्यादौ तु लक्षणयाऽधिकरणपदमेव घटाधिकरणार्थकम्, घटपदं तात्पर्यग्राहकम्, अन्यथाऽनधिकरणपदेनाऽधिकरणसामान्यभिन्नन्वोक्तौ भूतले तस्य बाधः स्यात् । न च घटान्वितस्यैवाऽधिकरणस्य भेदस्तत्र नञा बोधनीयः, समासान्तर्गतनञामुत्तरपदार्थमात्रान्वयित्वव्युत्पत्तेः, अन्यथा नीलाऽघटो घट इत्यादौ नीलघटान्यस्य घटत्वं नीलाऽप्रमेयः पट इत्यादौ च नीलप्रमेयान्यस्य पटत्वं प्रतीयेत ।

वस्तुतः ससम्बन्धिकपदस्थले व्युत्पत्तिवैचित्र्यात्प्रतियोगिताऽनवच्छेदकं घटाऽनधिकरणं भूतलमित्यादौ घटाद्यन्वितस्यैवाऽधिकरणादेर्भेदो भासते, अन्यत्र त्रिपदतत्पुरुषाऽनुपगमेऽपि घटस्य नाऽधिकरणं प्रतियोगिताया नाऽवच्छेदकमित्यादिरीत्या त्रिपदतत्पुरुषेण विशिष्टलाभसम्भवादिति तु परमार्थः ।

पीतः शङ्खो नास्तीत्यादौ शाब्दबोधस्तु न शङ्खत्वावच्छिन्नतया प्रतियोगित्वमवगाहते तन्मात्रस्याऽन्वयिताऽनवच्छेदकत्वात् शङ्खवत्तया निश्चिते धर्मिण्यपि तादृशप्रयोगात्, परन्तु पीतशङ्खत्वावच्छिन्नप्रतियोगितात्वेन संसर्गमर्यादया प्रतियोगित्वमवगाहते, नञादिपदानां यद्धर्मविशिष्टवैशिष्ट्यावगाहिस्वोपस्थाप्याभावधर्मिकाऽन्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगितात्वेन प्रतियोगितासंसर्गकाऽन्वयबोधजनकत्वव्युत्पत्तेः ।

इयांस्तु विशेषः । यद् घटो नास्तीत्यादिशाब्दबोधे सांसर्गिकी प्रतियोगित्वावगाहिता प्रसिद्धेन घटत्वावच्छिन्नप्रतियोगितात्वेन निरूपिता, पीतः शङ्खो नास्तीत्यादौ तु पीतशङ्खत्वावच्छिन्नप्रतियोगितात्वेनाऽप्रसिद्धेनैवेत्यादिकं बहुतरमूहनीयम् ।

इति जागदीशी पञ्चलक्षणी सम्पूर्णा ।

च्छिन्नप्रतियोगिताकत्वं सम्बन्ध इति प्रामाण्यं सुघटम् । नचैवं द्रव्ये सत्ता नास्तीत्यादिवाक्यं योग्यं स्यात् द्रव्यान्यत्वविशिष्टसत्तात्वादेरपि सत्तात्वव्यापकत्वादिति वाच्यम् । व्यापकत्वपदेनात्र समव्यापकत्वनिवेशात् । नचैवं गौरवमिति वाच्यम् । समव्यापकतावच्छेदकत्वेनोपलक्षिततत्तद्धर्माऽनुगमात् तद्धर्मावच्छिन्नप्रतियोगिताकत्वसंसर्गकबुद्धित्वस्यैव तत्तदानुपूर्वीज्ञानजन्यतावच्छेदकत्वादिति केषाञ्चिन्मतं निरोकरोति **पीतः शङ्खो नास्तीति** । तथाच शङ्खो न पीत इति विशेषदर्शिनामपार्थकत्वमेव, तददर्शिनां वाच्य नास्तीत्यादाविव प्रतियोगितायामवच्छिन्नत्वं तत्र शङ्खत्वं तत्र सामानाधिकरण्येन पीतत्वमित्यादिक्रमेण भानम् । यत्तु पीतत्वविशिष्टशङ्खत्वं पीतः शङ्ख इति ज्ञाने प्रसिद्धं विषयितयोभयवैशिष्ट्यस्य ज्ञाने सत्त्वात् तदवच्छिन्नस्य सयोगादिनाऽभावधीरिति । तन्न, शङ्खादिपदात्समवायेन शङ्खत्वादिविशिष्टस्यैवोपस्थितेस्तदवच्छिन्नस्यैव प्रतियोगित्वानुभवाच्च ।

केचित्तु पीतत्वशङ्खत्वावच्छिन्नप्रतियोगिता तत्र संसर्गतया भासत इत्याहुः ॥

इति पञ्चलक्षणीटीका समाप्ता ।

अथ श्रीजगदीशभट्टाचार्यकृता

सिंहव्याघ्रलक्षणव्याख्या ।

श्रीरस्तु । नापि साध्याऽसामानाधिकरण्याऽनधिकरणत्वम् ।

नाऽपीति । साध्यमसमानाधिकरणं यस्य यदधिकरणाऽनधिकरणं साध्यं तत्त्वम् ।

साध्याऽसामानाधिकरण्यपदस्य साध्यवद्भिन्नवृत्तित्वार्थकत्वे साध्यवैयधिकरण्येत्याद्युत्तरलक्षणेन पौनरुक्त्यापत्तिरतो व्याचष्टे साध्यमसमानाधिकरणं यस्येति । **तत्त्वमिति परेणाऽन्वयः । वन्हिमात्रस्यैव व्यधिकरणतत्तद्धूमाऽसमानाधिकरणत्वात् वह्निमान् धूमादित्यादावव्याप्तेराह** यदधिकरणेति । **यदधिकरणमनधिकरणं यस्येति व्युत्पत्त्या यस्याऽधिकरणं साध्यसामान्याऽनधिकरणं तत्त्वमित्यर्थः । तत्तद्धूमाधिकरणन्तु न वन्हिसामान्यानधिकरणमतो नाव्याप्तिरिति भावः ।**

जननीजनकौ नत्वा ध्यायं ध्यायं गुरोः पदम् ।
सिंहव्याघ्रलक्षणयोर्व्याख्यानं क्रियते मया ॥

तत्त्वमिति परेणान्वय इति । अत्र तत्त्वमित्यस्याऽपि अग्रेतनअनधिकरणत्वमित्यनेनाऽन्वयात्तत्त्वाऽनधिकरणत्वमित्यर्थः । **यदाधिकरणमिति** । अत्र यदधिकरणत्वं यदि येन केनापि सम्बन्धेनोच्यते तदा वह्निमान् धूमादित्यादौ समवायेन धूमाधिकरणतामादायाऽव्याप्तिः, सम्बन्धसामान्येन यदि निवेश्यते कालिकसम्बन्धमादाय धूमवान् वह्नेरित्यादावतिव्याप्तिः, सम्बन्धसामान्यनिवेशप्रकारश्च "सम्बन्धत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नसंसर्गताकनिरूपकताकाधिकरणत्वावच्छेदेन साध्यानधिकरणत्वमिति" पर्वताद्यन्तभावेण साध्यानधिकरणत्वविरहादिति चेदुच्यते । हेतुतावच्छेदकसम्बन्धानवच्छिन्नत्वहेतुतावच्छेदकधर्मावच्छिन्नत्वोभयाभाववद्यन्निष्ठनिरूपकताकाधिकरणं साध्यसामान्यानधिकरणं तत्त्वमित्यर्थे दोषाभावात् । वाच्यं प्रमेयवत इत्यादौ कालिकेन साध्ये हेतौ वाऽव्याप्तिवारणाय हेतुतावच्छेदकसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्तित्वहेतुतावच्छेदकतात्वावाच्छिन्नप्रातियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वोभयाभावस्य यन्निष्ठनिरूपकतायां निवेशनीयत्वात् । यत्राऽननुगतं हेतुतावच्छेदकं तत्रापि साक्षात्परंपरयाऽनुगमकमेव हेतुतावच्छेदकामिति अत्रापि प्रमेयत्वस्य हेतुतावच्छेदकत्वान्न कोपि दोष इति ध्येयम् ।

साध्यनिष्ठाऽसामानाधिकरण्यप्रतियोगित्वम् ।

ननु घटादिस्वरूपयत्किंचिद्व्यक्त्यधिकरणं साध्यीभूतधूमाद्यनाधिकरणं तद्व्यक्तित्वाऽनधिकरणत्वं वन्ह्यादेरपि अतो धूमवान् वन्हेरित्यादावतिव्याप्तिः यद्यद्व्यक्त्यधिकरणं साध्याऽनधिकरणं तत्तद्व्यक्तित्वाऽनधिकरणत्वोक्तौ तु महागौरवमत आह साध्यनिष्ठेति । साध्यनिष्ठाऽभावप्रतियोगित्वं सद्धेतोरप्यस्तीत्यतः सामानाधिकरण्याभाव उक्तः । न च साध्यनिष्ठस्य सामानाधिकरण्याभावस्य प्रतियोगित्वं सामानाधिकरण्ये एव न तु वन्ह्यादावित्यसद्धेतावतिव्याप्तिरिति वाच्यम्। साध्यनिष्ठाऽभावप्रतियोगिवृत्ति-

---

नन्विति । यत्त्वतत्त्वेन्यादिना यत्किञ्चिदुपादाने घटजलत्वादिकमादायाऽतिप्रसङ्गः कूटनिवेशे च गौरवमिति भावः । **साध्यनिष्ठेति** । तथाच मूलस्थसाध्याऽसामानाधिकरण्यशब्दे साध्ये असामानाधिकरण्यं यस्येति व्युत्पत्त्यङ्गीकारेण भावप्रधाननिर्देशात् साध्यनिष्ठाऽसामानाधिकरण्यलाभ ।

असामानाधिकरण्यप्रतियोगित्वस्य सामानाधिकरण्ये एव सत्त्वाद् व्यभिचारिणि वह्न्यादिहेतुकेऽतिव्याप्तिमाशङ्कते **नचेति** । ननु गुणभिन्न गुणत्वसामानाधिकरण्यात् कपालभिन्न कपालवृत्तित्वादित्यादौ साध्यनिष्ठस्य सामानाधिकरण्याभावस्य प्रतियोगित्वं हेतावप्यस्तीति सद्धेतावव्याप्तिसम्भवे तत्परित्यागाऽनौचित्यम्। न च हेत्वभावाऽतिरिक्तत्वं तादृशसामानाधिकरण्याऽभावे निवेश्यैवाऽतिव्याप्तिर्वारणीयेति वाच्यम् । तथासति हेत्वभावाऽतिरिक्ताऽभावप्रतियोगित्वाऽनधिकरणत्वस्यैव सम्यक्त्वे सामानाधिकरण्यपदवैयर्थ्यापत्तेः । एतेन हेतुनिष्ठप्रतियोगिताभिन्नसामानाधिकरण्यनिष्ठप्रतियोगितानिवेशेनाऽव्याप्तिरिति निरस्तम् सत्तासाध्यकसमवायेन प्रमेयहेतावव्याप्तेश्च । हेतुनिष्ठप्रतियोगिताभिन्नप्रतियोगित्वाऽप्रसिद्धेः हेतुतावच्छेदकसम्बन्धप्रतियोगिहेतुनिष्ठप्रतियोगिताभिन्नत्वानिवेशे च कालिकविषयित्वादिसम्बन्धेन हेतुतायामव्याप्तिः, तादृशप्रतियोगित्वाऽप्रसिद्धेरिति चेन्मैवम् । हेतुतावच्छेदकावच्छिन्नत्वसामानाधिकरण्यत्वावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकाभावस्य विवक्षणान्नानुपपत्तिः । न च सामानाधिकरण्यहेतुके हेतुतावच्छेदकस्य सामानाधिकरण्यत्वस्य चैक्येनोभयाप्रसिद्धिरिति वाच्यम् । हेतुतावच्छेदकनिष्ठाऽवच्छेदकतानिरूपितत्वविशिष्टसामानाधिकरण्यत्वनिष्ठाऽवच्छेदकतानिरूपितत्वाभाववत्प्रतियोगिताया एव विवक्षणादिति । न च तथापि कपालभिन्नं कपालत्वसामानाधिकरण्यादित्यादौ तादृशविशिष्टस्य प्रसिद्धत्वेऽपि तादृशनिरूपितत्वाभाववती या हेतुनिष्ठतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिता तन्निरूपकाभावमादायाऽव्याप्तितादवस्थ्यमिति वाच्यम् । तत्प्रतियोगित्वाऽनधिकरणत्वमित्यनेन तत्प्रतियोगितावच्छेदकाऽनधिकरणत्वस्य विवक्षणेन वारणात् । परन्तु हेतुतावच्छेदकाऽनवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वे सामानाधिकरण्यदलस्य वैयर्थ्यं दुर्वारमेवेति अखण्डाभावघटकतया सार्थक्यमनुसरणीयामिति ध्येयम् ।

अतिव्याप्तिं निराकरोति **साध्यनिष्ठाऽभावेति** । तथाच साध्यीभूतधूमनिष्ठो योऽभावः अयोगोलकनिरूपितवृत्तित्वं नास्तीत्याकारकस्तत्प्रतियोगिवृत्तित्वनिरूपकाधिकरणं

यदयोगोलकं तन्निरूपितवृत्तित्वाऽनधिकरणत्वस्य वह्नौ विरहान्नातिव्याप्तिः । न च वह्नौ ह्रदमहानसोभयनिरूपितवृत्तित्वाभावसत्त्वाद् वह्निमान् धूमादित्यादावव्याप्तिरिति वाच्यम् . साध्यनिष्ठाऽभावीयाऽऽधेयत्वनिष्ठप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकता-पर्याप्त्यधिकरणनिरूपितवृत्तित्वस्य विवक्षितत्वात् । तथाचोभयनिरूपितवृत्तित्वाभावप्रतियो-गितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतापर्याप्त्यधिकरण न महानसमात्रं किन्तू-भयं धूमे तन्निरूपितवृत्तित्वानधिकरणत्वस्य सत्त्वान्नाऽव्याप्तिः ।

ननु साध्यनिष्ठाभावप्रतियोग्याधेयता साध्यतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, अन्यथा पर्वतनिरूपितसमवायसम्बन्धावच्छिन्नाऽऽधेयत्वाभावस्य वन्हौ सत्त्वाद् वह्निमान् धूमादित्या-दावव्याप्तिः, तथाच द्रव्यवान् सत्तावान् वा धूमादित्यादौ किंनिरूपितवृत्तित्वाभावः साध्ये इत्यप्रसिद्धिः । एवं पर्वतरूपान्यतरत्वहेतुके वन्हिसाध्यकेऽतिव्याप्तिश्च, साध्यनिष्ठाभावप्रति-योगिसाध्यतावच्छेदकसम्बन्धावच्छिन्नं यदाधेयत्वं तन्निरूपकपदेन रूपस्य धारणाऽसम्भवेन ह्रदादिवृत्तित्वाऽनधिकरणत्वस्य हेतौ सत्त्वात् । **अत्र केचित्** । साध्यसामान्यनिष्ठाभावीय-प्रतियोगिताश्रयनिरूपितवृत्तित्वाऽनधिकरणत्वस्य विवक्षितत्वात् । प्रतियोगिता च साध्यता-वच्छेदकसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्ना ग्राह्या । एवं च साध्यतावच्छेदकसम्ब-न्धावच्छिन्नाऽऽधेयत्वसम्बन्धावच्छिन्नप्रतियोगिताकयदभावः साध्ये तद्वृत्तित्वाऽनधिकरणत्व-मर्थः पर्यवसितः । तथाच सत्तायां समवायावच्छिन्नाऽऽधेयतया व्यधिकरणेन सम्बन्धेन सामान्याऽभावसम्भवान्न दोषः । एवं रूपस्य व्यधिकरणसम्बन्धतया तेन सम्बन्धेन रूपा-भावः सुतरां साध्य इति नातिव्याप्तिः । न च वह्न्यादौ संयोगसम्बन्धावच्छिन्नाधेयतासम्बन्धेन पर्वतह्रदोभयाभावमादाय तत्प्रतियोगितायाः पर्वते सत्त्वादव्याप्तिरिति वाच्यम् । व्यासज्य-वृत्तिधर्माऽनवच्छिन्नत्वेन प्रतियोगिताया विवक्षणीयत्वादिति ।

अत्र यद्यपि तादृशसम्बन्धस्य वृत्त्यनियामकतया तेन सम्बन्धेन प्रतियोगित्वाऽप्रसि-द्धिः, एवं तादृशप्रतियोगित्वाश्रयनिरूपितत्वाऽनधिकरणत्वपदेन हेतुतावच्छेदकसम्बन्धाव-च्छिन्नाधेयत्वसम्बन्धावच्छिन्नप्रतियोगित्वावच्छिन्नाभावो निवेश्यः, तथा चाऽत्रापि वृत्त्यनिया-मकसम्बन्धावच्छिन्नप्रतियोगित्वाऽनिवेशेन सन्दर्भविरोधश्चेति । तथापि साध्यतावच्छेदक-सम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकावच्छिन्नत्वोभयाभाववती या वृत्तिता त-दभावस्य साध्ये निवेशात् । एवं हेतुतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वाऽनधि-करणत्वस्य हेतुतावच्छेदके निवेशान्न दोष इति ।

न च समवायेन प्रमेयसाध्यके प्रमेयहेतुके जातित्वावच्छिन्नवृत्तित्वाभावस्य तादृशत्वेपि न तादृशाभावः साध्यसामान्यनिष्ठ इत्यव्याप्तिसम्भवेनैतत्कल्पे सामान्यपदप्रक्षेपेण विषम-व्याप्तहेतावव्याप्तिरुक्ता जगदीशेन तदधुना विरुध्येत अत्राप्यव्याप्तेर्जागरूकत्वादिति वाच्यम् । सामान्यपदस्य व्यापकतावाचित्वेन सामानाधिकरण्येन साध्यतावच्छेदकसम्बन्धप्रतियोगि-त्वविशिष्टसाध्यतावच्छेदकव्यापकत्वस्याऽभावे निवेशात् ।

परे तु साध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगि-ताकयदधिकरणवृत्तित्वाभावः साध्यसामान्यनिष्ठः हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयताव-

त्वनिरूपकाऽधिकरणवृत्तित्वस्य विवक्षितत्वात् । वस्तुतः असामानाधिकरण्यं सामानाधिकरण्यसम्बन्धेनाऽभाव इति परमार्थः ।

नचैवं द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति वाच्यम् । सामानाधिकरण्याभावस्य व्याप्यवृत्तित्वेन साध्येऽसत्त्वात् एतदस्वरसेनैव वा कल्पान्तरानुसरणादित्यपरे ।

नन्वेवमपि वह्निमान् धूमादित्यादिविषमव्याप्तहेतावव्याप्तिः । महानसीयवह्निनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगिभूतं यदाधेयत्वं तदव

च्छेदकताकाधिकरणत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकतादृशवृत्तितावच्छेदकत्वाधिकरणत्वाभावस्य हेतुतावच्छेदके निवेशान्नानुपपत्तिरिति ध्येयम् ।

अत्रेदं चिन्त्यते । आधेयभेदेन आधेयताभेदे वह्निमान् धूमादित्यादौ पर्वतनिरूपितधूमनिष्ठाधेयत्वाभावः साध्यसामान्येऽस्तीति पर्वतनिरूपितवृत्तित्वाऽनधिकरणत्वस्य हेतौ विरहादव्याप्तिरिति । न च यन्निरूपितवृत्तित्वसामान्याभावः साध्यसामान्ये तद्वृत्तित्वाऽनधिकरणत्वस्य हेतौ विवक्षणेन पर्वतनिरूपितवृत्तित्वसामान्याभावो न साध्ये किन्तु हृदनिरूपितवृत्तित्वाभावो इति नाव्याप्तिरिति वाच्यम् । एवमपि धूमवान् वह्नेरित्यादौ हृदनिरूपितवृत्तित्वाभावो धूमे तन्निरूपितवृत्तित्वाऽनधिकरणत्वस्य हेतौ सत्त्वादतिव्याप्तिरतः यत्तत्पदप्रक्षेपेण तत्तन्निरूपितवृत्तित्वाभावकूटवत्त्वानिवेशे पूर्वव्याख्यायां गौरवस्योन्मत्तप्रलपितत्वापत्तिः, अत्रापि कल्पे यत्तत्पदप्रवेशस्याऽवश्यकत्वादिति चेन्न । समुदितस्य सामान्यभेदस्य निवेशात् यत्तत्पदानामनुगतत्वाभावात् । निवेशप्रकारश्च साध्यतावच्छेदकतावच्छिन्नाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्ववत्तद्व्यक्तिनिरूपितवृत्तित्वाधिकरणत्वं नास्तीति प्रतीतिसिद्धाभावीयोभयावृत्तिधर्मनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपितानिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपिता सती वृत्तितात्वनिष्ठावच्छेदकतानिरूपिता या साध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिता तन्निरूपकाभावीयप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतासमानाधिकरणाऽवच्छेदकतावृत्तित्वनिष्ठावच्छेदकतानिरूपिताऽधिकरणनिष्ठावच्छेदकतानिरूपितप्रतियोगितानिरूपकभेदो हेतौ व्याप्तिरिति ध्येयम् ।

वस्तुत इति । साध्यनिष्ठो यः सामानाधिकरण्यसम्बन्धावच्छिन्नयन्निष्ठप्रतियोगिताकोऽभावस्तदधिकरणवृत्तित्वाऽनधिकरणत्वमर्थः ।

साध्यनिष्ठो यद्रूपावच्छिन्नसामानाधिकरण्याऽभावस्तद्रूपवत्त्वमिति यावत् ।

विषमव्याप्तहेतावव्याप्तिरिति । अथाऽऽर्द्रेन्धनप्रभववह्निमान् धूमादित्यादिसमव्याप्तहेतावपि महानसीयवह्न्यात्मकाऽऽर्द्रेन्धनप्रभववह्नौ वर्त्तमानो यः पर्वतनिरूपितवृत्तित्वाभावस्तत्प्रतियोगित्वाऽनधिकरणत्वस्य हेतावसत्त्वादव्याप्तिसम्भवे विषमव्याप्तपर्यन्तमफलम् । न च समव्याप्तत्वावच्छेदेन नाव्याप्तिः, शब्दवान् गगनत्वादित्यादौ साध्ये गगनवृत्तित्वाभावाऽसत्त्वादिति वाच्यम् । विषमव्याप्तत्वावच्छेदेनाऽपि अव्याप्त्यसम्भवस्य तौल्यात्, सत्तावान् द्रव्यत्वादित्यत्र साध्ये द्रव्यवृत्तित्वाऽभावाऽसत्त्वादिति चेद् । अत्र केचित् । साध्यसामानाधिकरण्यसम्बन्धावच्छिन्नाभाव इत्यादि वस्तुतस्तु कल्पाभिप्रायकोयं ग्रन्थः, तथा च

साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणवृत्तित्वमिति यावत् तदनधिकरणत्वमर्थः। साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वाऽनिरूपकत्वात्तद्वृत्तौ नातिप्रसङ्गः

रूपके पर्वतादौ धूमादेर्वर्त्तमानत्वात्, साध्यसामान्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वोक्तौ च महागौरवमत आह साध्यनिष्ठाधेयत्वेति। **अत्राधेयत्वं साध्यतावच्छेदकसम्बन्धेन ग्राह्यम्, तेन रूपवान् महाकालत्वादित्यादौ सम्बन्धसामान्येन रूपनिष्ठाधेयत्वाऽनिरूपके गगनादौ**

समव्याप्तहेतुके साध्ये तादृशसम्बन्धावच्छिन्नधूमाभावस्य किमप्यवच्छेदेनाऽसत्त्वात्, विषम स्थले च अयोगोलकावच्छेदेन तादृशसम्बन्धावच्छिन्नधूमाभावस्य साध्ये अयोगोलकीयवह्नौ सत्त्वादतस्तत्परित्याग इत्याहुः। तन्न। वह्निनिष्ठसामानाधिकरण्यसम्बन्धेन तत्तद्धूमाभावस्य प्रतियोगित्वाधिकरणत्वस्य तत्तद्धूमे सत्त्वाद् यथा विषमव्याप्तहेतौ तथा समव्याप्तहेतावपि अव्याप्तेस्तौल्यात्। यदि च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकत्वाऽनधिकरणत्वस्य हेतुतावच्छेदके निवेशात् समव्याप्तहेतावव्याप्तेर्वारणं विषमस्थले तु अयोगोलकीयवन्हौ धूमसामान्याभावस्य तादृशसम्बन्धावच्छिन्नप्रतियोगिताकस्य प्रतियोगितावच्छेदकत्वाधिकरणत्वाद् भवत्यव्याप्तिरिति विभाव्यते, तदा धूमवान् वह्नेरित्यादौ वह्नित्वे तादृशप्रतियोगितावच्छेदकत्वाऽनधिकरणत्वसत्त्वाद् वन्हिसामान्याभावस्य साध्येऽसत्त्वादतिव्याप्तिरिति।

वस्तुतो विषमव्याप्तत्वं व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वमिति शब्दानां समानाधिकरणत्वात्, वह्नीनां व्यधिकरणत्वादार्द्रेन्धनप्रभववन्हिसाध्यकोपि विषमव्याप्त एवेति नासङ्गतिः।

केचित्तु स्वाऽसमानाधिकरणसाध्यकहेतोरेव विषमव्याप्तपदेन विवक्षणीयत्वादार्द्रेन्धनप्रभववह्निसाध्यकोऽपि तथा भवतीति नासङ्गतिरिति प्राहुः।

महागौरवमिति। अत्र प्रमेयसाध्यकस्थलेऽव्याप्तिमुपेक्ष्य गौरवदानमनुचितमिति तु नाशङ्कनीयम्, सामान्यपदस्य व्यापकतावाचित्वे साध्यतावच्छेदकसम्बन्धप्रतियोगित्वविशिष्टसाध्यतावच्छेदकव्यापकत्वस्याभावे निवेशात्।

दीधितौ। तदनधिकरणत्वं–तादृशवृत्तित्वाऽनधिकरणत्वम्, अर्थः–समुदितार्थः। वह्निमान् धूमादित्यादौ साध्यीभूतवह्निनिष्ठाधेयत्वानिरूपकाधिकरणं ह्रदादिस्तन्निरूपितवृत्तित्वाऽनधिकरणत्वं धूमे इति लक्षणसमन्वयः।

ननु वह्निमान् धूमादित्यादौ महानसादेः पर्वतीयवह्निनिष्ठाधेयत्वाऽनिरूपकत्वेन तद्वृत्तित्वाऽनधिकरणत्वस्य धूमे विरहादव्याप्तिरिति चेन्न। इह अनिरूपकत्वप्रतियोगिनिरूपकत्वं साध्यनिष्ठाऽधेयतात्वावच्छेदेन विवक्षणीयम्, तच्च आधेयतात्वव्यापकत्वम्, तथाच साध्यनिष्ठाधेयतात्वव्यापकनिरूपकत्वावच्छिन्नप्रतियोगिताकभेदवन्निरूपितवृत्तित्वानधिकरणत्वमिति पर्यवसितम्। अत्र व्याप्यत्वं स्वाश्रयाश्रयत्वसम्बन्धेन, व्यापकत्वन्तु स्वनिरूपिताधेयतात्वसम्बन्धेन, तेनाऽऽधेयतात्वानिरूपकत्वयोर्वैयधिकरण्येऽपि न क्षतिः। न च धूमवान् वह्नेरित्यादौ द्रव्यत्वावच्छिन्नाधेयतासाधारणसाध्यनिष्ठाधेयतात्वव्यापकनिरूपकत्वावच्छिन्नभे-

हेतोरवृत्तित्वेऽपि नातिव्याप्तिः । तद्वृत्तौ साध्यवद्भिन्नवृत्तौ ।
दस्य गुणादावेव सत्त्वादतिव्याप्तिरिति वाच्यम् । साध्याऽऽधेयतानिरूपकत्वस्य च निरू-पकत्वे निवेशात्, तादृशाऽऽधेयतात्वव्यापकत्वं च साध्यानुयोगिकस्वरूपसम्बन्धत्वव्यापकत्वस-म्बन्धावच्छिन्नप्रतियोगिताकतादृशाधेयतात्वावच्छिन्नस्वरूपसम्बन्धेनाऽवृत्तित्वम् इदं चावच्छेदकभेदेन आधेयतानिरूपकत्वे भेद इति मतेन । अवच्छेदकभेदेन भेदे तु सा-ध्यनिष्ठाधेयतानिरूपकं यद्यत्तत्तद्भेदकूटमेव निवेश्यमिति ।

हेतोरवृत्तित्वेपीति । गगनानिरूपितवृत्तित्वाऽनधिकरणत्वेऽपीत्यर्थः ।

नातिव्याप्तिरिति । महाकालत्वहेतौ समवायसम्बन्धावच्छिन्नरूपनिष्ठाधेयत्वानिरू-पकमहाकालनिरूपितवृत्तित्वाऽनधिकरणत्वसत्त्वादिति भावः ।

यद्यपि कालिकसम्बन्धावच्छिन्नरूपनिष्ठाधेयतानिरूपकाधिकरणत्वस्य महाकाले सत्त्वात् सम्बन्धसामान्येन रूपनिष्ठाधेयत्वाऽनिरूपके गगनादौ निरूपितवृत्तित्वाऽनधिकरणत्वस्य कालत्वहेतावपि सत्त्वात्तत्रैवाऽतिव्याप्तिसम्भवे महाकालत्वपर्यन्तानुधावनं व्यर्थं, तथापि आधे-यतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाऽनिवेशे यादृशहेतुकव्याप्तिचरितार्थेऽतिव्याप्ति-स्तादृशो हेतुर्महाकालत्वमेव, तथाहि जन्यरूपवान् कालत्वादित्यादौ जन्यभावनाधिकरणी-भूतमहाप्रलये कालिकसम्बन्धावच्छिन्ना या जन्यरूपादिनिष्ठाधेयता तदनिरूपकाधिकरणत्वस्य सत्त्वात् तादृशप्रलयनिरूपितवृत्तित्वाधिकरणत्वस्य कालत्वे सत्त्वान्नातिव्याप्तिरतो महापदम् । तथाच महाकाले वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन सत्त्वात् महाकाले किञ्चिन्निष्ठाधेयताया अनिरूपकाधिकरणत्वं नास्तीति ।

नं च तथापि कालिकेन वाच्यत्वज्ञेयत्वसाध्यहेतौ सम्बन्धसामान्येन स्वरूपसम्बन्धेन वा वाच्यत्वनिष्ठाधेयत्वाऽनिरूपकाऽधिकरणाऽप्रसिद्धयाऽव्याप्तिसम्भवेऽतिव्याप्तिदानमनुचित-मिति, एवं महाकालभिन्नं घटत्वादित्यादौ कालिकसम्बन्धावच्छिन्नसाध्यनिष्ठाधेयतानिरूपक-त्वस्य महाकाले स्वरूपसम्बन्धेन चाऽन्यत्र सत्त्वात् साध्यनिष्ठाधेयत्वानिरूपकाऽधिकरणा-ऽप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् । यत्किञ्चित्सम्बन्धेन साध्यनिष्ठाधेयता वाच्या इति नाव्या-प्तिः । निवेशस्तु अवच्छिन्नत्वसम्बन्धविशिष्टसाध्यनिष्ठाधेयताविशिष्टत्वमेव हेतौ व्याप्तिः । वै० स्वनिरूपकत्व-स्वनिरूपकाधिकरणत्वैतदुभयसम्बन्धावच्छिन्नस्वानिष्ठावच्छेदकताकप्रतियोगि-ताकभेदवन्निरूपितवृत्तित्वाधिकरणत्वसम्बन्धावच्छिन्नस्वानिष्ठावच्छेदताकप्रतियोगिताकभेदवत्त्व-सम्बन्धेनेति ।

निष्कर्षे च तादृशाधेयत्वाभावव्यापकत्वस्य अभावे निवेशात् । साध्यनिष्ठाधेयत्वाभावश्च स्वनिरूपकत्व-स्वनिरूपकाधिकरणतावत्त्वोभयसम्बन्धावच्छिन्नप्रतियोगिताको बोध्य इति न काप्यनुपपत्तिः । न च भेदत्वावच्छिन्ननिरूपकताकाधिकरणताभिन्नं पटत्वादित्यादावव्याप्तिः, तथाहि—भेदत्वावच्छिन्नाधिकरणताभेदरूपसाध्यनिष्ठाधेयत्वाभावाऽप्रसिद्धेः, भेदाधिकरण-तायां स्वनिरूपकत्वस्याऽधिकरणताविधया सत्त्वात्, अधिकरणविधया स्वनिरूपकवाच्यत्वा-धिकरणतावत्त्वस्य च सत्त्वाद् वाच्यत्वस्य केवलान्वयितया तादृशाधिकरणतावृत्तित्वादिति वाच्यम् । भेदत्वावच्छिन्नाधिकरणतात्वावच्छिन्नप्रतियोगिताकभेदरूपसाध्यनिष्ठाधेयत्वाभाव-

ननु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यं हेतुतावच्छेदक-संबन्धेन वाच्यम्, अन्यथा वन्हिनिष्ठाऽऽधेयत्वाऽनिरूपके स्वावयवे समवा-यादिना धूमादेः सत्त्वादव्याप्त्यापत्तेः, तथाच सत्तावान् द्रव्यत्वाद् धूमाद्वा इत्यादावव्याप्तिः, साध्यनिष्ठाऽऽधेयत्वानिरूपके जात्यादौ समवायेन संयो-

---

स्य पटत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाधिकरणतायां सत्त्वात्। यद्यपि तत्र स्वनिरू-पकवाच्यत्त्वाधिकरणतावत्त्वं वर्त्तते परन्तु केनापि प्रकारेण स्वनिरूपकत्वविरहादतः उभयस-म्बन्धावीच्छिन्नप्रतियोगिताकसाध्यनिष्ठाधेयत्वाभाववत्पटभेदाधिकरणतानिरूपितवृत्तित्वाऽनधि-करणत्वस्य पटत्वे सत्त्वान्नाव्याप्तिरिति। न च तथापि भेदनिष्ठनिरूपकताकाधिकरणताभिन्न भेदनिष्ठानिरूपकताकाधिकरणतात्वात्, तादृशाधिकरणत्वपटान्यतरत्वाद्वा इत्यादावतिव्याप्तिः, तथाहि—तादृशभेदरूपसाध्यनिष्ठाधेयत्वाभाववत्त्वं न हेत्वधिकरणीभूताधिकरणतायां अधिक-रणताविषया स्वनिरूपकत्वस्य अधिकरणविधया स्वनिरूपकवाच्यत्वाधिकरणत्वस्य च द्वयोः सत्त्वात्—तादृशं च पटाधिकरणत्वमेव तद्वृत्तित्वाऽनधिकरणत्वस्य तादृशाधिकरणतात्वे स-त्त्वादिति वाच्यम्। तथासति स्वनिरूपकत्वस्वनिष्ठनिरूप्यतानिरूपितविलक्षणानिरूपकतावद-धिकरणतावत्त्वोभयसम्बन्धावच्छिन्नप्रतियोगिताकाऽऽधेयत्वाभावस्य विवक्षितत्वान्नायं दोषः। तथाहि-स्वनिरूपकत्वसत्त्वेपि स्वनिष्ठनिरूपकतानिरूपितविलक्षणनिरूपकतावत्साध्याधिकरणता-वत्त्वविरहात्, वैलक्षण्यं चाऽधिकरणनिष्ठनिरूपकताभिन्नत्वमेव, अधिकरणतात्वावच्छिन्नत्व-मिति केचित्, तथाच वाच्यत्वाधिकरणत्वे च साध्यनिष्ठाऽऽधेयत्वनिरूप्यतानिरूपतविलक्षण-निरूपकतावत्त्वविरहान्नातिव्याप्तिः।

न च तथापि स्वनिष्ठनिरूप्यतानिरूपितं विलक्षणं यदधिकरणनिष्ठं निरूपकत्वं तत्सम्ब-न्धावच्छिन्नप्रतियोगिताकस्य, अथवा स्वनिष्ठनिरूप्यतानिरूपित विलक्षणं यदधिकरणत्वनिष्ठं निरूपकत्वं तदधिकरणतावत्त्वसम्बन्धावच्छिन्नप्रतियोगिताकस्य वा अधेयत्वाभावस्यैव निर्व-चनसामञ्जस्ये कृतमुभयसम्बन्धावच्छिन्नतादृशाऽऽधेयत्वाभावनिवेशनेनेति वाच्यम्। भवतु तादृश एव निवेशः किं नश्छिन्नं एतादृशार्थलाभार्थमेव तथोक्तत्वादिति।

वस्तुतः एतादृशविलक्षणनिरूपकत्वसम्बन्धावच्छिन्नाभावनिवेशेऽपि वह्निमान् धूमादि-त्यादौ साध्यनिष्ठाऽऽधेयत्वाभाववद् यद् धूमाधिकरणत्वं तन्निरूपितवृत्तित्वाऽनधिकरणत्वस्य हेतावसत्त्वादव्याप्तिः, तत्रापि विलक्षणनिरूपकतानिरूपितवृत्तित्वस्य विवक्षणे वैलक्षण्यं दुर्व-चमिति चेन्न। साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधेयताविशिष्टान्यं यदधिकरणं तद्वृत्तिवृत्तित्वानधिकरणत्वस्य विवक्षितत्वात्।

निष्कर्षे च तादृशाधेयताविशिष्टान्यत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वस्य विवक्षितत्वात्। सर्वत्र विशिष्टान्यत्वघटकवै० स्वनिरूपकत्वस्वविशिष्टनिरूपकताकाधिकरण-तावत्त्वोभयसम्बन्धेन, निरूपकतायां स्ववैशिष्ट्यं च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वावच्छे-दकावच्छिन्नत्वोभयसम्बन्धेन। वृत्तितायां तद्वृत्तित्वमपि एतादृशसम्बन्धेनैवेति विभावनीयम्।

नान्वति। अत्र यत्किञ्चित्सम्बन्धेन वृत्तित्वोक्तौ चातिव्याप्तिर्द्रष्टव्या। **अप्रसिद्धेरिति**। न च हेतुतावच्छेदकस्वरूपान्यतरसम्बन्धेन वृत्तित्वं विवक्षणीयमिति वाच्यम्। तथासति

साध्यनिष्ठाऽऽधेयत्वानिरूपकाधिकरणत्वव्यापकाभाववत्प्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः, तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः ।

गेन वा वृत्त्यप्रसिद्धेः, किञ्च द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः, द्रव्यत्वनिष्ठाधेयत्वाऽनिरूपकगुणादिवृत्तित्वस्य विशिष्टसत्तायां सत्त्वादित्यत आह साध्यनिष्ठेति ।

धूमनिष्ठाऽऽधेयत्वाऽनिरूपके जलादौ वह्न्यधिकरणत्वाभावसत्त्वाद् व्यभिचारिणि अतिव्याप्तिरतो व्यापकेति । व्यापकत्वन्तु प्रतियोगिवैयधिकरण्याऽघटितमेव ग्राह्यम्, तेन संयोगेन वह्न्यधिकरणत्वस्याऽव्याप्यवृत्तितया तदभावस्य तप्तायःपिण्डवृत्तित्वेऽपि नातिव्याप्तिः । वह्न्यधिकरणत्वगगनाभयत्वाद्यवच्छिन्नाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादतिव्याप्तिरतः सामान्यपदम् ।

तथाच हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसा-

---

धूमवद्वृत्तित्वविशिष्टस्वरूपसम्बन्धेन वह्न्यधिकरणत्वहेतावव्याप्तेः, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणेऽयःपिण्डे वह्न्यधिकरणत्वस्य स्वरूपसम्बन्धेन वृत्तेः अन्यतरत्वेन सम्बन्धत्वाऽनभ्युपगमाच्च । हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतासम्बन्धेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाभावस्य हेतुतावच्छेदकसम्बन्धान्यहेतुप्रतियोगिकसम्बन्धान्यसम्बन्धावच्छिन्नतादृशवृत्तित्वाभावस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयत्वस्वरूपसम्बन्धेन तादृशवृत्तित्वाभावस्य वा निवेशे त्वाह **किञ्चेति** ।

अत्रापि रूपवान् महाकालत्वादित्यत्रातिव्याप्तिवारणाय साध्यनिष्ठाधेयतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेशनीयम् । एवमत्राधिकरणत्वमविवक्षितम्, तादृशाधेयत्वानिरूपकत्वव्यापकतैवाऽभावे निवेशनीयेति ध्येयम् । अभावे तादृशाऽऽधेयत्वानिरूपकाधिकरणतासामानाधिकरण्यमात्रनिवेशे दोषमाह **अतिव्याप्तिरिति** । एवं च व्यापकत्वनिवेशे वह्न्यधिकरणत्वाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वसमानाधिकरणत्वेऽपि तादृशाऽधिकरणत्वव्यापकत्वविरहान्नातिव्याप्तिरिति भावः ।

अथात्र स्वरूपसम्बन्धेन साध्यनिष्ठाधेयत्वानिरूपकत्ववद्यदधिकरणत्वं तद्व्यापकत्वं, सामानाधिकरण्यसम्बन्धेन तादृशानिरूपकत्वविशिष्टं यदधिकरणत्वं तद्व्यापकत्व वा विवक्षितम् । नाद्यः, वह्निमान् धूमादित्यादावव्याप्तेः साध्याधिकरणताभिन्नाधिकरणतामात्रस्यैव साध्यनिष्ठाधेयत्वानिरूपकत्वात्, तादृशानिरूपकाधिकरणत्वव्यापकत्वस्य हेत्वधिकरणत्वाभावेऽप्रसिद्धेः । नान्त्यः, वह्निमान् वह्न्यधिकरणतात्वाद् वह्न्यधिकरणत्वपर्वतान्यतरत्वाद्वेत्यादावतिव्याप्तेः, वह्न्यधिकरणतात्मकपर्वतस्य साध्यनिष्ठाधेयतानिरूपकत्ववत्त्वात् इति चेन्न । साध्यनिष्ठाधेयत्वाभावप्रतियोग्यधिकरणतासामान्यकत्वस्य विवक्षितत्वात् । तादृशाधेयत्वाभावश्च स्वनिरूपकत्व-स्वनिरूपकाधिकरणत्वोभयसम्बन्धावच्छिन्नप्रतियोगिताक इति । शेषं पूर्ववत् ।

सामान्यपदघटितलक्षणस्य फलितार्थमाह **तथाचेति** । हेतुतावच्छेदकसम्बन्धावच्छि-

मान्याभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वं तद्धर्मवत्त्वमर्थः। तेन वह्निनिष्ठाधेयत्वानिरूपकाधिकरणजलादौ कालिकसम्बन्धेन धूमाधिकरणतायाः सत्त्वेऽपि नाव्याप्तिः, न वा वह्न्यधिकरणत्वाभावस्यापि प्रमेयत्वादिना धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेऽप्यतिव्याप्तिः।

न च हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नाऽभावत्वेन तादृशाधिकरणताव्यापकत्वमित्यस्यैव सम्यक्त्वेऽधिकरणत्वाभावपर्यन्ताऽनुप्रवेशो व्यर्थ इति वाच्यम्। वृत्त्यनियामकसम्बन्धेन हेतुतायामव्याप्तिप्रसङ्गात्, तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाऽप्रसिद्धेः। अस्माकं तु तादृशसम्बन्धेन यद्धेतुसम्बन्धित्वं तस्य स्वरूपसम्बन्धावच्छिन्नाभावप्रतियोगित्वमा-

---

न्नयद्धर्मावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्व साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकं तादृशाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोगितावच्छेदक वा हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणतात्वं तद्धर्मवत्त्वं फलितम्। (तादृशानिरूपकाधिकरणवृत्त्यभावप्रतियोगितायां स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाऽनवच्छेदकीभूताधिकरणतानिरूपकतावच्छेदकं स्वावच्छिन्नाधिकरणताकत्वसम्बन्धेनाऽनवच्छेदकं यद्धेतुतावच्छेदक तद्वत्त्वमर्थ इति न विशिष्टपरामर्शाऽनुपपत्तिः)

हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशस्य फलमाह **तेनेति** । **नाव्याप्तिरिति**। संयोगसम्बन्धावच्छिन्नायाः धूमाधिकरणतायाः 'धूमाधिकरणत्वाभावाभावात्मिकायाः' जलादावसत्त्वादिति। अत्र यद्धर्मावच्छिन्नाधिकरणत्वनिष्ठं प्रतियोगित्वं स्वरूपसम्बन्धावच्छिन्नं ग्राह्यम्, अथोक्ताऽव्याप्तिवारणं न स्यादिति ध्येयम्। एवं यदधिकरणतामात्रानिवेशे द्रव्यविशिष्टसत्त्वादित्यादावव्याप्तिः। द्रव्यत्वनिष्ठाधेयत्वानिरूपके गुणादौ विशिष्टसत्ताधिकरणतासत्त्वात्। तादृशाधिकरणतासामान्याभावत्वेन व्यापकतानिवेशस्य फलमाह **नवेति**। व्यापकत्वं तु तद्वन्निष्ठाऽत्यन्ताभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्वम्, न तु तद्वन्निष्ठात्यन्ताभावाऽप्रतियोगित्वं, सर्वस्यैव तथाविधद्वित्वावच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः, एवं च तादृशप्रतियोगिताऽनवच्छेदकीभूतप्रमेयत्वस्य सर्वत्र सत्त्वेन तेन रूपेण वह्न्यधिकरणत्वाभावस्यापि व्यापकत्वाक्षततया भवत्यतिव्याप्तिरित्यर्थः। न च तद्वन्निष्ठाऽन्योन्याभावप्रतियोगिताऽनवच्छेदकत्वमेव व्यापकत्वमिति वाच्यम्। एतद्वृक्षत्ववान् कपिसंयोगादित्यत्रातिव्याप्तेः। हेत्वभावस्य केवलान्वयित्वादिति। व्यापकतावच्छेदकत्वन्तु तद्वन्निष्ठात्यन्ताभावप्रतियोगिताऽनवच्छेदकत्वं अनवच्छेदकत्वं चावच्छेदकतापर्याप्त्यनधिकरणत्वं, तेनाऽभावत्वादिकमादाय नोक्तदोषतादवस्थ्यम्।

तादृशाधिकरणत्वव्यापकत्वं हेतुतावच्छेदकसम्बन्धेन हेत्वभावे एव निवेश्यं लाघवात्, न तु हेत्वधिकरणत्वाभावे गौरवादित्याशंकते **नचेति**। तथाच अधिकरणत्वानिवेशे वृत्त्यनियामकस्वामित्वसम्बन्धेन हेतुतास्थले चैत्रः तद्धनादित्यादौ व्यधिकरणसम्बन्धेन हेतुतास्थले च क्रमेणाऽव्याप्त्यतिव्याप्ती स्यातामिति भावः।

अथ हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नाभावत्वेन व्यापकत्वानिवेशे व्यापकताघटकाभावे तद्वन्निष्ठत्वं हेतुतावच्छेदकसम्बन्धेन निवेश्यम्, अन्यथा वह्निमान् धूमादित्यादौ सा-

दाय लक्षणसमन्वयः । किञ्चाऽधिकरणत्वाऽप्रवेशे वह्न्यादेः साध्यत्वे सं-योगादिसम्बन्धेन रूपादिहेतावतिव्याप्त्यापत्तिः संयोगेन रूपाभावस्य केव-लान्वयितया वन्हिनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादिति भावः

त्वनिष्ठाधेयत्वानिरूपके ह्रदादौ धूमावयवे च धूमाभावस्य कालिकत्वेनाप्यसत्त्वादिति स-मवायेन च वृत्तेस्तत्प्रतियोगितावच्छेदकमेव धूमत्वमित्यव्याप्त्यापत्तेः, तथा च सत्ता-वान् द्रव्यत्वादित्यादौ साध्यनिष्ठाधेयत्वानिरूपकसामान्यादौ हेतुतावच्छेदकीभूतसमवायसम्ब-न्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तेर्जागरूकत्वात्तत्याग किं बीजमिति चेत् ।

अत्राहुः । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वमत्र साध्यनिष्ठाधेयत्वानिरूप-काधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्त्यधिकरणतानिरूपकताऽनवच्छेदकं यत्तद्धर्मत्वं यद्धर्मा-वच्छिन्नाभावत्वे निवेशनीयम् । अत्र यत्किञ्चिद्व्यक्तिनिष्ठाधिकरणतानिरूपितनिरूपकता हेतु-मत्ताग्रहविरोधिताघटकसम्बन्धावच्छिन्ना ग्राह्या, तथा च वह्निमान् धूमादित्यादौ धूमा-वयवनिरूपिता या हेतुमत्ताग्रहविरोधिताघटकीभूतस्वरूपसम्बन्धावच्छिन्ना निरूपकता तदवच्छेदकत्वस्यैव संयोगसम्बन्धावच्छिन्नधूमाभावत्वे सत्त्वात् नाव्याप्तिः एवं सत्तावान् द्रव्यत्वादित्यादौ सामान्यादिनिष्ठाधिकरणतानिरूपितनिरूपकतावच्छेदकत्वस्य हेत्वभावत्वे सत्त्वान्नाव्याप्तिः । यत्किञ्चित्त्वनिवेशाद् धूमवान् वह्नेरित्यादौ ह्रदादिकमुपादाय न दोष इति ।

अत्रेदं चिन्त्यते । द्रव्यगुणान्यतरत्ववान् कर्मत्वाभावादित्यत्र व्यभिचारिण्यव्या-प्तिः तादृशयत्किञ्चित्पदेन जात्यादिकं धर्तुं न शक्यते समवायात्मकहेतुमत्ताग्रहविरोधिताघ-टकसम्बन्धेन तन्निरूपितनिरूपकत्वाऽप्रसिद्धेः । यदि च कर्म ध्रियते, तदा तादृशसम्बन्धाव-च्छिन्नतन्निष्ठाधिकरणतानिरूपितनिरूपकतावच्छेदकत्वस्यैव हेत्वभावत्वे सत्त्वान्निरुक्तव्यापक-तावच्छेदकत्वस्याऽक्षतेरिति । एतेन तादृशाधिकरणताव्यापकत्वं न तद्वन्निष्ठाभावप्रतियो-गितावच्छेदकत्वं, यत्किञ्चित्त्वस्य दुर्वचत्वात्, किन्तु तादृशाधिकरणताविशिष्टान्यत्वं हेत्वभा-वत्वे विवक्षणीयम्, वै० स्वनिष्ठावच्छेदकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । स्वनिष्ठावच्छेदकता च निरवच्छिन्नाऽऽधेयत्वसम्बन्धावच्छिन्ना, आधेयता च हेतुमत्ताग्रहविरोधिताघटकसम्बन्धा-वच्छिन्ना ग्राह्येति, एवं च न प्रागुक्तदोषाणामवकाश इति निरस्तम् । द्रव्यत्वगुणत्वान्यतरवान् द्रव्यगुणान्यतरत्ववान् वा कर्मत्वाभावादित्यादावतिव्याप्तिः, तादृशनिरूपकताधिकरणपदेन जात्यादेर्धारणाऽसम्भवात् तन्निष्ठाधिकरणतानिरूपितहेतुमत्ताग्रहविरोधिताघटकसमवायस-म्बन्धावच्छिन्नाधेयत्वाऽप्रसिद्धेः, किन्तु तादृशाधिकरणपदेन कर्मणः धारणं तद्विशिष्टान्यत्वस्य हेत्वभावत्वे सत्त्वादिति । न च प्रतियोगिवैयधिकरण्यघटितव्यापकता निवेश्या, व्यापकताघ-टकाभावे तद्वन्निष्ठत्व न सम्बन्धविशेषेण वैफल्यादिति वाच्यम् । अव्याप्यवृत्तिहेतुरूपव्यभि-चारिणि अतिप्रसङ्गात् ।

यदि च साध्यनिष्ठाधेयत्वानिरूपकाधिकरणीभूतयद्व्यक्तिनिष्ठाधिकरणतासामान्ये हेतुताव-च्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वावच्छिन्नत्वहेतुमत्ताग्रहविरोधिताघटकसम्बन्धाव-च्छिन्नत्वोभयाभावस्तद्धर्मभिन्नत्वमेव व्याप्तिः, तथाच धूमवान् वह्नेरित्यादौ साध्यनिष्ठाधेय-त्वानिरूपकाऽयोगोलकनिष्ठाधिकरणतासामान्ये संयोगसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नत्व-

साध्यवैयधिकरण्यानधिकरणत्वं वा ।

साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वम् ।

साध्यवद्भिन्नेति । **अत्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरण-**स्वरूपसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वात् यत्पदेन वह्नित्वस्य धारणान्नातिव्याप्तिः । वह्निमान् धूमादित्यादौ च साध्यनिष्ठाधेयत्वानिरूपकह्रदादिनिष्ठाधिकरणतासामान्ये संयोगसम्बन्धावच्छिन्नधूमत्वाभावत्वावच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वयोः सत्त्वेन यद्धर्मपदेन धूमत्वस्य धारणासम्भवान्नाऽव्याप्तिः । अधिकरणत्व च निरवच्छिन्नं ग्राह्यं, तेन धूमवान् वह्नेरित्यादौ संयोगेन वह्नेरव्याप्यवृत्तित्वादयोगोलकनिष्ठाधिकरणतायां वह्न्यभावत्वावच्छिन्नाधिकरणतायां तादृशोभयाभावान्नातिव्याप्तिरित्युच्यते, तदाऽस्य सामान्यपदघटितत्वेन यद्धर्मावच्छिन्नाधिकरणत्वाभावत्वे साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वापेक्षया महागौरवाद् व्याप्तित्वं न सम्भवतीति ।

वस्तुतः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणनिष्ठाधिकरणतानिरूपितनिरूपकतावच्छेदकतावच्छेदकीभूतानुयोगितानिरूपितप्रतियोगिताऽनवच्छेदकयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वं पर्यवसितम् । निरूपकता च हेतुवताच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वहेतुनिष्ठत्वोभयाभाववती ग्राह्या सम्बन्धान्तरावच्छिन्नधर्मान्तरावच्छिन्नवृत्तितामादायैव सत्तावान् जातेरित्यादौ लक्षणसमन्वयसम्भवात् ।

यद्यपि सत्तावान् समवायेन प्रमेयादित्यादौ साध्यनिष्ठाधेयत्वानिरूपकजात्यादिनिष्ठाधिकरणतानिरूपितनिरुक्तोभयाभाववन्निरूपकत्वाऽप्रसिद्धिस्तथापि हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नाभावाभावत्वावच्छिन्नत्वोभयाभावस्यैव विवक्षितत्वात् सामान्यादिनिष्ठाधिकरणतानिरूपितवाच्यत्वादिनिष्ठनिरूपकताया एव प्रसिद्धत्वान्नानुपपत्तिः । द्रव्यं विशिष्टसत्त्वादित्यादौ गुणादिनिष्ठाधिकरणतानिरूपितनिरूपकतावच्छेदकीभूता न विशिष्टसत्ताभावाभावत्वरूपानुयोगितेति तत्रापि लक्षणगमनादतो वह्निमान् रूपादित्यादावतिव्याप्तिपर्यन्तानुधावनमिति विभावनीयम् ।

केचित्तु अत्र निरूपकत्वं न सम्बन्धविशेषेण निवेश्यम्, संयोगसम्बन्धावच्छिन्नधूमाभावाभावत्वस्य संयोगातिरिक्तसम्बन्धावच्छिन्ननिरूपकताऽनवच्छेदकत्वात् वह्निमान् धूमादित्यादावव्याप्तिविरहात्, एकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाभावत्वस्याऽन्यसम्बन्धावच्छिन्ननिरूपकतावच्छेदकत्वाऽस्वीकारात्, एवं च साध्यनिष्ठाधेयत्वानिरूपकाधिकरणनिष्ठाधिकरणतानिरूपकतावच्छेदकीभूतानुयोगितानिरूपितप्रतियोगितानवच्छेदकं यद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वमेव विवक्षणीयम् । अत एव कपालस्य समवायेन घटत्वावच्छिन्नवत्त्वेऽपि संयोगसम्बन्धावच्छिन्नघटाभावाभावत्वावच्छिन्नवत्वाप्रसिद्ध्यैव तादृप्येण प्रमात्वाऽसम्भवात्, समवायसम्बन्धेनैव तादृशघटाभावाभावत्वावच्छिन्नाधिकरणतायाः पारमार्थिकत्वादिति केवलान्वयिग्रन्थे जगदीशेन समाहितम् ।

विभिन्नमधिकरणं यस्य तत् व्यधिकरणं तस्य भावस्तत्त्वम् । साध्याद्वैयधिकरण्यं साध्यवैयधिकरण्यम् । साध्यपदस्य साध्याधिकरणे लक्षणा, तथाच साध्यानधिकरणवृत्तित्वलाभः तदेवोक्तं दीधितौ **साध्यवद्भिन्नाधिकरणकत्वमिति** ।

तदुभयमपि साध्यानधिकरणाऽनधिकरणत्वम् ।

चरमाधिकरणत्वांशस्याऽनतिप्रयोजनकतया तदपहाय द्वयमेकोक्त्याऽ-

तासामान्यकत्वमिति निष्कर्षो बोध्यः, तेन सत्तावान् द्रव्यत्वादित्यादौ नाऽव्याप्तिः ।

ननु प्रागुक्तस्याऽर्थस्य शब्दान्तरेणाऽभिधानमनुवादः स चात्राऽसम्भवी, साध्यं यदधिकरणानधिकरणं तत्त्वाऽनधिकरणत्वस्य साध्यवद्वृत्तित्वानधिकरणत्वस्य च प्रागुक्तस्य साध्याऽनधिकरणानधिकरणत्वशब्देनाऽबोधनादत आह—चरमेति**। तत्त्वाधिकरणत्वाभावे तत्त्वाभावस्याऽप्रवेशाद्वैयर्थ्यमसम्भवीत्यत उक्तम्** अनतिप्रयोजनकतयेति **। तथाच प्रकृतलक्षणवाक्यस्य साध्यं यदधिकरणाऽनधिकरणं तत्त्वाभावे साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावे एव च तात्पर्यात् प्रागभिप्रेतार्थस्य शब्दान्तरेणाभिधानमेवानुवादः स चात्र सम्भवत्येवेति भावः ।**

अबोधनादिति । मूलोक्तलक्षणयोरधिकरणताद्वयघटितत्वात् अनुवादे चाऽधिकरणताद्वयमात्रस्य निवेशादित्यर्थः । **चरमेतीति ।** इदमुपलक्षणम् निष्कृष्टोक्तलक्षणद्वये प्रथमाधिकरणत्वांशस्यापि वैयर्थ्यं द्रष्टव्यम् साध्यनिष्ठाधेयत्वानिरूपकत्वसाध्यवद्भिन्नत्वयोरेवाऽदुष्टत्वात्, साध्यनिष्ठाधेयत्वानिरूपकं यद्रूपाद्यधिकरणत्वं हेत्वभावस्य पर्वतादौ तदव्यापकत्वेन वह्निमान् धूमादित्यादौ असम्भवापादकत्वाच्च ।

तात्पर्यादिति । नन्वसंगतमेतत् अधिकरणताया आनिवेशे प्रतियोगिवैयधिकरण्याऽघटितव्यापकत्वस्य दुर्वचत्वात्, तथाहि—तदनिवेशे व्यापकताघटकाभावे साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वं न सम्बन्धसामान्येन, वन्हिमान् धूमादित्यादौ धूमाद्यभावाभावस्य धूमादेः कालिकादिसम्बन्धेन तादृशानिरूपकाधिकरणवृत्तित्वेनाऽव्याप्तेः। न च व्यापकतायां प्रतियोगिवैयधिकरण्यनिवेशेन तद्विशिष्टधूमाभावाभावस्य ह्रदादावसत्त्वान्न दोष इति वाच्यम् । व्यापकत्व च प्रतियोगिवैयधिकरण्याघटितमिति पूर्वग्रन्थविरोधात् । नाप्यभावीयविशेषणतया धूमवान् वन्हेरित्यादौ वह्न्यभावाभावस्य तेन सम्बन्धेनाऽवृत्तितयाऽतिव्याप्तेः। भावाऽभावसाधारणदैशिकविशेषणतायां मानाभावात्। नापि हेतुतावच्छेदकसम्बन्धेन, सत्तावान् द्रव्यत्वादित्यादाव्याप्तेः, समवायेन तादृशाऽनिरूपकाधिकरणवृत्तित्वाऽप्रसिद्धेः। एवं तद्दलाऽनुक्तौ यद्धर्मावच्छिन्नाभावः तादृशाधिकरणत्वव्यापकस्तद्धर्मवत्त्वमिति पर्यवसितम्। अत्र यद्धर्मावच्छिन्नाभावीयप्रतियोगिता हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, अन्यथा धूमवान् वह्नेरित्यादौ स्वरूपसम्बन्धावच्छिन्नवह्न्यभावस्य तादृशाधिकरणत्वव्यापकत्वादतिव्याप्त्यापत्तेः, तथाच वृत्त्यनियामकसम्बन्धेन हेतुताया तत्सम्बन्धावच्छिन्नप्रतियोगित्वाऽप्रसिद्ध्याऽव्याप्तिः, एव वन्हिमान् संयोगेन रूपादित्यादौ तादृशसम्बन्धावच्छिन्नरूपाद्यभावस्य केवलान्वयितया व्यापकत्वाक्षतेरित्यातिव्याप्तिश्च। चरमाधिकरणत्वप्रवेशे तु अधिकरणतास्थले सम्बन्धितानिवेशेन तस्याः स्वरूपसम्बन्धावच्छिन्न-

प्रतियोगिताकाभावस्य व्यापकताघटकाभावे स्वरूपसम्बन्धेनैव तद्वद्वृत्तित्वस्य प्रवेश्यतया न दुर्वचत्वमिति चेन्न । हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवत्त्वं तादृशाधिकरणत्वव्यापकतावच्छेदकमित्यस्यैव लक्षणत्वात् इति चरमाधिकरणत्वाऽनिवेशेऽपि वृत्त्यनियामकसम्बन्धावच्छिन्नाऽवच्छेदकताकभेदस्वीकारान्नाऽव्याप्तिः । संयोगेन रूपादिहेतुके संयोगस्य व्यधिकरणतया तत्सम्बन्धावच्छिन्नावच्छेदताकभेदाऽस्वीकारान्नातिव्याप्तिरिति ।

केचित्तु एतद्ग्रन्थस्य मूले तदुभयमित्यादिनाऽनुवादयोग्ययथाश्रुतसाध्याऽसामानाधिकरण्यवैयधिकरण्याऽनधिकरणत्वरूपलक्षणद्वयपरतयाऽदोषात् निष्कृष्टोक्तलक्षणद्वयस्य कथमप्यनुवादाऽसंभवात् अत एव चरमेत्युक्तम्, निष्कृष्टलक्षणे तूक्तरीत्याऽऽद्याऽधिकरणत्वस्याप्यनतिप्रयोजनकत्वात् इत्याहुः ।

वस्तुतस्तु निष्कृष्टोक्तलक्षणद्वयपरत्वेऽपि न दोषः, अधिकरणतामनिवेश्याभावीयविशेषणतया वृत्तित्वघटितव्यापकत्वस्य सुवचत्वात् । न वोक्तदोषः, घटो नास्ति घटाभावो नास्तीत्यादिप्रतीत्या विशेषणताया भावाऽभावसाधारणत्वात् । नचैवं तया भूतलवृत्तिर्घटाभाव इति प्रतीतिवत्तया भूतलवृत्तिर्घट इत्यपि प्रतीतिः स्यादिति वाच्यम् । तेन सम्बन्धेन भूतलादिवृत्तितावच्छेदकत्वस्य घटाभावाभावत्वादावेवाङ्गीकारेण घटत्वादौ तदभावात्, तेन सम्बन्धेन भूतलवृत्तिघटाभावाभाव इति प्रतीतिस्त्विष्टैव । न च वन्हिमान् आकाशादित्यादावतिव्याप्तिवारणायाऽधिकरणता निवेशनीयेति वाच्यम् । तत्र पक्षधर्मताविरहादेवाऽसद्धेतुत्वोपपत्तौ व्याप्तिसत्त्वे इष्टापत्तेः ।

यद्वा अधिकरणताया अनिवेशे हेत्वभावत्वे व्यापकतावच्छेदकत्वं न तद्वद्वृत्त्यत्यन्ताभावप्रतियोगिताऽनवच्छेदकत्वं किन्तु स्वावच्छिन्नाभाववद्वृत्तितत्कत्वम्, तच्च सुवचमेव, स्वावच्छिन्नाभाववत्त्वं च हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नप्रतियोगिताकहेत्वभाववत्ताग्रहविरोधितानियामकसम्बन्धेन वाच्यम्, तेन धूमाभावत्वावच्छिन्नाभावात्मकधूमादेः कालिकसम्बन्धेनाऽधिकरणे ह्रदादौ तादृशानिरूपकाधिकरणत्वसत्त्वेऽपि वन्हिमान् धूमादित्यादौ नाव्याप्तिः । वृत्तिता च विशेषणतया वाच्या, तेन निरुक्तसंयोगादिसम्बन्धेन धूमादिमति महानसादौ कालिकादिसम्बन्धेन तादृशाऽनिरूपकाधिकरणत्वसत्त्वेऽपि न तत्राऽव्याप्तिः । स्वावच्छिन्नाभाववत्त्वं च स्वावच्छिन्नाभावत्वविशिष्टवत्त्वं, तेन द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः, गुणे विशिष्टसत्ताभावाभावात्मकसत्तावत्त्वेऽपि विशिष्टसत्ताभावत्वविशिष्टवत्त्वाभावात् । एवं सत्तावान् द्रव्यत्वादित्यादौ न दोषः, तादृशेन समवायेन द्रव्यत्ववति विशेषणतया वृत्तित्वप्रसिद्धेः । स्वावच्छिन्नाभाववत्त्वं हेतुतावच्छेदकसम्बन्धेन वाच्यमिति तु न युक्तम्, एतद्रूपप्रकारकप्रमाविशेष्यत्वजातित्वप्रकारकप्रमाविशेष्यत्वान्यतरवान् तादात्म्येन घटादित्यादावतिव्याप्तिः, अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत्वेन तत्र तादात्म्येन घटभेदत्वावच्छिन्नाभावात्मकघटत्ववति घटत्वे तादृशानिरूपकाधिकरणत्वस्यासत्त्वात्, तादृशसम्बन्धविवक्षणे तत्र समवायस्यापि तादृशत्वेन तेन तद्वति व्यभिचारनिरूपकाधिकरणे तादृशानिरूपकाधिकरणत्वसत्त्वेनाऽदोषात् ।

नूद्य दूषयति **तदुभयमपीति** । साध्येत्यादेः साध्यं यदधिकरणानधि-

साध्यमित्यादि । **साध्यानधिकरणेत्यादौ मध्यवर्त्तिनञो व्यत्यासेन चर-माधिकरणत्वांशेन सहान्वयादेव तल्लाभ इत्याशयः ।**

यद्वा प्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताग्रहविरोधिज्ञानविषयताकसम्बन्धेन वृत्तित्वघ-टितनिर्दुष्टव्यापकत्वमधिकरणतामनिवेश्य सुवचम् ।

अपरे तु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वसमानाधिकरणाभावीयविशेषणताविशेष-वच्छिन्नप्रतियोगितासामान्ये यद्यद्धर्मावच्छिन्नाभावसमानाधिकरणाभावीयतत्सम्बन्धावच्छिन्न-प्रतियोगितावच्छेदकावच्छिन्नत्व तद्धर्मवत्त्वं विवक्षितम्, तथा च नाऽधिकरणत्वांशसार्थ-क्यमित्याहुः ।

साध्यानधिकरणेत्यादिमूलस्य निष्कृष्टलक्षणार्थाऽनुवादकत्वाऽसम्भवेन तदनुवादयोग्यय-थाश्रुतलक्षणार्थद्वयस्याऽनुवादं स्फुटयितुं साध्यानधिकरणेत्यादि मूलं धृत्वैव व्याचष्टे इत्यर्थ **साध्येत्यादेः** लक्षणद्वयस्य क्रमेणेति शेषः । तत्त्वाभाव इत्यन्तेन प्रथमलक्षणार्थकथनम् ।

ननु साध्याऽनधिकरणाऽनधिकरणत्वमिति मूलेन साध्यं यदधिकरणानधिकरणं तत्त्वा-भाव इत्येतादृशार्थाऽबोधनाद्ग्रन्थग्रन्थाऽसङ्गतिरिति चेन्न । आदौ अधिकरणमनधिकरण यस्येति बहुव्रीहिः । व्यासार्थो यन्निरूपिताधिकरणत्वावच्छिन्नप्रतियोगिताकभेदवदधि-करणम् । समासाच्च अधिकरणनिष्ठभेदप्रतियोगितावच्छेदकनिरूपकताकाधेयतावत् साध्य इति बोधः । साध्य अधिकरणानधिकरण यस्य तत्साध्याधिकरणानधिकरणमिति पुन-र्बहुव्रीहिः । विग्रहात् यदधिकरणनिष्ठभेदप्रतियोगितावच्छेदकनिरूपकताकाधेयतावत्साध्यमिति, समासाच्च साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नप्रतियोगिताकभेदवदधिकरणवृत्तिः, कं इति बोधः । ततो भावार्थकत्वप्रत्ययेन तत्त्वलाभः । ततः साध्याधिकरणानधिकरणत्वस्याभावः, न साध्याधि-करणाऽनधिकरणत्वमिति वा नञ्तत्पुरुषः । नञः साध्यपदोत्तरं निपातः तथा च साध्यपदोत्तर-निविष्टनञा तदभावः प्रत्याय्यते तथाचानुपदमेव वक्ष्यति मध्यवर्त्तिनञो व्यत्यासेनेति । तथाच साध्यानधिकरणानधिकरणत्वमित्यस्य प्रथमलक्षणार्थबोधकत्वं स्पष्टमेव ।

केचित्तु साध्यमित्यादि साध्यमनधिकरणाधिकरणं यस्य तत्साध्यानाधिकरणं, तस्य भावः साध्यानधिकरणाधिकरणत्वमित्येव पाठः । अत्रादौ अधिकरणमधिकरणं यस्येत्यधि-करणाधिकरणमिति बहुव्रीहिः । विग्रहात् यन्निष्ठवृत्तित्वनिरूपकमधिकरणमिति बोधः । समासाच्चाऽधिकरणनिरूपितवृत्तित्वाश्रय इति बोधः । बहुव्रीहौ विग्रहजन्यबोधीयविशेष्य विशेषणभाववैपरीत्येन बोधजनकत्वात् चित्रा गौर्यस्येति विग्रहवाच्यात् यत्पदार्थसम्बन्धित्वेन चित्रगोः, चित्रगुरित्यतः चित्रगोसाम्बन्धित्वेन यत्पदार्थबोधात् । एवमत्रापि, तथाचाऽधिकरणा-धिकरणमित्यनेनाऽधिकरणाऽवृत्तीति लब्धं, ततो न अधिकरणाधिकरणमिति अनधिकरणाधि-करणमिति नञ्समासः अधिकरणवृत्तिभिन्नमिति बोधः, तथाचाऽनधिकरणाधिकरणमित्यने-नाऽधिकरणाऽवृत्तीति लब्धं, ततः साध्यमनधिकरणाधिकरणं यस्य तत्साध्यानाधिकरणमिति बहुव्रीहिः । विग्रहात् साध्यं यदधिकरणाऽवृत्तीति बोधः, समासात्साध्यनिष्ठभेदप्रतियोगिता-

वच्छेदकवृत्तित्वनिरूपकाधिकरणवृत्तित्वरूपसाध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वलाभ इति सिद्धम्। यद्वा आदौ नाधिकरणाधिकरणमिति बहुव्रीहिः। विग्रहात् यदाधेयत्वानिरूपकम धिकरणमिति बोधः, समासाच्चाऽधिकरणनिष्ठभेदप्रतियोगितावच्छेदकानिरूपकताकाधेयतावदिति बोधः, तथाचाऽनधिकरणाधिकरणमित्यनेनाऽधिकरणनिष्ठभेदप्रतियोगितावच्छेदकनिरूपकताकाधेयतावदिति लब्धं, तत. साध्यमनधिकरणाधिकरण यस्य तत्साध्यानधिकरणाधिकरणमिति बहुव्रीहिः। विग्रहात् यदधिकरणनिष्ठभेदप्रतियोगितावच्छेदकानिरूपकताकाधेयतावत्साध्यमिति, समासाच्च साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवदधिकरणकमिति बोधः। त्वप्रत्ययेन तत्त्वलाभः तदभावश्चरमनञर्थ इति प्रथमलक्षणवाक्यार्थ इत्याहुः। तच्चिन्त्यम्। मध्यवर्त्तिनञो व्यत्यासेनेत्यग्रिमग्रन्थानुरोधादुपेक्षणीय इति।

ननु साध्याऽधिकरणानधिकरणत्वपदेन नञ्समासे सत्येव तत्त्वाभावो नञा प्रत्याययितुं शक्यते, तथाच साध्यपदोत्तरं नञो निपातोऽसम्भवी असाध्याधिकरणाऽनधिकरणत्वमिति प्रयोगापत्तिः, अत्र यदि अत्यन्ताभावार्थकेन नञा उत्तरपदार्थाऽभावे विद्यमानं यदव्ययं तत्समस्यते इत्यर्थकेन "अव्ययं विभक्ती"इत्यादिसूत्रेण सिद्धोऽव्ययीभावः। यदि वा सुबन्तेन नञ् समस्यते इत्यर्थकेन "नञिति" सूत्रेण सिद्धस्तत्पुरुषो नाऽश्रीयते उभयथापि नञ एव पूर्वनिपातस्यैव अव्ययोमति नञिति च प्रथमान्तपदप्रतिपाद्यत्वेन, समासशास्त्रे प्रथमान्तशब्दप्रतिपाद्यमुपसर्जनसञ्ज्ञं स्यादित्यर्थकेन "प्रथमानिर्द्दिष्टं समास उपसर्जन" मिति सूत्रेणोपसर्जनसंज्ञाविधानात् "उपसर्जन पूर्वमिति" पाणिनिनाऽभिधानेन समस्यमानपूर्वपदनिपतितस्यैव नञः साध्यत्वादन्यथा अचित्रगुरित्यादौ चित्रादिपदोत्तरमपि नञ्प्रयोगापत्तेरिति चेन्न। ससम्बन्धिकार्थबोधकोत्तरपदघटितसमुदायेन समं नञ्समासस्थले नञो मध्यनिवेशस्यापि साधुत्वसम्पादकत्वात् तथाचाऽगत्या पृषोदरादिगणपाठकल्पनया निरुक्तप्रयोगाणां साधुत्वमुपपादनीयमिति भावः।

यस्तु नञ्व्यत्यासेनैव विवक्षिताऽन्वयबोधोपपत्तौ नञो मध्यनिवेशेऽपि न क्षतिरित्याह। तत्तुच्छम्। सर्वत्र नञ्व्यत्यासेनोपपत्तौ नञो मध्यनिवेशस्य क्वापि दोषत्वं न स्यादिति ध्येयम्।

अत्रेदं बोध्यम्। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपः प्रथमलक्षणस्य यथाश्रुतनिष्कृष्टार्थोपि साध्यानधिकरणानधिकरणत्वशब्देन प्रतिपाद्यते, तथाहि—आधेयतानिरूपकार्थकचरमाधिकरणपदघटितेनाऽधिकरणानधिकरणपदेन अधिकरणमाधेयत्वानिरूपकं यस्य तदधिकरणानधिकरणमिति व्युत्पत्त्या अधिकरणनिष्ठभेदप्रतियोगिताकानिरूपकताकाऽधिकरणवृत्तिलाभः त्वप्रत्ययेन तत्त्वलाभः तदभावः साध्यपदोत्तरनञेति।

इदमुपलक्षणम्। साध्यनिष्ठाऽसामानाधिकरण्यप्रतियोगित्वरूपस्याप्यर्थस्य लाभः सम्भवति, तथाहि—साध्येऽधिकरणाऽनधिकरणत्वं यदधिकरणवृत्तित्वाभावो यस्य तत्साध्याधिकरणाऽनधिकरणत्वं भावप्रधानतया तत्त्वलाभः तदभावश्च साध्यपदोत्तरनञा बोध्यते इति साध्यनिष्ठासामानाधिकरण्यसम्बन्धित्वाभावलाभः, सम्बन्धश्च प्रतियोगित्वमेवेति।

एवं साध्यनिष्ठाधेयत्वानिरूपकत्वस्य साध्यवद्भिन्नत्वस्य वा व्यापकीभूतो योऽभावस्त-

तच्च तत्र यत्किंचित्साध्याऽनधिकरणाधिकरणे धूमे चाऽप्रसिद्धम् ।

करणं तत्त्वाभावः, साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः ।

तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणाऽप्रसिद्ध्या नाना-व्यक्तिसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वाऽनिरूपकाधिकरणत्वं साधना-

---

केवलान्वयिनीति । **अव्याप्तिरिति परेणान्वयः । अव्याप्तेर्हेतुमाह** साध्यनि-ष्ठेति । **नानाव्यक्तिसाध्यके चेति मूलोक्तं धूमहेतुमभिप्रेत्य, तेन शब्दवान् गगनत्वादित्यादौ नानाव्यक्तिसाध्यकाऽव्याप्तिविरहेऽपि न क्षतिः । न्यूनतां**

त्प्रतियोग्यधिकरणतासामान्यकत्वरूपोऽप्यर्थः साध्यानधिकरणानधिकरणत्वशब्दात्प्रतिपादयितुं शक्यते, तथाहि–साध्यानधिकरण अधिकरणं यस्येति व्युत्पत्तिः, तत्र साध्यानधिकरण-मित्यस्य साध्यनिष्ठाधेयत्वानिरूपक साध्यवद्भिन्न वाऽर्थ, अनधिकरण यस्येत्यत्र अधि-करणपदमन्यपदार्थहेत्वाधिकरणे लाक्षणिकम्, यस्येति पदं तात्पर्यग्राहकम्, भाव प्रधाननिर्देशाच्च अनधिकरणमित्यनेन हेत्वधिकरणत्वाभावलाभः, इत्थं चोद्देश्यताव्याप-कत्वमसति बाधके विधेये विधेयससर्गे वा भासते इति व्युत्पत्तिबलाद् हेत्वाधिकरणत्वाभाव रूपे विधेये साध्यानधिकरणत्वार्थसाध्यनिष्ठाधेयत्वानिरूपकत्वरूपोद्देश्यतावच्छेदकव्याप-कत्वलाभ इति ।

द्वितीयलक्षणार्थमाह–**दीधितौ साध्यस्येति** । अत्रादौ साध्यस्याऽनधिकरणं सा-ध्यानधिकरणमिति तत्पुरुषः । साध्यवद्भिन्नमिति यावत्, ततः साध्याऽनधिकरणमधिकरण यस्येति बहुव्रीहिः, विग्रहाद् यन्निष्ठवृत्तितानिरूपकं साध्याऽनधिकरणमिति, समासाच्च सा-ध्यवद्भिन्नवृत्तीति बोधः, ततो भावार्थकत्वप्रत्ययात् साध्यवद्भिन्नवृत्तित्वलाभः ततो नञ्-समासः नञः साध्यानधिकरणपदोत्तरं निपातः इति साध्यानधिकरणानधिकरणत्वस्य द्विती-यलक्षणार्थबोधकत्वमिति ।

मूले तच्चेति । साध्यानधिकरणानधिकरणत्वं चेत्यर्थः । दीधितौ, **अप्रसिद्धेति** । अत्र साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशाभिप्रायेणाऽप्रसिद्धिरभिहिता, यत्किञ्चिन्नि-रूपकभेदनिवेशे तु नानाव्यक्तिसाध्यके चेत्युक्तम् । **न क्षतिरिति** । तथाच नानाव्यक्तिसा-ध्यकेहेतुत्वसामानाधिकरण्येनाऽव्याप्तिरिति भावः । नानात्वं साध्ये साध्याधिकरणे चोभयत्र वि-वक्षितमिति **गुरुचरणाः** । चकारेण केवलान्वयिसाध्यकपरिग्रहः । केचित्तु द्रव्यत्वा-द्यनुगतैकव्यक्तिसाध्यकस्यापि चकारेण परिग्रहः । एकनिष्ठनिरूपकत्वव्यक्तेरन्यत्राभावादव्या-प्तेरिति वदन्ति । वस्तुतस्तु आधेयतानिरूपकत्वस्याधेयभेदेन आधेयत्वस्यैव आधे-यभेदेन भिन्नतया एकव्यक्तिसाध्यके तदाधेयतानिरूपकत्वस्याप्यैक्यात्सेदमुक्तम् । अत एव नानाव्यक्तिक इत्युक्तं अग्रे च नानाधिकरणक इति । अन्यथाऽत्रापि नाना-धिकरणक इत्येव ब्रूयात् । सर्वत्र द्वित्वाद्यवच्छिन्नप्रतियोगिताकनिरूपकत्वाभावमादा-

विकरणव्यक्तयन्तरस्येयव्याप्तिः । क्वचिद्व्यभिचारिणि अतिप्रसङ्गश्चाद्ये ।

द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितस्तदा केवलान्वयिनि, यदि च यत्किञ्चित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्वत्राऽव्याप्तिः ।

परिहरति क्वचिदिति । **विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरित्यर्थः । विशिष्टधर्मावच्छिन्नाधिकरणत्वस्यैव तदवच्छिन्नाधेयत्वस्याऽनतिरिक्तत्वा-दिति भावः ।** यत्किञ्चिदिति । **साध्यवत्तद्व्यक्तित्वावच्छिन्नेत्यर्थः ।** नानाधिक-रणसाध्यके इति । **यत्र साध्यतावच्छेदकावच्छिन्नाधिकरणं नाना तत्रेत्यर्थः, तेन कस्याश्चिदपि वह्निव्यक्तेर्नानाधिकणवृत्तित्वविरहेऽपि न वह्निसाध्य-कधूमाद्यसङ्ग्रहः । सर्वत्र केवलान्वयिनि तद्भिन्ने च ।**

याऽसम्भवसम्भवेऽपि व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वस्याऽभावविशेषणत्वे तदसम्भ-वादव्याप्तिरित्युक्तम् । **दीधितौ ।** आद्ये-आद्यलक्षणे इत्यर्थः । यद्यपि आधेयतायां साध्यता-वच्छेदकावच्छिन्नत्वानिवेशे नातिव्याप्तिः । अधिकरणतानिरूपकतावच्छेदकस्यैव आधेयताव-च्छेदकतेति नियमेन गुणनिष्ठाधिकरणतानिरूपकताऽनवच्छेदकविशिष्टसत्तात्वादेर्गुणानिरूपिता-धेयतावनच्छेदकत्वात्तथापि आधारत्वाऽऽधेयत्वयोस्तुल्यवित्तिवेद्यत्वाभावात्तादृशनियमे माना-भावः । गुणे गुणकर्मान्यत्वविशिष्टसत्तेति प्रतीतिबलात् विशिष्टसत्तात्वावच्छिन्नाधेयत्वस्या-ऽनतिरिक्तत्वं, गुणकर्मान्यत्वविशिष्टसत्तावान् गुण इत्यप्रत्ययाद्विशिष्टाधिकरणताया एवातिरि-क्तत्वमित्याशयादिति भावः ।

नच तथापि साध्यतावच्छेदकं यन्निष्ठाधिकरणतानिरूपकतानवच्छेदकं तत्त्वव्यापकत्वो-क्तौ नातिव्याप्तिरिति वाच्यम् । यत्त्वतत्त्वाननुगमेन व्याप्तेर्विशिष्टैकार्थरूपत्वाभावात् । अधि-कमग्रे वक्ष्यामः ।

दीधितौ साध्यवद्भिन्ने साध्यवद्भिन्नत्वावच्छेदेन । अवच्छेदकत्वं व्यापकत्वम् । अनेनो-क्तनिष्कर्ष एवोक्तः, यथाश्रुतेऽति प्रसङ्गात् , तथाच साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदो यदि साध्यवैयधिकरण्यघटकतया विवक्षित इति समुदायार्थः । केवलान्वयिनीतिपदं सावधारणम् , साध्यवत्तद्व्यक्तित्वावच्छिन्नेत्यर्थ इति, तेन नाऽसम्भवे इति शेषः ।

अथ सर्वत्रेति पदं किमर्थं, न च तदनुक्तौ केवलान्वयिभिन्ने एव नानाधिकरणकसा-ध्यकेऽव्याप्तिरिति भ्रमः स्यादिति वाच्यम् , एवंसति नानाव्यक्तिके इति पूर्वग्रन्थेऽपि सर्व-त्रेति वक्तव्यं स्यात् इति चेन्न । नानाव्यक्तिसाध्यके चेति चकारेण केवलान्वयिनोपि समुच्च-येन न्यूनताविरहात् । नन्वत्रापि सर्वत्रेतिस्थाने चकारं पठित्वा केवलान्वयिसाध्यकसमुच्चयः कुतो न कृतः वैरूप्यस्याऽन्याय्यत्वादिति चेन्न । उपायस्य उपायान्तरादूषकत्वात् । अथ नाना-व्यक्तिकेत्यस्य स्थाने नानाधिकरणकेति कथं नोक्तमिति चेन्न । पूर्वलक्षणे साध्याधिकरणे नानात्वं नाव्याप्तिप्रयोजकं, किन्तु साध्ये नानात्वमित्याशयेन पूर्वं नानाव्यक्तिसाध्यके इत्यु-क्तमिति संक्षेपः ।

केचित्तु साध्याऽसामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थः ।

तेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनाऽवृत्तावपि न क्षतिः ।

सार्वभौममतमुत्थापयति केचित्त्विति । **हेत्वधिकरणे इति सप्तम्यर्थोऽवच्छेद्यत्वं, तच्च साध्यवद्वृत्तित्वाऽभावेऽन्वितम्** । तेनैवेति । **हेतुतावच्छेदकसम्बन्धेनैवेत्यर्थः** । **तस्य च साध्यवद्वृत्तित्वेन सहाऽन्वयः** ।

साध्यवत्त्वमपि येन सम्बन्धेन येन रूपेण साध्यता तत्सम्बन्धेन तद्रूपावच्छिन्नवत्त्वं बोध्यम्, तेन समवायेन वह्नेः साध्यत्वे धूमे, विशिष्टसत्त्वसाध्यके सत्तादौ नातिव्याप्तिः । तदधिकरणभिन्नत्वमिति । **तद्दत्यन्ता-**

साध्यासामानाधिकरण्यानधिकरणत्वमित्यत्र साध्यासामानाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणे द्रव्यं सत्त्वादित्यादावतिव्याप्तिः स्यादतः स्वय प्रथमलक्षणमुक्तरीत्या व्याख्यातवान् । **सार्वभौमास्तु** सामानाधिकरण्यस्याऽव्याप्यवृत्तितया सत्तादौ द्रव्यत्वसामानाधिकरण्याभावस्यापि गुणावच्छेदेन सत्त्वान्नातिव्याप्तिरिति वदन्ति, तन्मतं दूषयितुमुपन्यस्यति **केचित्त्वितीति** । वन्हिमान् धूमादित्यादौ स्वावयवावच्छेदेन धूमे वह्निसामानाधिकरण्याभावसत्त्वादव्याप्तिरतो हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे इत्युक्तम् । हेतुतावच्छेदकसम्बन्धेन यत्किञ्चित्पदार्थवदित्युक्तौ संयोगेन शैवालादिमद्ध्रदावच्छेदेन तृणादिमत्स्वावयवावच्छेदेन च धूमे वह्निसामानाधिकरण्याभावसत्त्वादुक्ताऽव्याप्तिरतो दवस्थ्यमतो हेतुपदम् । अत्र नञ्द्वयाऽप्रवेशे धूमवान् वन्हेरित्यादौ हेत्वधिकरणपर्वतावच्छेदेन साध्यवद्वृत्तित्वस्य हेतौ सत्त्वादतिव्याप्तिः । नञ्द्वयप्रवेशस्तु व्यापकत्वपर्यायः, तथा च हेत्वधिकरणावच्छेद्यत्वस्य अभावांशेऽन्वयात् हेत्वधिकरणविशिष्टान्यत्वं हेतौ व्याप्तिः पर्यवसिता । वै० स्वावच्छेद्यसाध्यवद्वृत्तित्वाभावाधिकरणत्वसम्बन्धेन उक्तस्थले च अयोगोलकात्मकाधिकरणविशिष्टत्वादेवाऽतिव्याप्तिविरहादिति ध्येयम् । **अभावेऽन्वितमिति** । यद्यप्येवमपि अधिकरणभेदेनाऽभावभेदाभावमते पर्वताद्यवच्छिन्नो यो रूपादिवृत्तिर्वह्निमत्संयुक्तत्वाभावः स एव स्वावयवावच्छेदेन धूमादावपि वर्त्तत इति तादृशाभावाऽनधिकरणत्वं दुर्घटं, तथापि हेत्वधिकरणावच्छिन्नविशेषणतया साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणं तदन्यत्वे तात्पर्यादिति । केचित्तु तादृशहेत्वधिकरणाऽवच्छिन्नत्वविशिष्टाभावाऽनधिकरणत्वस्यैव विवक्षणीयतया न दोषः । रूपे पर्वते न वह्निमत्संयुक्तत्वमिति वत् धूमे पर्वते न वह्निमत्संयुक्तत्वमिति प्रतीत्यनुदयात् । अभावाधिकरणतायामेव वाऽधिकरणविशेषावच्छिन्नत्वं निवेशनीयम्, यथा रूपनिष्ठाया तादृशाभावाधिकरणतायां धूमावयवो नावच्छेदकस्तथा धूमनिष्ठतदधिकरणतायां पर्वतो नाऽवच्छेदक इति प्राहुः ।

हेतुतावच्छेदकसम्बन्धेनैवेति । तृतीयार्थोऽवच्छिन्नत्वम् । **तस्य चेति** । तृतीयान्तार्थहेतुतावच्छेदकसम्बन्धावच्छिन्नत्वस्य चेत्यर्थः ।

साध्यतावच्छेदकसम्बन्धेन साध्यवत्तानिवेशस्य फलमाह—**तेनेति** । साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशेनेत्यर्थः, तथाच समवायेन वह्नौ साध्ये संयोगेन धूमे हेतौ धूमे सं-

भाववत्त्वोक्तौ द्रव्यं सत्त्वादित्यादावतिव्याप्तिः, गुणावच्छेद्यद्रव्यवृत्तित्वाभावस्यैव द्रव्यावच्छेदेन सत्तायामभावसत्त्वादतो भिन्नत्वपर्यन्तानुसरणम्। भेदस्तु नाऽव्याप्यवृत्तिः, तदव्याप्यवृत्तित्वे तु तादृशवृत्तित्वाभाववती यावती व्यक्तिस्तत्तद्भेदकूटवत्त्वं वक्तव्यमिति भावः।

हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे इत्यस्य फलमाह स्वावयवे संयोगेनेति। अवृत्तावपि न क्षतिरित्यन्वयः। तथाच तादृशसम्बन्धेन हेत्वधिकरणत्वाऽप्रवेशे स्वावयवावच्छेदेन धूमस्य वह्निमत्संयुक्तत्वाभाववत्त्वाद् वह्निमान् धूमादित्यादावव्याप्तिः स्यान्न पुनरसम्भवः, इदं वाच्यं ज्ञेयत्वादित्यादिकेवलान्वयिनि लक्षणसम्भवादिति भावः।

अत्र चोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वं रूपवद्वृत्तित्वं नेति प्रतीत्या घटाद्यवच्छेदेन पृथिवीत्वादौ रूपवद्वृत्तित्वाभावाभ्युपगमे हेत्वधिकरणनिष्ठमवच्छेदकत्वं निरवच्छिन्नं ग्राह्यम्, तेन रूपवान् पृथिवीत्वादित्यादौ नाऽव्याप्तिः, तत्र घटनिष्ठाऽवच्छेदकत्वस्योत्पत्तिकालेनाऽवच्छेदादिति ध्येयम्।

योगेन धूमाधिकरणपर्वतावच्छेदेन संयोगेन वह्निमद्वृत्तित्वसामान्याभावाऽसत्त्वेऽपि समवायेन वह्निमद्वृत्तित्वसामान्यभावसत्त्वान्नातिव्याप्तिरिति भावः। अतिव्याप्तिश्च सम्बन्धसामान्येन साध्यवत्तानिवेशाभिप्रायेण बोध्या। न च तथापि वह्न्यवयवे धूमान्तरसंयोगसम्भवात् साध्यतावच्छेदकसमवायसम्बन्धेन साध्यवन्निरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावस्य धूमान्तरेऽसत्त्वादतिव्याप्तिरिति वाच्यम्। यत्र वह्न्यवयवे न धूमसंयोगस्तत्र तादृशाभावस्य पर्वतावच्छेदेन सौलभ्यात्, अन्यथा व्यभिचारित्वाऽनुपपत्तेरिति ध्येयम्। यत्किञ्चित्सम्बन्धेन साध्यवत्त्वनिवेशे वह्निमान् धूमादित्यादौ समवायात्मकयत्किञ्चित्सम्बन्धेन यः साध्यवान् तद्वृत्तित्वाभावस्य स्वाधिकरणावच्छेदेन धूमे सत्त्वादव्याप्तिर्बोध्या।

लक्षणसम्भवादितीति। केनापि सम्बन्धेन ज्ञेयत्वाधिकरणाऽवच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य ज्ञेयत्वहेतावसत्त्वेनेति शेषः। यद्यपि हेतुतावच्छेदकसम्बन्धानिवेशेऽपि धूमादौ उत्पत्तिकालावच्छेदेन वह्न्यधिकरणनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावसत्त्वादव्याप्तितादवस्थ्यम्। न च तादृशवृत्तित्वाभावे उत्पत्तिकालनिष्ठाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि हेत्वधिकरणनिष्ठाऽवच्छेदकतानिरूपकत्वविरहान्न दोष इति वाच्यम्। पर्वतादेरपि कालोपाधितया तादृशाभावावच्छेदकत्वात्। तथापि इदानीं धूमे न वह्निमत्संयुक्तत्वमिति प्रत्ययात् पर्वते धूमे न वह्निमत्संयुक्तत्वमित्यप्रत्ययाच्च इदानीमिति प्रतीतिनियामककालनिष्ठावच्छेदकतातः इहेति प्रतीतिनियामकदेशनिष्ठाऽवच्छेदकताया भेदो वाच्यः, अत्र धूमनिष्ठसाध्यसामानाधिकरण्याभावीया देशविधया अवच्छेदकता तदीयकालविधयाऽवच्छेदकतातो विलक्षणा कालत्वाविषयकप्रमाविषयधूमनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकतात्वादित्यनुमानं वैलक्षण्यसाधकं, तेन पर्वते धूमे न वह्निमत्संयुक्तत्वमिति प्रत्ययाऽसिद्धावपि न क्षतिः, तथाच हेत्वधिकरणनिष्ठावच्छेदकतानिरूपकत्वविरहान्न दोष इति।

तादृशाभावश्च सम्बन्धान्तरेण तत्रैव वर्त्तमाने सुलभः ।

तेनैवेत्यस्य फलमाह वह्निमति च समवायेनेति । हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वानुक्तौ सम्बन्धसामान्येन हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वसामान्याभावो न निवेश्यः साधनाधिकरणावच्छेद्यतादृशाभावस्याऽप्रसिद्धेः, किन्तु यत्किंचित्सम्बन्धेन साध्यवद्वृत्तित्वाभावः प्रवेशनीयः, तथाच हेत्वधिकरणपर्वताद्यवच्छेदेन धूमादौ वह्निमत्समवेतत्वाभावसत्त्वादसम्भव एव स्यात् यदि तेनैव सम्बन्धेन साध्यवद्वृत्तित्वप्रवेशो न स्यादिति भावः ।

ननु हेत्वाधिकरणावच्छेद्यत्वविशिष्टस्य साध्यवद्वृत्तित्वाभावस्याऽधिकरणाऽप्रासिद्ध्या लक्षणमिदमसम्भवि तदधिकरणस्यैव तन्निष्ठधर्मावच्छेदकतया गगनजलत्वादौ वह्निमत्पर्वतसंयुक्तत्वाभावस्य धूमवत्पर्वतानवच्छेद्यत्वादत आह तादृशाभावश्चेति । हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाव इत्यर्थः । सम्बन्धान्तरेण–हेतुतावच्छेदकसम्बन्धान्यसम्बन्धेन, तथाच हेतुमत्पर्वतावच्छेद्यत्वविशिष्टस्य वह्निमत्संयुक्तत्वाद्यभावस्याधिकरणत्वं पर्वतीयरूपादावेव प्रसिद्धमिति भावः ।

यद्यपि रूपादौ वह्निमत्संयुक्तत्वाद्यभावस्य व्याप्यवृत्तित्वात् तत्र पर्वतादिकं नावच्छेदकं भावाभावयोरेकत्र वृत्त्यर्थमेवाऽवच्छेदकभेदस्वीकारादित्यप्रसिद्धितादवस्थ्यम् । न च महानसादिसंयुक्ते कालिकादिसम्बन्धेन पर्वतादिनिष्ठघटादौ वह्निमत्संयुक्तत्वाभावस्य पर्वतावच्छेद्यत्वप्रसिद्ध्या न दोष इति वाच्यम । इत्थमपि एतद्रूपवान् एतद्रसादित्यादौ एतद्रसाधिकरणावच्छेदेन एतद्रूपसमवेतत्वाऽभावस्याऽप्रसिद्धेर्दुर्वारत्वात् । तथापि

केचित्तु कालोपाधेरवच्छेदकतायां कालिकसम्बन्धोऽवच्छेदकतानियामकः, इत्थञ्च तादृशसम्बन्धानवच्छिन्नत्वमेव देशस्याऽवच्छेदकताया वैलक्षण्यम , अन्यस्य दुर्वचत्वात् ।

अत्र केचिदधिक्षिपन्ति । न च हेतुतावच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरणावच्छेद्यसाध्योपलक्षितअधिकरणनिरूपितवृत्तित्वाभाववत्त्वमेव लक्षणे निवेश्यम्, अन्यथ वह्निप्रागभावे वह्निविशिष्टनिरूपितवृत्तित्वाभावस्य सत्त्वाद् वह्निमान् प्रागभावादित्यादावव्याप्तिः स्यात् , एव च साध्यविशिष्टनिरूपितवृत्तित्वाभावस्य पृथिवीत्वादौ सत्त्वेपि साध्योपलक्षितनिरूपितवृत्तित्वाभावविरहेण कथमुक्ताऽव्याप्तिरिति निरवच्छिन्नत्वं विफलमिति वाच्यम् । साध्योपलक्षिताधिकरणनिरूपितवृत्तित्वाभावस्य निवेशेपि वह्निमान् वह्निप्रागभावादित्यादौ प्रागभावस्य सामग्र्या नाश्यत्वाद् वह्न्यधिकरणकालावच्छेदेन वह्न्यवयवे वह्निप्रागभावविरहेण एवं द्वितीयक्षणावच्छेदेनापि वह्न्युपलक्षितनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वाद् , अनयैव रीत्या रूपवान् रूपप्रागभावादित्यादावव्याप्तिवारणाय निरवच्छिन्नत्वं देयम् ।

दीधितौ । तत्रैव–तादृशहेतुमत्येव । **दुर्वारत्वादिति** । एतद्रसादिमति सम्बन्धान्तरेण वर्त्तमाने साध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्वधिकरणावच्छिन्नत्वविरहेण इत्यर्थः ।

पर्वतावच्छेदेन तदीयरूपे न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या व्याप्यवृत्तेरवच्छेदकत्वस्वीकारादित्थमभिधानम् ।

हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याऽधिकरणं हेत्वधिकरणं तदन्यत्वे वा ग्रन्थतात्पर्यम् । तथाच व्याप्यवृत्तेरवच्छेदकत्वाऽसत्त्वेपि साध्यवद्वृत्तित्वाभावविशिष्टस्य तस्याधिकरणत्वमादायैव लक्षणसङ्गतिः ।

न च वस्तुगत्या साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वोक्तौ वह्निमान् धूमादित्यादावव्याप्तिः, स्वावयवावच्छेदेन वह्निमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधनवत्पर्वतादौ सत्त्वात, साध्यवद्वृत्तित्वाभावविशिष्टयद्व्यक्तित्वावच्छिन्नाधिकरणत्वं हेतु-

---

अथोक्तरीत्या महानसादिमात्रनिष्ठ कालिकेन पर्वतवृत्तिधूमादौ पर्वतावच्छेदेन वह्निमत्संयुक्तत्वाभावसत्त्वाद् वह्निमान् धूमादित्यत्राऽव्याप्तिसम्भवे एतद्रूपवान् एतद्रसादित्याद्यनुधावनमयुक्तमिति चेन्न । हेतुतावच्छेदकसम्बन्धेन स्वाधिकरणावच्छेदेन साध्यवद्वृत्तित्वाभावानधिकरणत्वं स्वनिष्ठा व्याप्तिरिति विवक्षयापि तत्राव्याप्तिवारणसम्भवात् । न च स्वत्वाऽननुगमः, स्वतादात्म्य—स्वाधिकरणावच्छेदेन साध्यवद्वृत्तित्वाभावाऽधिकरणत्वोभयसम्बन्धेन हेतुविशिष्टत्वस्य विवक्षितत्वादिति ।

केचित्तु अवच्छिन्नत्व—हेत्वधिकरणावच्छिन्नत्वाभाव एतदुभयाभाववत्त्वमेव हेत्वधिकरणावच्छेदेनेत्यनेन विवक्षणीयम् । एवं च व्याप्यवृत्तेरवच्छेदकत्वाऽस्वीकारेऽपि न क्षतिः, तथाच तादृशोभयाभाववदधिकरणतावदन्यत्वमेव निवेशनीयम्, पर्वतीयरूपादिनिष्ठवह्निमत्सयुक्तत्वाभावाधिकरणतायां अवच्छिन्नत्वविरहेणोभयाभावसत्त्वादिति वदन्ति । तन्न । अवृत्तावेव सर्वत्र तादृशाभावप्रसिद्ध्या सम्बन्धान्तरेण वर्त्तमानपर्यन्तानुधावनवैयर्थ्यात् ।

एतेन धूमान्तरसंयुक्तस्वावयवावच्छेदेन वह्निमत्सयुक्तत्वाभाववति धूमेऽव्याप्तिवारणाय हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणावच्छेदेनेत्यस्य हेतुतावच्छेदकसम्बन्धेन स्वविशिष्टस्य यद्यदधिकरणं तदनवच्छिन्ना अवच्छिन्ना च या या अधिकरणता तद्भिन्नत्वेन साध्यसामानाधिकरण्याऽभावाऽधिकरणता विशेषणीया इत्यत्र तात्पर्यम्, तथाच हेतुतावच्छेदकसम्बन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्ना या या (स्वात्मिका) अधिकरणता तदन्याया साध्यसामानाधिकरण्याभावाधिकरणता तद्भिन्नत्वं हेतौ व्याप्तिरित्यर्थः । स्वपदं अन्यत्वप्रतियोग्यधिकरणतापरम् । वह्निमान्धूमादेत्यादौ व्यभिचारिहेतुनिष्ठाऽव्याप्यवृत्तिसाध्यसामानाधिकण्याभावाधिकरण्याभावाधिकरणतायाः तादृशव्याप्यवृत्तिसाध्यसामानाधिकरण्याभावाधिकरणतायाश्च सङ्ग्रहाय अनवच्छिन्नेति अवच्छिन्नेति च अधिकरणताविशेषणम् । एवं च रूपनिष्ठाधिकरणतापि स्वविशिष्टधूमाधिकरणपर्वताद्यनवच्छिन्नधूमनिष्ठधूमावयवावच्छिन्नाधिकरणताभिन्ना लभ्यते, तथाहि स्वं धूमादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणता तदनुयोगिनो धूमादेः संयोगेनाधिकरणं पर्वतादि तदनवच्छेद्या स्वावयवावच्छेद्या सैव तद्भेदकूटवती च रूपादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतैवेति, हेतोश्च तद्भिन्नत्वाल्लक्षण समन्वयः । तद्विशिष्टस्य हेतुतावच्छेदकसम्बन्धेनाऽधिकरणाऽप्रसिद्ध्या स्वपदेन रूपनिष्ठता-

मतस्तदन्यत्वोक्तौ वह्निमान् धूमात् इदं वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रैवाऽसम्भवः, साध्यवदसंयुक्तत्वादिविशिष्टतत्तद्रूपादिव्यक्तित्वस्य गुरुतया प्रमेयरूपत्वावच्छिन्नप्रतियोगिताया इव तदवच्छिन्नाधिकरणत्वाऽप्रसिद्धेः, केवलस्याऽतिप्रसङ्ग एव विशिष्टधर्मस्याऽधिकरणतानिरूपकतावच्छेद-

---

दशाभावाधिकरणतया उपादानाऽसम्भवादिति [illegible] ऽस्वीकारेऽपि न दोष इति निरस्तम् ।

न चोक्ताऽव्याप्तिः कथं वारणीयेति वाच्यम् । हेत्वधिकरणे इत्यत्र हेतुपदस्य अधिकरणभिन्नत्वाऽनुयोगितत्तद्धेतुपरत्वात् । यद्यपि स्वावयवाऽसंयुक्तधूमादेः तादृशाभावानधिकरणत्वसम्भवाद्धेतुपदस्य तत्तद्धेतुपरत्वं न युक्तम्, तथापि धूमवान् वह्नेरित्यादौ पर्वतीयवह्नेः तादृशाभावाऽनधिकरणत्वमादायाऽतिव्याप्तिवारणाय हेतुतावच्छेदकावच्छेदेन तदनधिकरणत्वविवक्षणाऽवश्यकत्वाद् युक्तं तत्तद्धेतुपरत्वं हेतुपदस्य ।

अत एव हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमेव हेतुतावच्छेदकवैशिष्ट्यं हेतुतावच्छेदकसम्बन्धेन अधिकरणेऽनवच्छिन्नं अवच्छिन्नं च यत् साध्यसामानाधिकरण्यं भवत्यधिकरणं तद्भिन्नत्वस्य लक्षणतया नोक्तरीत्याऽव्याप्तिः, न वाऽननुगम इति नवीनैरुक्तमपि चिन्त्यमेव । एवं सति सम्बन्धान्तरेण वर्तमानपर्यन्तानुधावनवैयर्थ्यादिति दिक् ।

असम्भव इति । अत्रापत्तिरियम् ननु साध्यवद्वृत्तित्वाभावस्य रूप इव महानसवृत्ति घटेऽपि वर्त्तमानत्वात् तादृशघटाधिकरणतानिरूपकतावच्छेदकं न घटत्वमात्रं घटत्वावच्छिन्नाधिकरणतायाः महानसेऽपि सत्त्वादतिप्रसङ्गापातात्, किन्तु वह्निमद्वृत्तित्वाभावविशिष्टघटत्वमेव, तथाच वह्निमद्वृत्तित्वाभावविशिष्टघटत्वावच्छिन्नाधिकरणतायाः प्रसिद्धत्वेन वह्निमान् धूमादित्यादौ लक्षणसम्भवे कथमसम्भव इति । न च जन्यमात्रस्य कालोपाधित्वमङ्गीकृत्यैवोक्तमिति वाच्यम् । संयोगसामान्येन वह्नेः साध्यतायां वह्निमन्निरूपितसंयोगेन धूमस्य हेतुतायां तत्र साध्यवन्निरूपितसंयुक्तत्वाभावस्य महाकालावच्छेदेन कालिकसम्बन्धेन महाकाले वर्त्तमाने महानसमात्रसंयुक्तघटे सत्त्वाद्वह्निमान् धूमादित्यादौ लक्षणगमनसम्भव इति । **अत्र केचित्** । तत्र वैशिष्ट्यावच्छिन्नघटनिष्ठनिरूपकताकाधिकरणतास्वीकारेणैवोपपत्तौ तादृशविशिष्टघटत्वावच्छिन्नाधिकरणताया मानाभावात्तत्सङ्गतिरित्याहुः ।

ननु तथापि साध्यवद्वृत्तित्वाभावविशिष्टयन्निष्ठनिरूपकताकाधिकरणं तदन्यत्वस्य हेतौ निवेशे तादृशवृत्तित्वाभावविशिष्टरूपत्वावच्छिन्नाधिकरणत्वाऽस्वीकारेऽपि न क्षतिः साध्यवद्वृत्तित्वाभावविशिष्टधूमाधिकरणताया हेत्वधिकरणेऽसत्त्वान्न वा वह्निमान् धूमादित्यादौ अव्याप्तिश्चेति चेन्न । कालिकेन धूमाधिकरणावच्छेदेन धूमे वह्निमद्वृत्तित्वाभावस्यैव पर्वतावच्छेदेन रूपादिवृत्तिवह्निमत्संयुक्तत्वाभावात्मकतया एकधर्मावच्छिन्ननिरूपकताया ऐक्यमते वह्निमद्वृत्तित्वाभाववैशिष्ट्यावच्छिन्ननिरूपकतायाः धूमादिनिष्ठायाः एकस्याः कालिकसम्बन्धावच्छिन्ननिरूपकतायाः स्वीकारादिति साध्यवद्वृत्तित्वाभाववैशिष्ट्यावच्छिन्नधूमनिष्ठनिरूपकताकाधिकरणतायाः पर्वते सत्त्वात् यत्पदेन धूमव्यक्तेर्धर्तुं शक्यतया अव्याप्तिप्रसङ्गादिति ध्येयम् ।

अथैतत्कल्पे हेत्वधिकरणावच्छेदेनेत्यनुक्तौ स्वावयवावच्छेदेन वह्निमत्संयुक्तत्वाभावविशिष्टधूमाधिकरणं हेत्वधिकरणं तदन्यत्वस्य हेतावसत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिः ।

कत्वकल्पनादिति वाच्यम्। सार्वभौमानां मते प्रतियोगिताया इवाऽधिकरणताया अपि गुरुधर्मावच्छेद्यत्वोपगमात्, अन्यथा समवेतत्ववत्त्वादिकमपेक्ष्य सत्तावत्समवेतत्ववत्त्वस्य गुरुतया साध्यवद्वृत्तित्वत्वावच्छिन्नप्रति-

---

न च तादृशविशिष्टधूमाधिकरणं हेतुमतोऽसत्त्वादिति वाच्यम् । कालिकेन तद्विशिष्टधूमाधिकरणत्वस्य हेतुमति सत्त्वे बाधकाभावादिति चेत्। **अत्र केचित्** । साध्यवद्वृत्तित्वाभावावशिष्टस्य यस्याधिकरणतायां हेतुतावच्छेदकातिरिक्तसम्बन्धावच्छिन्नत्वहेतुतानिरूपितत्वोभयाभाववत्त्वं विवक्षणीयम्, प्रथमदलानुपादाने प्रागुक्ताव्याप्तिः । तथाच सम्बन्धान्तरावच्छिन्नतादृशधूमाधिकरणतायां धूमनिरूपितत्वसत्त्वेन निरुक्तोभयोः सत्त्वान्नाव्याप्तिरित्याहुः । तन्न । द्रव्यत्वादिसाध्यकसत्तात्वावच्छिन्नाधिकरणतासम्बन्धेन सत्ताहेतावतिव्याप्त्यापत्तिः, तथाहि–सत्तात्वपर्याप्तावच्छेदकताकाधिकरणत्वसम्बन्धेन द्रव्यत्ववद्वृत्तित्वाभावविशिष्टसत्ताधिकरणत्वाप्रसिद्धेः, सम्बन्धान्तरावच्छिन्नस्य सत्तात्वावच्छिन्नाधिकरणत्वस्य तादृशोभयाभावाऽसत्त्वेन तदन्यत्वस्य हेतौ सत्त्वादिति ध्येयम् ।

यत्तु साध्यवद्वृत्तित्वाभावविशिष्टस्य धूमस्याऽधिकरणत्वं पर्वतादौ नास्त्येव, विशिष्टाधिकरणत्वस्य अतिरिक्तत्वादिति । तच्चिन्त्यम् । अनुभवेनाऽविपर्यीकरणात् ।

ननु रूपवान् पृथिवीत्वादित्यादौ अव्याप्तिः, तथाहि—उत्पत्तिकालीनघटे पृथिवीत्वे रूपवद्वृत्तित्व नेति प्रतीत्या उत्पत्तिकालावच्छिन्नघटावच्छेदेन रूपवद्वृत्तित्वाभावविशिष्टपृथिवीत्वाधिकरणत्वस्यैव हेत्वाधिकरणपृथिव्यां सत्त्वात्, तदन्यत्वं न पृथिवीत्वहेतावस्तीति । न च साध्यवद्वृत्तित्वाभावहेत्वधिकरणानिष्ठानिरवच्छिन्नावच्छेदकतानिरूपकत्वं देयमिति वाच्यम् । व्याप्यवृत्तेरवच्छेदकत्वास्वीकारे एतत्कल्पस्य प्रणयने पुनर्हेत्वाधिकरणावच्छेदेनेत्युक्तौ प्रागुक्ताऽप्रसिद्धितादवस्थ्यात् उन्मत्तप्रलपितत्वापत्तेरिति चेन्न ।

किञ्चिद्धर्मावच्छिन्नावच्छेदकत्वानिरूपकत्वस्य साध्यवद्वृत्तित्वाभावे विवक्षितत्वात् । न च यद्धर्मावच्छिन्नावच्छेदकत्वानिरूपितत्वस्य साध्यवद्वृत्तित्वाभावाधिकरणतायां निवेशे उक्ताऽव्याप्तिवारणेऽपि वृत्तित्वसाध्यकअग्रावच्छेदेन तत्कपिसंयोगहेतुकस्थलेऽव्याप्तिर्दुर्वारैव मूले एतत्कपिसंयोगे न वृत्तित्वसामानाधिकरण्यमिति प्रतीत्या मूलावच्छेदेन एतत्कपिसयोगे किञ्चिद्धर्मावच्छिन्नावच्छेदकत्वानिरूपकतायाः सत्त्वादिति वाच्यम् । किञ्चिद्धर्मानवच्छिन्नहेत्वधिकरणनिष्ठावच्छेदकत्वानिरूपकत्व—अवच्छेदकत्वानिरूपकत्वोभयाभावस्य साध्यवद्वृत्तित्वाभावाधिकरणतायां निवेशात्, मूलावच्छेदेन तादृशवृत्तित्वाभावाधिकरणतायां निरुक्तोभयोः सत्त्वान्नातिव्याप्तिरिति ।

अथ वस्तुगत्या साध्यवद्वृत्तित्वाभावविशिष्टो यस्तदधिकरणानिवेशे स्वावयवावच्छेदेन साध्यवद्वृत्तित्वाभावविशिष्टो यो धूमस्तदधिकरणतामादाय वह्निमान् धूमादित्यादावव्याप्तिरिति जगदीशग्रन्थाऽसङ्गतिः, धूमनिष्ठतादृशाधिकरणतायां निरुक्तोभयोः सत्त्वादिति चेन्न । वह्निमान् धूमादित्यादौ पर्वतावच्छेदेन महानसीयधूमे निरुक्तोभयाभाववत्साध्यवद्वृत्तित्वाभावाधिकरणतायां चत्वरावच्छेदेन पर्वतीयधूमे तादृशाधिकरणतायां च सत्त्वादव्याप्तिवारणाय साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणतायां हेतुतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व-

व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्व सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात् । न चैवं गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः, विशिष्टस्याऽतिरिक्तत्वात्, अनतिरिक्तत्वे तु विशेषणविशेष्यसम्बन्धस्यैव परंपरया व्याप्तत्वात् ।

योगितावच्छेदकाभावाऽप्रसिद्ध्या सत्तावान् द्रव्यत्वादित्यादावव्याप्तिप्रसङ्गात् ।

ननु साध्यसामानाधिकरण्यवतो न तदभाववत्त्वं, अतो द्रव्यं सत्त्वादित्यादौ व्यभिचारिण्यतिप्रसङ्ग इत्यत आह व्यभिचारिणस्त्विति । तादृशीति । **हेतुतावच्छेदकसम्बन्धेन हेतुमतीत्यर्थः । तादृशाभाववत्त्वं-साध्यवद्वृत्तित्वाभाववत्त्वम् । अत्रैवानुभवं प्रमाणयति** सत्तायामित्यादि । **एवं-सत्तायामपि द्रव्यत्वसामानाधिकरण्यविरहे ।** विशिष्टसत्त्वे इति । **विशिष्टसत्त्वशब्दप्रतिपाद्यहेतावित्यर्थः । यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्ताव्यक्तौ अव्याप्त्याशङ्काया मुत्तरग्रन्थेन तदनिरासादसङ्गत्यापत्तेः ।** अतिरिक्तत्वादिति । **विशेष्यविशेषणाभ्यां भिन्नत्वादित्यर्थः, तथाच गुणादिकं न हेत्वधिकरणमतो नाऽव्याप्तिः ।**

हेतुनिरूपितत्वोभयाभावस्य निवेशनीयत्वात्, तथाच पर्वतावच्छेदेन साध्यवद्वृत्तित्वाभावविशिष्टस्य धूमस्याधिकरणतायाश्चत्वरे स्वीकारात्, कालिकसम्बन्धावच्छिन्नाधिकरणतया न निरुक्तोभयाभावासत्त्वात् धूमाधिकरणताया धर्तुमशक्यत्वान्नाव्याप्तिः । इत्थं चेन्नलक्षणविधया निवेशे पर्वतावच्छेदेन वह्निमद्वृत्तित्वाभावविशिष्टो यो महानसीयधूमस्तद्व्यक्त्यधिकरणताया महानसे सत्त्वात् वह्निमान् धूमादित्यादावव्याप्तिरतस्तादृशवृत्तित्वेन निवेश इति नाम्नेत्याहुः ।

साध्यवद्वृत्तित्वाभावविशिष्टयद्व्यक्त्यधिकरणतापि हेतुतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वहेतुनिरूपितत्वोभयाभाववती ग्राह्या, अन्यथा वह्निमान् धूमादित्यादावव्याप्तिस्तथाहि स्वावयवावच्छेदेन वह्निमद्वृत्तित्वाभावविशिष्टधूमत्वावच्छिन्ननिरूपितकालिकसम्बन्धावच्छिन्नाधिकरणतायाः धूमवत्पर्वते सत्त्वात् । न च कालिकसम्बन्धावच्छिन्नाधिकरणतापि अतिरिक्तैवेति वाच्यम्, तथाच यदवच्छेद्यसाध्यवद्वृत्तित्वाभाववैशिष्ट्यं कालिकसम्बन्धेनापि विशिष्टनिरूपकताकाधिकरणत्वं तस्यैवेति वाच्यम् । तत्सम्बन्धावच्छिन्नवृत्तित्वाभावविशिष्टस्य तत्सम्बन्धेनैवाऽतिरिक्तत्वात्, सम्बन्धान्तरेण तस्य सत्त्वे बाधकाभावात्, हेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वस्य च सत्तावान् जातेरित्यादावप्रसिद्धिभयेन निवेशाऽसम्भवादित्याहुः ।

हेतुतावच्छेदकसम्बन्धेन हेतुमतीत्यर्थ इति । सप्तम्यर्थोऽवच्छेदकत्वम् । **साध्यवद्वृत्तित्वाभाववत्त्वमिति ।** हेतुतावच्छेदकसम्बन्धेनेति शेषः । सार्वभौमेनाऽपि विशिष्टाधिकरणताया अतिरिक्तत्वमवश्यमभ्युपेयम्, अन्यथा सत्ताधिकरणताया एवं विशिष्टसत्ताधिकरणतात्वे गुणो विशिष्टसत्तावानिति प्रत्ययापत्तेः, सत्ताधिकरणत्वस्य गुणे विद्यमानत्वादित्यत आह दीधितौ **विशिष्टस्येति । तथाचेति ।** भिन्नत्वे चेत्यर्थः । **नाव्याप्तिरिति ।** तथाच विशिष्टसत्त्वं द्रव्यमात्रवृत्ति तदधिकरणत्वं न गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसामानाधिकरण्याभावत्वमतो नाव्याप्तिरिति भावः ।

ननु हेतुतावच्छेदकावच्छिन्नाधिकरणतानिवेश आवश्यकः, अन्यथा स्पर्शवान् भूतत्वम्-

उभयत्वमपि एकविशिष्टापरत्वमेव तच्चाऽतिरिक्तमेव, नातः स्पर्शवान् मूर्त्तत्वभूतत्वोभयस्मादित्यादावव्याप्तिरिति भावः ।

यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावपि विशिष्टसत्तादौ नाव्याप्तिः । न च धूमाधिकरणमहानसाद्यवच्छेदेन पर्वतीयादिधूमे वह्निमत्संयुक्तत्वाभावस्य चालनीन्यायेन सत्त्वादव्याप्तिः, महानसादेरपि कालिकादिसम्बन्धेन पर्वतीयधूमाधिकरणत्वात् तत्र साध्यवद्वृत्तित्वाभाववत्तायामवच्छेदकत्वादिति वाच्यम् । स्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवदवृत्तिधर्मवत्त्वमित्यस्यैव फलितार्थस्य तत्तद्धूमत्वधर्ममादायैव धूमादौ लक्षणसम्भवेन धूमत्वस्य हेतुतावच्छेदकत्वेऽपि क्षत्यभावात् । तथापि विशिष्टस्याऽतिरिक्तत्वात्तत एवाऽव्याप्तिवारणसम्भवे हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशे गौरवम् असम्भवो वा, विशिष्टनिरूपकाऽधिकरणत्वाऽप्रसिद्धेः । एवं धूमत्वादेर्व्याप्यताऽनवच्छेदकत्वे ताद्रूप्येण कथायां हेतोरुपन्यासो न स्यादित्याशयः ।

ननु विशिष्टस्याऽतिरिक्तत्वे मानाभावः, न च गुणो विशिष्टसत्तावानिति प्रतीत्यभाव एव मानम्, गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्रतीत्यसम्भवात्, न च विशिष्टनिरूपिताधिकरणत्वं यद्यतिरिक्तं तदा विशिष्टमेवाऽतिरिक्तमस्तु विशिष्टाधिकरणतायाः क्लृप्ताधिकरणस्वरूपत्वाभ्युपगमात्, किञ्च विशिष्टस्याऽतिरिक्तत्वे द्रव्यं विशिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं न सत्तावदिति निर्णयप्रसङ्गः, सत्ता-

---

र्त्तत्वोभयस्मादित्यादौ भूतत्वे मूर्त्तत्वे च हेतौ स्वाधिकरणे गगने मनसि च साध्यसामानाधिकरण्यविरहेणाऽव्याप्तिप्रसङ्गादित्यत आह **उभयत्वमपीति** । **अत्रेदं बोध्यम्** । विरुद्धनिष्ठोभयत्वस्य एकविशिष्टाऽपरत्वरूपत्वाऽसम्भवाद् उभयत्वमात्रस्यैवातिरिक्तत्वं स्वीकृत्य तस्यैव च स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन हेतुत्वे न कोऽपि दोषः । ननु यथा परंपरासम्बन्धेन उभयत्वस्य हेतुत्वं तथा विशिष्टाऽनतिरिक्तत्वेऽपि वैशिष्ट्यस्यापि स्वावच्छिन्ननिरूपितसमवायेन हेतुत्व वक्तुं शक्यते इति चेद् । इदमेव "अनतिरिक्तत्वे तु" इत्यादिना वक्ष्यति ।

न चेति । अस्य अस्तु इत्यनेनाऽन्वयः । न च विशिष्टकेवलयोर्भेदस्वीकारे केवलं सत्तायां द्रव्यत्वसामानाधिकरण्याभावविशिष्टसत्ताभेदसत्त्वात् द्रव्य सत्त्वादित्यादावतिप्रसङ्गो दुर्वार इति वाच्यम् । लक्षणे सामानाधिकरण्याभावोपलक्षितभेदनिवेशेन उक्तातिप्रसङ्गाभावात् । अत्र विशिष्टस्याऽतिरिक्तत्वेऽनन्तपदार्थकल्पनापत्तिः । न च तस्याऽतिरिक्तत्वे अनन्तविशिष्टाधिकरणताकल्पनापत्त्या साम्यमिति वाच्यम् । तस्याऽतिरिक्तत्वेपि उक्तरीत्या विशिष्टाधिकरणताकल्पनस्याऽऽवश्यकत्वात् । यदि च तस्याऽतिरिक्तत्वेऽतिरिक्ताविशिष्टाधिकरणता न कल्प्यते विशिष्टसत्तावानिति प्रतीतौ च नव्यमते समवायस्य नानात्वेन विशिष्टसत्तासमवायस्य शुद्धसत्तासमवायादतिरिक्तत्वेन गुणे तादृशसमवायस्याऽभावेन विशिष्टसत्तावान्

केवलान्वयिनि चाऽव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः ।

भावबुद्धिं प्रति सत्तानिश्चयस्यैव विरोधितया तदसत्त्वात्. स्वातन्त्र्येण विरोधितान्तरकल्पने गौरवात्, एवं विशेषणविशेष्योभयग्राहकसामग्रीविरहेऽपि विशिष्टग्रहप्रसङ्गः, तदुभयग्राहकसामग्र्या विशिष्टस्य ग्रहे हेतुत्वकल्पनेऽपि गौरवान्तरं स्फुटमेवेत्यत आह अनतिरिक्तत्वे त्विति ।

गुरवस्तु विशिष्टस्याऽतिरिक्तत्वादितिग्रन्थस्य विशिष्टनिरूपिताधिकरणत्वस्याऽतिरिक्तत्वादित्यर्थः । तथाच हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेन तादृशवृत्तित्वाभाववत्त्वमपि निवेश्यमतो नाऽव्याप्तिरित्याशयः

ननु विशिष्टाधिकरणत्वं यदि नातिरिक्तं विशिष्टसत्तावानिति प्रतीतिः प्रत्येकनिरूपिताधिकरणताद्वयावगाहिन्यैवोपपत्तेः, अन्यथा विशेषणाभावनिर्णयदशायामपि विशिष्टसत्तावत्त्वप्रतीत्यापत्तेः, विशिष्टसत्ताबुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबन्धकतयाः स्वातन्त्र्येण कल्पनापातादित्युच्यते तदाप्याह अनतिरिक्तत्वे त्विति प्राहुः ।

विशेषणेति । विशेषण गुणकर्मान्यत्वं, विशेष्यं सत्ता, तयोः सामानाधिकरण्यात्मकसम्बन्धस्यैवेत्यर्थः । साक्षात्सम्बन्धेन तस्यै व्यभिचारित्वादाह परंपरयेति । अवच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः । सत्त्वगुणकर्मान्यत्वयोर्द्रव्ये एव सामानाधिकरण्यमिति प्रतीत्या तदुभयसामानाधिकरण्यस्य द्रव्ये एव सत्त्वान्न व्यभिचार इति भावः ।

नन्वेवं ज्ञेयत्वाधिकरणपटाद्यवच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य पटीयरूपादावेव सत्त्वात्तदधिकरणभिन्नत्वमस्त्येव ज्ञेयत्वादिहेतोः इत्यग्रे केवलान्वयिन्यव्याप्तिप्रदर्शनमसङ्गतमत आह केवलान्वयिनीति । द्वितीयेति । तत्र

गुण इति प्रत्ययाऽसम्भवादिति विभाव्यते, तथापि न क्षतिः मन्मते द्रव्यत्वादेरेव विशिष्टाधिकरणतात्वात् । एवं च सति विशिष्टस्याऽतिरिक्तत्वेऽपि नाऽनन्तपदार्थकल्पनापत्तिः विशिष्टसत्त्वादेः क्लृप्तद्रव्यत्वादिरूपत्वस्यैव स्वीकारात् । इदमेव हि विशिष्टस्याऽतिरिक्तत्वं, यद्विशेष्याद्भिन्नत्वं, न त्वतिरिक्तपदार्थत्वमित्येतत्सर्वमालोच्याह क्लृप्ताधिकरणस्वरूपत्वाभ्युपगमादिति । स्फुटमेवेति । एव सर्वेषामेव वस्तूनां तत्तत्क्षणादिवृत्तित्वरूपविशेषणभेदाद् भिन्नत्वापत्त्या प्रत्यभिज्ञामात्रस्याऽप्रामाण्येन सजातीयत्वावगाहितावलम्बनेन वा स्थैर्योच्छेदे जगतः क्षणिकत्वापत्तिश्च स्यादिति ।

अथैवं मूलकृतः केवलान्वयिनि अव्याप्त्यभिधानमसङ्गतं हेतुतावच्छेदकसम्बन्धेन वाच्यत्वसामानाधिकरण्याभावस्य सम्बन्धान्तरेण वर्तमाने प्रसिद्धस्य हेतावसत्त्वादिति शङ्कते नन्वेवमिति ।

दीधितौ प्रतीतिर्हि इति । अस्य अभाव गुणेऽवगाहते इत्यग्रिमेणाऽन्वयः । अव-

तच्चिन्त्यम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत् सत्तानिष्ठद्रव्यत्व-

---

साध्यवद्भिन्नस्याऽप्रसिद्धत्वादिति भावः ।

यद्यपीदं वाच्यं प्रमेयादित्यादौ तादात्म्येन केवलान्वयिनि प्रथमलक्ष-णेऽव्याप्तिः संभवति प्रमेयावच्छेदेन वाच्यत्ववत्तादात्म्यकत्वविरहिणोऽप्रसिद्धेः, न च घटाद्यवच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वादौ सुल-भः, तथासति घटत्वं घटे न वाच्यमिति प्रतीत्यापत्तेः, तथापि स्वाधिक-रणनिरूपितहेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावोऽत्र लक्षणघटक इत्यभिप्रायेण द्वितीयलक्षणाभिधानम् । स्वपदस्य तत्तत्साधनव्यक्तिपरतया तादात्म्येन पटात्मकहेत्वधिकरणीभूतपटव्यक्तिनिरूपिततादात्म्येन वाच्य-त्ववत्तादात्म्यकत्वाभावस्य पटावच्छेदेन पटत्वादावेव प्रसिद्धेः ।

वस्तुतस्तु केवलान्वयित्वं वृत्तिमदत्यन्ताभावाऽप्रतियोगित्वमात्रम्, न त्ववच्छेदकगर्भम्, तथाच तादात्म्येन किञ्चिदपि प्रमेयं न केवलान्वयीति द्वितीयलक्षणे एव तादृशकेवलान्वयिन्यव्याप्तिसम्भवात् यथाश्रुतमेव सम्यगित्याहुः ।

नव्यास्तु केवलान्वयिनि चाव्याप्तेरिति केवलान्वयिसामान्येऽव्याप्ते-रभिधानं द्वितीयलक्षणाभिप्रायेणेत्यर्थः । प्रथमलक्षणे यत्किञ्चित्केवलान्व-यिनि तादात्म्येन प्रमेयादिहेतावव्याप्तावपि न क्षतिरित्याहुः ।

सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिः सत्तानिष्ठ द्रव्यत्वसामानाधिकरण्यस्याऽवच्छेदकत्वाभावं गुणादौ अवगाहते इत्यत्र समानाकारकप्रतीतिं दृष्टान्तयति द्रव्यत्वे गुणे इति । न तूक्तप्रतीतेर्गुणा-वच्छेदेन द्रव्यत्वे पृथिवीत्वसामानाधिकरण्याभावो विषयः, गुणस्य द्रव्य-त्वाऽनाधिकरणतया तन्निष्ठपृथिवीवृत्तित्वाभावाऽवच्छेदकत्वाऽसम्भवात्, किन्तु द्रव्यत्वनिष्ठं यत्पृथिवीत्वसामानाधिकरण्यं तदवच्छेदकत्वाभाव एव गुणे विषय इति तद्वदियमपीति भावः । अवच्छेदकत्वाभावमिति । प्रात्य-क्षिकप्रतीत्यभिप्रायेणेदं, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्या-दिशाब्दस्थलेऽवच्छेदकत्वोपस्थापकपदान्तरविरहात्तदभावस्य गुणादौ बोधयितुमशक्यत्वात्, किन्तु सत्तानिष्ठं द्रव्यत्वसामानाधिकरण्यं न गुणा-वच्छेद्यमित्याकार एव तत्र बोधः । गुणादावित्यत्र सप्तम्यर्थस्य नञर्थेऽ-न्वयादिति ध्येयम् ।

च्छेदकत्वस्य निरूपकत्वस्येत्यर्थः । तेन सामानाधिकरण्यस्य व्याप्यवृत्तित्वमते तदवच्छेदक-त्वस्याऽप्रामाणिकत्वेऽपि न क्षतिः । ननु द्रव्यत्वे गुणे इति दृष्टान्ताऽसिद्धिः, तत्रापि द्रव्यत्वे गुणावच्छेदेन पृथिवीत्वसामानाधिकरण्याभावो विषय इति वक्तुं शक्यत्वादत आह **न त्विति । गुणस्येति** । नित्यगुणस्येत्यर्थः । जन्यगुणे कालिकसम्बन्धेन द्रव्यत्वस्य वृत्ति-

सामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन सामानाधिकरण्यस्य चाऽसत्त्व गुणेऽवगाहते न तु सत्तायामेव द्रव्यवृत्तित्वाभावम् ।

सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादि-सर्वजनसिद्धप्रतीतिबाधितत्वात् । बाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेद-

---

नन्वेवं तादृशप्रतीतेः सामानाधिकरण्याभावविषयकत्वमनुभवसिद्धं विरुद्धेन सामानाधिकरण्यस्य व्याप्यवृत्तित्वेन तदवच्छेदकत्वाप्रसिद्ध्या तादृशाऽवच्छेदकत्वाभावविषयकप्रतीतेर्भ्रमत्वापत्तिश्च स्यादत आह परम्परासम्बन्धेनेति । **निरूपकताख्यस्वरूपसम्बन्धेनेत्यर्थः, न त्ववच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः । तथासति सत्तायां द्रव्ये न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिप्रसङ्गात्, सामानाधिकरण्यस्य व्याप्यवृत्तितया कुत्राप्यवच्छेदकत्वसम्बन्धेन तस्याऽसत्त्वात् ।** न त्विति । **तथाच द्रव्यं सत्त्वादित्यादावतिव्याप्तिरिति भावः ।**

ननूक्तदृष्टान्तस्थले बाधकसत्त्वादवच्छेदकत्वाभावोऽस्तु प्रतीतेर्विषयः प्रकृते तु साक्षात्सामानाधिकरण्याभावविषयकत्वे न किंचिद्बाधकमस्तीत्यतो बाधकमाह सत्ता नेति । **तथाच सत्तायां द्रव्यवृत्तित्वाभावसत्त्वे द्रव्यवृत्तित्वाभाववद्भिन्नत्वधीस्तत्र न स्यादिति भावः ।**

त्वात् । **निरूपकताख्यस्वरूपसम्बन्धेनेत्यर्थ इति ।** स्वनिरूपकयावदाश्रयत्वरूपाऽवच्छेदकत्वसम्बन्धेनेत्यर्थः । अवच्छेदकत्वस्य प्रतियोगितावच्छेदकसंसर्गतया भानपक्षे वक्ष्यमाणरीत्या निरुक्तरूपताया आवश्यकत्वेन प्रतियोगितया भानपक्षेऽपि निरुक्तरूपताया औचित्याऽवर्जितत्वादिति भावः । नञ्रहितस्थलीयोक्तप्रत्ययेऽवच्छेदकत्वावगाहित्वस्याऽनुभविकत्वेन नञ्सहितस्थलीयोक्तप्रत्ययस्याऽपि तदावश्यकतया तद्रक्षणायाऽवच्छेदकत्वोत्कीर्तनम्, तथा चाऽन्यादृशावच्छेदकत्वसम्भवेनतादृशाऽवच्छेदकत्वमादायैवाऽनुभवनिर्वाह इति भावः । **तस्याऽसत्त्वादिति ।** वृत्त्यनियामकतया तस्याऽभावप्रतियोगिताऽनवच्छेदकत्वाच्च, अतः परम्परासम्बन्धेनेत्युक्तम् ।

स्वरसतो यादृशशब्दात् यादृशार्थः प्रतीयते तादृशशब्दोल्लेखिप्रत्यये असति बाधके तादृशार्थविषयकत्वमेव युक्तम्, अतो दृष्टान्ते बाधकवशेनाऽन्यथोपपादनमस्तु सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतौ सामानाधिकरण्याभावविषयकत्वे किं बाधकमित्याशङ्कते **नन्विति ।** सतायां द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्वात्मकस्य सत्तायां द्रव्यवृत्तित्वाभावस्वीकर्तृमतेपि स्वीकारे क्षतिविरहः, तथाच एतादृशप्रतीतेर्बाधकत्वं न सम्भवति विरोध्यविषयकत्वादत आह **द्रव्यवृत्तित्वाभाववद्भिन्नत्वधीरिति ।** तथाच सत्तायां द्रव्यवृत्तित्वाभावाभावस्य न ग्रहः किन्तु द्रव्यवृत्तित्वाभाववद्भेदस्यैव तद्बोधकसमानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारादिति भावः । **न स्यादिति ।** भेदस्य व्याप्यवृत्तित्वादित्यर्थः । एवं च सत्तायां द्रव्यवृत्तित्वाभावाधिकरणभिन्नत्वसत्त्वादतिव्याप्तितादवस्थ्यम् ।

न एकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः। अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचा-

---

ननु द्रव्यवृत्तित्वाभावोऽव्याप्यवृत्तिरेवेति तद्वद्भेदोऽप्यव्याप्यवृत्ति- र्वाच्यः, तथा च द्रव्यगुणात्मकाविभिन्नावच्छेदेन तयोः सत्तायां समावेशा- त्कुतो विरोध इत्यत आह द्रव्यवृत्तित्वाभाव इति।

नन्वेवं मूले न कपिसंयोगीति प्रतीत्या वृक्षादौ कपिसंयोगाभावोऽपि न सिद्ध्येत्, तत्रापि वृक्षनिष्ठसंयोगावच्छेदकत्वाभावस्य मूलेऽवगाहनस- म्भवादत आह बाधकाभावादिति। **कपिसंयोगाभावो न वृक्षवृत्तिरित्यादि- प्रत्ययस्याऽसिद्धत्वादिति(१) भावः।**

ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रतीतिरेवाऽसिद्धा द्रव्य- वृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरिति प्रत्ययात्, एकशेषस्य कर्त्तु-

---

एवं भेदस्याऽव्याप्यवृत्तित्वमतेऽपि तादृशप्रतीतेर्विरोध्यविषयकत्वोपपादने सत्तायां द्रव्यत्वसा- मानाधिकरण्याभावेऽपि तदधिकरणभिन्नत्वस्याऽप्यक्षततयाऽतिव्याप्तिवारणमशक्यमिति भावः।

कुतो विरोध इति। वस्तुतस्तु सत्ता न द्रव्यवृत्तित्वाभाववती इति प्रतीति. सत्ताविशेष्यिका सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति 'सत्तायामिति' सप्तम्यन्तोल्लेखिप्रतीति- र्द्रव्यवृत्तित्वाभावविशेष्यिका, तथाच भिन्नविशेष्यकत्वान्न तयोर्विरोध इति।

केचित्तु–सत्तायां गुणे नेत्यादिप्रतीतिः सत्ताविशेष्यिका द्रव्यवृत्तित्वाभावविशेष्यिका वा, आद्ये बाधकमाह **सत्ता नेति**। द्वितीये बाधकमाह **द्रव्यवृत्तित्वाभाव–इति** दीधितिग्रन्थं योजयन्ति।

ननु द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वं गुणाद्यवच्छेदेन, न तु द्रव्यावच्छेदेन, तथाच द्रव्या- वच्छेदेन द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वाभावसत्त्वेऽपि गुणाद्यवच्छेदेन तत्र सत्तावृत्तित्वाभावः सम्भवति, सत्तावृत्तित्वस्य सत्तात्वसामानाधिकरण्यरूपतया तस्य चाऽव्याप्यवृत्तितयाऽवच्छे- दकभेदेनोभयोः समावेशात्कथं बाधकत्वम्। न च द्रव्यवृत्तित्वाभावनिष्ठसत्तावृत्तितायां कथं गु- णस्याऽवच्छेदकत्वं, गुणेऽवच्छेद्याधिकरणीभूतद्रव्यवृत्तित्वाभावाधिकरणत्वविरहादिति वाच्यम्। द्रव्यवृत्तित्वाभावे गुणावच्छेद्यतायाः सत्त्वेन सत्ताद्रव्यवृत्तित्वाभावयोः सम्बन्धस्य (सत्तावृत्ति- त्वलक्षणस्य) तदवच्छेद्यत्वात्। अथवा यदभावो यदवच्छेदेन तदभाववन्निष्ठवृत्तित्वमपि तदवच्छेदेनेत्यनुभवानुसारेण तथोक्तिः इति चेन्न। अत्रापि उक्तयुक्त्या द्रव्यवृत्तित्वाभावे सत्तावृत्तिभेदावगावगाहितया बाधकत्वं निष्प्रत्यूहमेवेति, तथाच सत्तायां गुणे न द्रव्यत्वसा- मानाधिकरण्यमिति प्रतीतिः प्रमात्वे सति गुणावच्छेद्यद्रव्यवृत्तित्वाभावानवलम्बना तद्विरुद्धद्र- व्यवृत्तित्वाभाववद्भिन्नत्वप्रकारकप्रमावत्त्वादित्यनुमान, द्रव्यवृत्तित्वाभावो सत्तावृत्तित्वाभावनि- ष्ठप्रमयिप्रकारतानिरूपितविशेष्यताशून्यः सत्तावृत्तिभिन्नत्वप्रकारकप्रमाविशेष्यतावत्त्वादित्यनु- मानं वा फलितम्। तथाच द्रव्यं सत्त्वादित्यत्राऽतिव्याप्तिस्तदवस्थैवेति भावः। **असिद्ध- त्वादिति**। अननुभवादिति भावः। **अशक्यत्वादिति**। कपिसंयोगाभावे वृक्षाऽवृत्ति- त्वप्रत्यय इव द्रव्यवृत्तित्वाभावे सत्तावृत्तिभेदप्रत्ययेऽपि विवादसम्भवादिति भावः।

---

(१) 'असम्भवात्' इति पाठान्तरम्।

रिण्यतिप्रसंगाच्च, तत्र सामानाधिकरण्याभावस्य प्रत्यक्षत्वाऽसंभवेनाऽसिद्धेः ।
न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयम्, तद्वद्वृत्तिभिन्नत्वस्योपाधि-

---

मशक्यत्वादतो दोषान्तरमाह अतीन्द्रियेति । मनस्त्ववद् अणुत्वादित्यादावि-त्यर्थः । तत्र अतीन्द्रियसाध्यके अतीन्द्रियाऽसद्धेतौ ।

ननु प्रत्यक्षाऽसम्भवेपि अणुत्वं मनस्त्वसामानाधिकरण्याभाववत् मनस्त्वाभाववद्वृत्तित्वात् पृथिवीत्ववदित्यनुमानेनैव तत्र सामानाधिक-रण्याभावः सेत्स्यतीत्यत आह न चेति । साध्यवद्वृत्तिभिन्नत्वस्येत्यर्थः । तथा चोक्तानुमाने मनस्त्ववद्वृत्तिभिन्नत्वमुपाधिः, तस्य च साध्यव्याप-कत्वं घटत्वादौ साधनाव्यापकत्वं द्रव्यत्वादौ ग्राह्यम्, भेदस्याऽव्याप्यवृ-

---

दीधितौ अतीन्द्रियसाध्यके इत्यादि । अत्राऽतीन्द्रियसाध्यकमेकं अतीन्द्रियहेतु-कं चरममिति व्यभिचारिद्वयं प्रतीयते तत्राह **मनस्त्ववदणुत्वादिति** । तथाच गुरुत्ववद् घटाभावादित्यतीन्द्रियसाध्यकेन्द्रियके केवलघटाभाववृत्तित्वस्य, रूपवद् आकाशाभावादिति ऐन्द्रियकसाध्यकातीन्द्रियहेतौ रूपवद्वृत्तित्वाभावस्य च प्रत्यक्षसंभवः, केवल हेतुवृत्तित्वस्य सा-ध्यवद्वृत्तित्वाभावस्य च प्रत्यक्षसंभवेऽपि अतिव्याप्तिवारकस्य हेतौ साध्यवद्वृत्तित्वाभावस्य प्रत्यक्षासम्भवेन अन्यतरस्यैन्द्रियकत्वेऽतिव्याप्तिसत्त्वेऽपि स्वांशेऽपि प्रत्यक्षासम्भवेनाऽतिव्या-प्तिदार्ढ्यप्रदर्शनायोभयातीन्द्रियत्वमुक्तमित्याशयः । वस्तुतस्तु चकाराऽदर्शनेन न व्यभिचा-रिद्वयलाभसंभव इति ध्येयम् ।

दीधितौ **अतिप्रसङ्गाच्चेति** । प्रमाणाभावेन अणुत्वे मनस्त्वसामानाधिकरण्याभावस्या-ऽसिद्ध्या तदधिकरणघटादिभिन्नत्वस्याऽणुत्वे सत्त्वादिति भावः । प्रत्यक्षेणैव तत्सिद्धिः स्यादत आह **तत्रेति** । उक्तस्थले इत्यर्थः ।

अन्ये तु अतीन्द्रियसाध्यके इत्यादिग्रन्थो भिन्नस्थलाभिप्रायकः इदं गुरुद्रव्यत्वात्, पृ-थिवी गुरुत्वादित्यादावित्यर्थः । **तत्र**–अतीन्द्रियसाध्यके व्यभिचारिणि, अतीन्द्रिये च व्यभि-चारिणि । **प्रत्यक्षाऽसंभवेनेति** । अतीन्द्रियसाध्यके तत्सामानाधिकरण्याभावस्याऽतीन्द्रि-यधर्मावच्छिन्नप्रतियोगिताकत्वेनाऽयोग्यत्वाद् अतीन्द्रियहेतुके च योग्यस्याऽपि साध्यसामाना-धिकरण्याभावस्य हेत्वंशे ग्रहो न सम्भवति विशेष्यस्याऽतीन्द्रियत्वादिति भाव इत्याहुः । तत्र पूर्वोक्तरीत्या उभयत्रातीन्द्रियत्वोपादानस्यावश्यकतया "ऽतीन्द्रियसाध्यके" इत्यादिग्रन्थ-स्यैकस्थलाभिप्रायकत्वस्यावश्यकत्वेन भिन्नभिन्नस्थलाभिप्रायकत्वस्याऽसंभवात् । एकस्थला-भिप्रायकत्वे एकवाक्यत्वं भिन्नभिन्नस्थलाभिप्रायकत्वे वाक्यभेद इति सम्भवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वाच्च । जलपृथिव्यन्यतरवृत्तित्वाभावस्य गुरुत्ववद्वृत्तित्वाभावसमनियततया तेजआद्यवच्छेदेन द्रव्यत्वे प्रत्यक्षसिद्धस्य साध्याव्यापकत्वनिश्चये तद्वद्वृत्तिभिन्नत्वस्योपाधित्व-शंकाया अप्यभावेन वक्ष्यमाणोपाधित्वानुपपत्त्या च उभयातीन्द्रियत्वस्यैवाऽपेक्षितत्वात्तद्ग्र-न्थस्य भिन्नभिन्नस्थलाभिप्रायकत्वेऽत्यन्ताऽसंगतेश्चेति ध्येयम् ।

तस्य चेति । मनस्त्ववद्वृत्तिभिन्नत्वस्य चेत्यर्थः । **साध्यव्यापकत्वमिति** । न च पक्षे साध्यसन्देहेन कथं साध्यव्यापकत्वनिश्चय इति वाच्यम् । अनुकूलतर्कविरहे उपाधित्व-

त्वात्। किञ्च इदमिदानीमितिप्रतीतिनियामकाविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः, तेन संबन्धेनाऽधिकरणे काले तेन संबन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः।

त्तित्वे तु साध्यवद्वृत्तितत्तद्व्यक्तित्वावच्छिन्नभेदकूट उपाधिर्बोध्यः।

ननु उक्तोपाध्यप्रतिसन्धानदशायामुक्तानुमानादेव साध्यवद्वृत्तित्वाभावसिद्धिः तत्र भविष्यति, अन्यथा व्याप्त्यन्तरस्यापि तत्रातिप्रसङ्गादित्यत आह किञ्चेदमित्यादि। तथाच कालो गोमान् गोत्वादित्यादौ कालिकसम्बन्धेन हेतावव्याप्तिः, कालिकसम्बन्धेन हेतुमति महाकाले तेन सम्बन्धेन कालवृत्तित्वाऽभावस्य कुत्राप्यसत्त्वात्। न च कालावच्छेदेन गगनादावेव साध्यवद्वृत्तित्वाभावस्य प्रसिद्धिः, कालस्य गगनाद्यनधिकरणत्वेन तन्निष्ठवृत्तित्वाभावे कालावच्छेद्यत्वासंभवात्, कालिकसम्बन्धे-

---

नन्देहस्यापि दूषकत्वमित्याशयात्। भेदस्याऽव्याप्यवृत्तित्वे उपाधेर्न साधनाऽव्यापकत्वमत आह **भेदस्याव्याप्यवृत्तित्वे त्विति**। न चैवं प्रमाणाभावेन अणुत्वनिष्ठाऽतीन्द्रियमनस्त्वसामानाधिकरण्याभावादौ परमाण्ववच्छिन्नत्वाऽसिद्ध्या हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याऽभावाऽप्रसिद्ध्या नातिव्याप्तिरिति वाच्यम्। ऐन्द्रियकरूपादिसामानाधिकरण्याभावे प्रत्यक्षेणावच्छिन्नत्वसिद्धौ अतीन्द्रियसामानाधिकरण्याभावः अवच्छिन्नः सामानाधिकरण्याभावत्वात् ऐन्द्रियकसामानाधिकरण्याभाववदित्यनुमानेन तत्सिद्धेः। अप्रसिद्ध्याऽतिव्याप्तिपरिहारे तथैवातीन्द्रियसाध्यके सद्धेतावव्याप्तेश्चेति ध्येयम्। साध्यवद्वृत्तित्वाभावसिद्धिः–मनस्त्ववद्वृत्तित्वाभावसिद्धिः, तत्र–अणुत्वे। **भविष्यतीति**। तथाचोपाधिशङ्काया सर्वदाऽसत्त्वेन तद्विरहदशायामतीन्द्रियहेतौ अतीन्द्रियसाध्यसामानाधिकरण्याभावानुमितिसम्भवान्नातिव्याप्तिरिति भावः। **अन्यथा व्याप्त्यन्तरस्येति**।

कालावच्छेद्यत्वाऽसम्भवादिति। अवच्छेद्याऽधिकरणसम्बन्धिन एवाच्छेदकत्वादिति शेषः।

अथ हेत्वधिकरणमहाकालावच्छेदेन महाकाले एव साध्यीभूतगवाधिकरणमहाकालनिरूपितवृत्तित्वाभावः प्रसिध्यति, महाकालस्य गगनादिवदवृत्तितया तत्र महाकालनिरूपितवृत्तित्वाभावसत्त्वात्, महाकालस्य तादात्म्यसम्बन्धेन स्वसम्बन्धितया स्वनिष्ठाऽभावाऽवच्छेदकत्वसम्भवाच्चेति चेन्न। हेतुतावच्छेदकसम्बन्धस्य वृत्तिनियामकत्वे तेनैव साध्यवद्वृत्तित्वाभावे वृत्तिनियामकसम्बन्धेनाऽवच्छेद्याधिकरणसम्बद्धमेवाऽवच्छेदकं, हेतुतावच्छेदकसम्बन्धस्य वृत्त्यनियामकत्वे तेन सम्बन्धेन साध्यवत्सम्बन्धित्वाभावे वृत्त्यनियामकेनाऽपि सम्बन्धेन सम्बद्धमधिकरणमवच्छेदकं, तथैवाऽनुभवाद्। प्रकृते तु हेतुतावच्छेदककालिकसम्बन्धस्य वृत्तिनियामकत्वेन तदनियामकतादात्म्यसम्बन्धस्याऽवच्छेदकत्वानियामकत्वादव्याप्तिर्दुरुद्धरैव।

एतेन अवच्छेद्याधिकरणत्वमेवाऽवच्छेदकत्वे नियामकं न तु सम्बद्धत्वमात्रं तथैवाऽनुभवात्, अत एव सम्बन्धान्तरेण सम्बद्धे इत्युपेक्ष्य वर्तमाने इत्यभिहितम्। एवं चाऽधिकरणत्वानियामकतादात्म्यसम्बन्धस्याऽवच्छेदकत्वानियामकत्वेन कालिकसम्बन्धेन हेतावव्या-

न गगनादेर्वृत्तिमत्त्वस्वीकाराच्च ।

यद्यपि गोत्वाद्यधिकरणतत्तत्क्षणावच्छेदेन कालवृत्तित्वाभावस्य तत्तत्क्षणाऽसमानकालीने तत्तत्क्षणगोचरज्ञाने प्रसिद्धिः, तत्तत्क्षणस्याऽपि विषयतया स्वविषयकज्ञानाधिकरणतया तन्निष्ठताद्दृशवृत्तित्वाभाववत्तायामवच्छेदकत्वसम्भवात्, तथापि महाकाल एव कालिकसम्बन्धेनाधिकरणम् उपाधीनां तत्तत्क्षणवृत्तितायामवच्छेदकत्वमात्रमिति प्राचीनसिद्धान्तमनुसृत्येदम् ।

महाकालनिरूपितविशेषणतया वा हेतावव्याप्तिर्द्रष्टव्या । इदमिदानीमित्याकारकप्रतीतिनियामकविशेषणतायां यो विशेषस्तेन हेतुतायामिति व्याख्यया ताद्दृशविशेषणतायाः प्राप्तेः ।

सामान्यत एव विभिन्नकालीनयोर्नाधाराधेयभाव इति मते नानुपपत्तिगन्धोपि, क्षणानां स्वसमानकालीनविषयतयापि अनधिकरणत्वेन तदवच्छेदेन ज्ञाने साध्यवद्वृत्तित्वाभावप्रसिद्ध्यसम्भवादिति ध्येयम् ।

अत्र हेतुतावच्छेदकसम्बन्धेन स्वाधिकरणे स्वनिरूपितहेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य विवक्षायां न कोपि दोषः । साधनीभूतगोत्वाधिकरणमहाकालावच्छेदेन गोत्वनिरूपितकालिकसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य घटादावेव प्रसिद्धत्वात् । साध्यसामानाधिकरण्यत्वं यद्धर्मावच्छिन्नाधिकरणावच्छेद्यहेतुवृत्तिकात्यन्ताभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं वा विवक्षितम्, इत्थं च वाच्यं प्रमेयादित्यादौ प्रमेयव्यक्तीनां भेदेऽपि न व्याप्तेर्भेद इत्यस्मद्गुरुचरणाः ।

केचित्तु स्वनिष्ठं यत्साध्यवद्वृत्तित्वं हेत्वधिकरणावच्छेद्यतदभावाधिकरणभिन्नत्वमित्यर्थः ।।ताद्दृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नव्यक्तावेव प्रसिद्धमतो नाव्याप्तिरित्याहुः ।

प्तिवत्तादात्म्यादिवृत्त्यनियामकसम्बन्धेन हेतौ व्यभिचारिणि अतिव्याप्तिसम्भवेन तदनुद्भावने दीधितौ न्यूनत्वमिति परास्तम् । वृत्तिनियामकसम्बन्धघटिताऽवच्छेद्यस्थले एव तदाधेकरणत्वस्याऽवच्छेदकतानियामकत्वात्, अन्यत्र च सम्बद्धत्वस्यैव तन्नियामकत्वेनोऽक्तस्थले तादात्म्यादेरप्यवच्छेदकतानियामकत्वेनाऽतिव्याप्त्यसम्भवात् ।

केचित्तु सर्वत्राऽधिकरणत्वघटितस्यैव तन्नियामकत्वेऽपि न क्षतिः वृत्त्यनियामकसम्बन्धेन साध्यवद्वृत्तित्वस्य हेत्वधिकरणस्य चाऽप्रसिद्ध्यैवोक्तव्यभिचारिणि नातिव्याप्तिः । न चैवं तेन सम्बन्धेन सद्धेतावव्याप्तिरिति वाच्यम् । प्राचीनमते तेन सम्बन्धेन व्याप्यतया अनभ्युपगमादित्याहुः ।

अन्ये तु उपलक्षणपरोयं ग्रन्थः, तथाच सर्वविषयकत्वादौ साध्ये विषयितया घटादिहेतौ अव्याप्तिः, विषयितया सर्वविषयकत्ववदसम्बन्धित्वस्याऽप्रसिद्धेः । न च घटादौ कपालाद्यवच्छेदेन तस्य प्रसिद्धिरिति वाच्यम् । तथापि हेत्वधिकरणावच्छिन्नस्य तस्याप्रसिद्धेरित्याहुः ।

कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वस्वीकाराच्चेति । तथाच जगदाधारत्व-

साध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये यन्निष्ठत्वयदधिकरणावच्छेद्यत्वोभयाभावस्तत्त्वं व्याप्तिः, पर्वतीयरूपनिष्ठं यत्पर्वतावच्छेद्यं वह्निमत्संयुक्तत्वाभावाधिकरणत्वं न तद् धूमनिष्ठं, यच्च धूमनिष्ठं न तद् धूमाधिकरणावच्छेद्यम्, अधिकरणभेदेन तस्य नानात्वात्, अन्यथा पर्वते नदीयरूपे न वह्निमत्संयुक्तत्वमितिवत् पर्वते धूमे न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्यापत्तेः, अतो वह्निमान् धूमादित्यादौ नाव्याप्तिः । व्याप्यवृत्तेरवच्छेदकत्वास्वीकारे तु तादृशाभावाधिकरणत्वसामान्ये यदधिकरणावच्छेद्यत्वसामान्याभावस्तत्त्वमित्येव वाच्यमित्यादिकं पुनरुक्तत्वादुपेक्षितम् । वा-

---

निर्वाहायेतरसम्बन्धेनाऽवृत्तेरपि गगनादेः कालिकसम्बन्धेन वृत्तिमत्त्वात्, कालावच्छेदेन सर्वत्र कालिकसम्बन्धेन साध्यवद्वृत्तित्वसत्त्वात् तद्विरहिणोऽप्रसिद्ध्याऽव्याप्तिरिति भावः ।

अधिकरणतासामान्ये इति । **न च** साध्यवद्वृत्तित्वाभावसामान्ये इत्येव कथं नोक्तमिति वाच्यम् । अधिकरणभेदेनाऽभावभेदाऽभावमते स्वावयवावच्छेदेन धूमादेर्वृत्तिवन्हिमत्संयुक्तत्वाभावस्यैव पर्वताद्यवच्छेदेन रूपादिवृत्तितया तादृशाऽभावे धूमनिष्ठत्वधूमाधिकरणपर्वतावच्छेद्यत्वोभयसत्त्वेन तादृशोभयाभावाऽसत्त्वाद् वन्हिमान् धूमादित्यादावव्याप्तिः स्यादतस्तदुपात्तम् । यद्यपि हेत्वधिकरणावच्छिन्नत्वस्याऽव्याप्यवृत्तित्वमते वन्हिमत्संयुक्तत्वाभावे रूपादिवृत्तित्वावच्छेदेन हेत्वधिकरणावच्छिन्नत्वं, धूमवृत्तित्वावच्छेदेन न हेत्वधिकरणावच्छिन्नत्वं किन्तु तदभावः, तथाच वन्हिमत्संयुक्तत्वाभावे हेत्वधिकरणावच्छिन्नत्वाभावप्रयुक्तोभयाभावसत्त्वान्नाऽव्याप्तिः, तथापि धूमवान् वन्हेरित्यादौ धूमवत्संयुक्तत्वाभावे वन्हिवृत्तित्वावच्छेदेनाऽयोगोलकाऽवच्छिन्नत्वसत्त्वेऽपि नौकादिवृत्तित्वावच्छेदेन तदभावसत्त्वेनोभयाभावसत्त्वादतिव्याप्तिः स्यादिति ध्येयम् ।

तादृशाभावाधिकरणतायामुभयाभावविवक्षणे तु न दोषः । रूपादिनिष्ठपर्वतावच्छिन्नतादृशाभावाधिकरणतातो धूमादिनिष्ठतादृशाभावाधिकरणताया भिन्नत्वात् धूमे पर्वते न वह्निमत्संयुक्तत्वमित्यप्रत्ययात् इत्यमुमेवार्थं मनसि निधायाह **पर्वतीयरूपनिष्ठमिति** । धूमवान् वह्नेरित्यादौ रूपादिनिष्ठायां पर्वतावच्छिन्नधूमसंयुक्तत्वाभावाधिकरणतायां महानसीयवह्न्यादिनिष्ठस्वावयवावच्छिन्नतादृशाभावाधिकरणतायां चोक्तोभयाभावसत्त्वेनाऽतिव्याप्तिः स्यादतः सामान्यपदम् । तादृशाभावाधिकरणतात्वावच्छेदेनोभयाभावलाभार्थम् तादृशाभावाधिकरणतात्वव्यापकोभयाभाव इति फलितम् । एवं च कालो गोमान् गोत्वादित्यत्र मूर्त्तमात्रस्य दिगुपाधित्वेन स्वाधिकरणपरमाण्ववच्छेदेन गोत्वादौ वर्त्तमाने कालवृत्तित्वाभावे कालस्याऽनवच्छेदकत्वाल्लक्षणसमन्वयः । सत्तावान् जातेरित्यादौ कालिकसम्बन्धेन जातिसम्बन्धिध्वंसावच्छेदेन साध्यवद्वृत्तित्वाभावो जातौ प्रसिद्धस्तदनवच्छेदकं द्रव्यादिकमिति लक्षणसमन्वय इति ध्येयम् ।

अथ वन्हिमान् धूमादित्यादौ महानसीयधूमे पर्वतावच्छेदेन वन्हिमत्संयुक्तत्वाभावसत्त्वेन वन्हिमद्वृत्तित्वाभावाधिकरणतासामान्यान्तर्गतायां महानसीयधूमनिष्ठतादृशाधिकरणतायां हेतुमत्पर्वतावच्छेद्यत्वहेतुनिरूपितत्वोभयोः सत्त्वादव्याप्तिः । एवं व्याप्यवच्छेदकत्वास्वीकारे हेतुनिष्ठत्वाघटितलक्षणेऽपि बोध्या । धूमवत्कपालसम्भवे तु पर्वतसंयुक्तघटे वह्निमत्सं-

च्यत्वादिसाध्यके तादात्म्येन हेतावव्याप्तेश्च, वाच्यत्ववत्तादात्म्याभावाऽप्रसिद्धेः ।

एतेन सत्तायां कर्मणि न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतौ कर्मण इव कर्मसत्त्वयोः समवायस्याप्यवच्छेदकत्वं भासते, अन्यथा इदानीं सत्तायां न द्रव्यत्वसामानाधिकरण्यमित्यादिप्रतीत्यापत्तेः, एतत्कालस्य कर्मानतिरेकात् । एवं च यद्धेतुव्यक्त्यधिकरणीयहेतुतावच्छेदकसम्बन्धे साध्य-

युक्तत्व पर्वतावच्छेदेन, कपालावच्छेदेन तदभावोऽपि वर्त्तते कपालस्य समवायेन घटाधिकरणत्वात्, तथाच साध्यवद्वृत्तित्वाभावाधिकरणान्तर्गततादृशघटनिष्ठाधिकरणतावद्धेतुमत्कपालावच्छेद्यत्वसत्त्वाद्वह्निमान् धूमादित्यादावव्याप्ति, एवं धूमवान् वह्नेः पृथिवीरूपादित्यादौ च यावती साध्यवद्वृत्तित्वाभावाधिकरणता तस्याः व्याप्यवृत्तितया हेत्वधिकरणावच्छेद्यत्वाभावसत्त्वादतिव्याप्तिरिति कथमुक्तं जगदीशेन "इत्यादिकं पुनरुदक्षरत्वादुपेक्षितमिति" अव्याप्त्यादिदोषस्यैव जागरूकत्वादिति चेत् । अत्र ब्रूमः । लक्षणद्वये साधनवृत्तित्वं स्ववृत्तिहेतुतावच्छेदकधर्मावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतावत्त्वसम्बन्धेन वक्तव्यम्, तथाच वह्निमान धूमादित्यत्र पर्वतवृत्तिधूमस्य स्ववृत्तिधूमत्वावच्छिन्नसंयोगसम्बन्धेन महानसादावपि सत्त्वात् तस्मिन्नपि धूमे एतादृशसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावो हेत्वधिकरणावच्छेदेन नास्ति, एवं वह्निधूमोभयवत्कपालसमवेतपर्वतसंयुक्तघटे एतादृशसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावो व्याप्यवृत्तिरेव तदधिकरणताया हेत्वधिकरणावच्छेद्यत्वाभावसत्त्वात्, स्ववृत्तिधूमत्वावच्छिन्नसंयोगसंबन्धावच्छिन्नाधिकरणतासम्बन्धेन तादृशघटस्य कुत्राप्यसत्त्वेन व्यधिकरणत्वादिति, धूमवान् वह्नेरित्यादौ च एतादृशसबन्धेन वृत्तित्वस्याऽव्याप्यवृत्तित्वेन तदवच्छिन्नाधिकरणतायां हेत्वधिकरणावच्छेद्यत्वसत्त्वान्नातिव्याप्तिरिति ।

वस्तुतस्तु वाच्यं प्रमेयादित्यादौ वाच्यत्ववत्तादात्म्याभावाप्रसिद्धेरित्यग्रिमग्रन्थेनाऽव्याप्तेरपि वक्ष्यमाणत्वादत्राप्यव्याप्तिर्न क्षतिमावहति व्यभिचारिणस्तु अव्याप्तिसम्भवे अतिव्याप्तेः का कथेति न्यायेन हेयत्वादिति सुधियो विभावयन्तु ।

भासत इति । तथाच पर्वते रूपे वन्हिमत्संयुक्तत्वं नास्तीति पर्वतसबन्धिरूपे वह्निमत्संयुक्तत्वाभावावगाहिप्रतीतौ यथा पर्वतस्यावच्छेदकत्वं विषयीक्रियते तथा पर्वतरूपयोः समवायोऽपि सम्बन्धविधयावच्छेदकः, पर्वतसंबन्धावच्छिन्नरूपे वह्निमत्संयुक्तत्वाभावावगाहने संबन्धस्याऽवच्छेदकत्वावगाहने बाधकाभावादिति भावः । अन्यथा—संबन्धस्याऽनवच्छेदत्वे । **इदानीमिति** । अत्र कालिकसम्बन्धोऽवच्छेदकतया भासते इति विशेषः । ह्रदादिनिष्ठसंयोगे वह्निमत्संयुक्तत्वाभावावच्छेदकत्वाद् वह्निमान् धूमादित्यादावव्याप्तिरतो **हेतुव्यक्त्यधिकरणीयेति** । हेत्वधिकरणनिष्ठेत्यर्थः । ह्रदादेरपि कालिकेन हेत्वधिकरणत्वात्, हेतुतावच्छेदकसम्बन्धेनेत्यपि देयम् । एवं हेत्वधिकरणमहानसादिनिष्ठसंयोगे धूमवत्संयुक्तत्वाभावावच्छेदकत्वाभावादतिव्याप्त्या उक्तहेतुतावच्छेदकसम्बन्धत्वावच्छेदेनेत्यपि वक्तव्यम् । एवमुभयाभावमादायाऽतिव्याप्तिवारणाय साध्यवद्वृत्तित्वभावावच्छेदकत्वत्वावच्छिन्नाभावो वाच्यः, तथाच निरुक्तहेतुतावच्छेदकसम्बन्धवृत्त्यभावप्रतियोगितानवच्छेदकसाध्यवद्वृत्तित्वाभावावच्छेदकत्वत्वावच्छिन्नाभावत्वकत्वं वक्तव्यमित्यर्थः । **निरस्तमिति** । अत्र समवायस्यैकत्वेन गु-

१४ कुमारसंभवं महाकाव्यम् । महाकवि श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं२) रु० १—८

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०-६

१६ कारिकावलि । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्याय २) रु० १—०

१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्ठोदिवि-शौच भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम् । मधुसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः । (व्याकरणं १) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं ३) रु० १—०

२१ सप्तपाठि श्रीशिवमहिम्नस्तोत्रम् । श्रीगन्धर्वराज पुष्पदन्ताचार्य-विरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषा-बिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः । भाषाटीका-सहितः । (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः । (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्य्यटीका । श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः । (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः । (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः । (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ४) रु० ०—४

२६ पौरोहित्यकर्मसारः । (टिप्पणीसमलंकृतः) सपरिशिष्ट द्वितीय तृतीयभागश्च । श्रीरमाकान्तशर्मणा संगृहीतः ।

२७ लघुशब्देन्दुशेखरः । म० म० श्रीनागेशभट्टविरचितः [illegible] भावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त पर्वतीय कृतदोषरत्नदीपकाख्येन टिप्पणेन समुद्भासितः । (व्या० ४ रु० ६—० [illegible]

२८ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् पञ्चमसर्गात्मकम्, म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनक [illegible] काव्य० [illegible]

२९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नसम्पादितया पूर्णया जयमङ्गलरचितया टीकया समेतम् बहुस्थलेषु पाठान् परिष्कृत्य, सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । काम० २ रु० ६—०

३० न्यायकुसुमाञ्जलिः । न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः । म० म० रुचिदत्तकृतमकरन्दोद्भासितः म० म० वर्धमानोपाध्यायप्रणीतप्रकाशसहितः । न्याय० ४ रु० ६—०

३१ परिभाषेन्दुशेखरः । म० म० श्रीनागेशभट्टरचितः, म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या—तत्त्वप्रकाशिकया टीकया च सहितः । (व्याकरणं ७ यन्त्रस्थ

३२ अर्थसंग्रहः । पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः । (मीमां० २ रु० १—०

३३ न्यायवार्त्तिकम् । न्यायदर्शनवात्स्यायनभाष्योपबृंहणम् । परमर्षिभारद्वाजोद्द्योतकरविरचितम् । महर्षि-गोतमादिचरितसम्वलितबृहत्भूमिकासहितम् । (न्याय० नि० ५ रु० ६—०

३४ शुक्लयजुर्वेदसंहिता । वाजसनेयिमाध्यन्दिनशाखीया । श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता । (भाग १–२–३–४) (वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता । श्रीसायणाचार्यविरचितभाष्यसहिता । १ अध्यायादारभ्य २० अध्यायपर्यन्ता । (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः । श्रीमदप्पयदीक्षितविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः । (वेदान्तं ४) रु० ६—०

३७ काशिका । श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः पं० जयादित्य-वामन-जयादित्यविनिर्मिता । (व्याकरणं ८) रु० ६—०

३८ प्राकृतप्रकाशः । भामहकृतः । श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसाहि-
तः । टिप्पण्या च संयोजितः । (व्याकरणं ७) रु० १—४

३९ जीवन्मुक्तिविवेकः । श्रीमद्विद्यारण्यस्वामिविरचितः । भाषानुवा-
दसमेतः । (वेदान्तं ६) रु० २—०

४० श्रीनारदीयसंहिता । ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिष-
ग्रन्थः । (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः । मेदिनीकारविरचितः । (कोशं १) रु० १—८

४२ मीमांसादर्शनम् । श्रीशबरस्वामिविरचितभाष्यसहितम्
सपूर्णम् । (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम् । श्रीगोतममुनीप्रणीतम् । श्रीवात्स्यायनमुनीप्रणीत-
भाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचि-
तन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

४४ दानमयूखः । विद्वद्वरश्रीनीलकण्ठभट्टविरचितः (धर्मशास्त्रं १) रु० १—८

४५ कालमाधवः । विद्वद्वरश्रीमाधवाचार्यविरचितः । (धर्मशास्त्रं २) रु० १—८

४६ भास्वती । श्रीमच्छतानन्दविरचिता । श्रीमातृप्रसाद (दैवज्ञभू-
षण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण
भाषाटीकाभ्यां सहिता । (ज्योतिषं ३) रु० २—०

४७ फक्किकाप्रकाशः । उपाध्यायोपाह्ववैयाकरणकेसरीबिरुदाङ्कितमैथि-
लेन्द्रदत्तशर्मविरचितः । पं० सीतारामशर्मकृतटिप्पण्या
विभूषितः । (व्याकरणं ८) रु० १—४

४८ मिताक्षरा । श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या--श्रीम-
त्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामि-
कृता । शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च । (वेदा०७) रु०१—४

४९ काव्यप्रकाशः । श्रीमम्मटाचार्यविरचितः । पं० श्रीहरिशङ्करशर्मणा
मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः । (काव्य०५) रु० ४—०

५० अधिकरणकौमुदी । श्रीदेवनाथठक्कुरकृता । (मीमां० ४) रु० १—०

५१ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् म.म. श्रीमल्लिनाथ-
कृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलालठक्कुरेण कृता
भाववोधिनी टिप्पण्या समलङ्कृतः संपूर्णम् । (काव्य ४) रु०१—४

५२ कातबोधः । साजनीकृत टीकोपेतः । दत्तात्रेय सम्प्रदायाऽनुगतः । रु०—८

५३ रसचन्द्रिका । श्रीविश्वेश्वरपाण्डेय निर्मिता । (काव्य० ६) रु०१—०

५४ अलङ्कारमुक्तावली । श्रीविश्वेश्वर पाण्डेयनिर्मिता । (काव्य०७) रु००—१२